नं० ७०८-घ

स्मृतितत्त्वे शुद्धितत्त्वम् (धर्मशास्त्रम्)

पत्राणि ७६/८५ (अपूर्णम्)

नं० ७०९-घ

कर्त्ता रघुनन्दन भट्टाचार्यः

तृतीयंतत्वं ३

वंशलां कारणी ३ अङ्कं ८९

१८

प्रद्वितत्वं ८५

ॐ नारायणाय॥ प्रणम्य सच्चिदानंदं जगतामीश्वरं हरिं। शुद्धितत्त्वानि तत्प्रीत्यै वक्ति श्रीरघुनंदनः॥१॥ सहानुगमनं नार्य्याः योगसिद्धिनयस्तथा। नानाफलं तथैकस्मा
द्याद्येकफलं क्वचित्। अशौचभेदकोत्पत्तिः स्वल्पस्य गुरुशंकरात्। दिनक्षयत्र्यहाभ्यां च पौर्वाशौचसमापनं। अशौचान्तदिने कृत्यं जनने पित्तमंडनं। अन्याशौचस्य
मध्ये तु जातकर्म्मादिका क्रियाः। गर्भस्रावे तथाशौचं स्त्रियां वार्त्तिथसङ्गुणौ। कलौ तत्प्रतिषेधश्च पक्षिणीलक्षणं तथा। विदेशस्थस्य चाशौचं सपिण्डादेरशौचकं। त्या
गस्तस्य च सम्बन्धादेरशौचिग्राह्यनिर्णयः। अशौचं मृत्युभेदेन सद्यः शौचं मनन्तरं। शवानुगमनाशौचसंसर्गास्पृश्यत्वनिर्णयः। द्रव्यशुद्धिविचारश्च सूतिकास्पर्शने
पि तु। विनाचैश्च यथाशुद्धिरेकाहमरणाद्वये। मुमूर्षुमृतकृत्यादि यथापर्णनरक्रिया। उदकादिक्रियातत्र प्रेतस्नाने च वाससः। एकत्वं क्वचिदन्यत्र्यादेयः संब
धवाचकः। प्रेतक्रियासु संबुद्धिर्यजुषां तर्पणे सदा। गोत्रोक्तिर्न सगोत्रोक्तिः शोकापनोदनादिकं। पिंडोदकादिदानं च रात्रावपि च सा क्रिया। अशौचान्ताद्द्विती १ शु
याह्न कृत्यं दानं ह्यत्यजिः। प्रेतक्रियासु संक्षेपादधिकारिविनिर्णयः। सपिंडादिमिदाशौचसंक्षेपोऽन्त्येष्टिपद्धतिः। निरूप्यन्ते च संक्षेपात्सतां मुदमभीप्सता। ।
॥ अथ सहानुगमनं॥ अंगिराः॥ मृते भर्त्तरि या नारी समारोहेद्धुताशनं। सारुंधतीसमाचारा स्वर्गलोके महीयते। तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मान
वे। तावन्त्यब्दानि सा स्वर्गे भर्त्तारं यानुगच्छति। व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वद्भर्त्तारमादाय तेनैव सह मोदते। मातृकं पैतृकं चैव यत्र कन्या
प्रदीयते। पुनाति त्रिकुलं नारी भर्त्तारं यानुगच्छति। अत्र सा भर्तृपरमा परापरमलालसा। क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश। भर्तृपरमा भर्त्तापरमो यस्याः
सा परापरमलालसेत्यत्र स्तूयमानाप्सरोगणैरिति व्यासेन पठितं। ब्रह्मघ्नो वा कृतघ्नो वा मृत्युघ्नो वापि यो नरः। तं वै पुनाति सा नारी इत्यंगिरसभाषितं। साध्वीना

मेवनारीनामग्निप्रपतनादृते । नान्यो हि धर्मो विज्ञेयो मृते भर्त्तरि कर्हिचित् । यानारी मृत्युपादानात् सहमरणाभावपक्षोऽपि शुचित: । नान्यो हि धर्म इति तु सहमरणस्तु
त्यर्थ: ॥ तथा च विष्णु: । मृते भर्त्तरि ब्रह्मचर्यं तदन्वारोहणं वेति । ब्रह्मचर्यं मैथुनवर्जनं ताम्बूलादिवर्जनं च तथा च प्रचेता: । ताम्बूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत । अभ्युंजनमायुर्वेदपरिभाषितं । यथा मूर्ध्नि दत्तं यदा तैलं भवेत्सर्वांगसंगतं । स्रोतोभिस्तर्पयेद्बाहू अभ्यंग: स उदाहृत: । तैलमल्पं
यदंगेषु न च स्याद्बाहुतर्पणं । समाप्तिः पृथगभ्यंगो मस्तकादौ प्रकीर्त्तित: ॥ स्मृति: । एकाहार: सदा कार्य्यो न द्वितीय: कथंचन । पर्य्यंकशायिनी नारी विधवा पातयेत्पतिं । गंध
द्रव्यस्य संभोगो नैव कार्य्यस्तथा पुन: । तर्पणं प्रत्यहं कार्य्यं भर्त्तु: कुशतिलोदकै: । तर्पणं पुत्रपौत्राभावविषयमिति मदनपारिजात: । वैशाखे कार्त्तिके माघे विशेषनिय
मं चरेत् । स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं तथा । तत्र साध्वीमाह हारीत: । आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ सा साध्वी ज्ञेया पतिव्रता । इदं
छंदोगपरिशिष्टीयमिति कल्पतरु: । साध्वीप्रसादेन लोकत्रयधारणमप्याह मत्स्यपुराणं । तस्मात्साध्व्य: स्त्रिय: पूज्या: सततं देववज्जनै: । तासां राजन्प्रसादेन धार्य्यते पि जगत्त्र
यं । महाभारते । अवमत्य च या: पूर्वं पतिं दुष्टेन चेतसा । वर्त्तन्ते याश्च सततं भर्तृणां प्रतिकूलत: । भर्त्रानुमरणं काले या: कुर्वन्ति तथाविधा: । कामक्रोधाद्भयान्मोहात्स
र्वा: पूता भवन्त्युत । अत्र चैहिकब्रह्मघ्नपतेर्हीह निषेधात् जन्मांतरीयतत्पापवत: सहमरणेनोद्धार: । ब्रह्मपुराणे । देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयं । निधायोरसि
संशुद्धा प्रविशेज्जातवेदसं । ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी । त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत् । ऋग्वेदवादादिमा नारीरविधवा इत्यादिमंत्रात्
एवं च सकलवचनपर्य्यालोचनया ब्राह्मण्यादिसकलभार्य्याणां स्वगतभर्तृगतफलविशेषार्थिनीनां गर्भवतीबालापत्याघतिरिक्तानां सहमरणानुमरणयोरधि

2

कारइति। कल्पतरुरत्नाकरौ। तत्र ब्राह्मण्या अनुगमनाभिधानमसंगतं तस्यास्तन्निषेधात्। तथाच मिताक्षरायां देववोधकृतयाज्ञवल्क्यटीकायां च गौतमः। पृथक्चितिं समारु
ह्य न विप्रा गंतुमर्हति इति। तस्मा ब्राह्मण्याः सहमरणमेव। इतरासां तु त्वयमिति कल्पतरुरत्नाकरयोः चितामनिषु पादुकाद्वयमिति दर्शनात् पादुकादिकमित्यपाठः किंतु पादुका
द्वयमित्युपलक्षणं उशनासावित्रेतरासां द्रव्यविशेषमनुपादाय पृथक्चितारोहणमात्रोक्तेः। यथाउशना। पृथक्चितिं समारुह्य न विप्रा गंतुमर्हति। अन्यासां चैव नारीणां स्त्री
धर्म्मोऽयं परः स्मृतः। मदनपारिजातेप्येवं। शिष्टाचारोपि तथा अत्र तत्वार्णवे हृद्दकारदीयं। वालापत्याश्च गर्भिण्यो ह्यदृष्टऋतवस्तथा। रजस्वला राजसुते नारोहंति चितां
शुभे। राजसुते सगरमातुः संबोधनं। वृहस्पतिः। वालसंवर्द्धनं त्यक्त्वा वालापत्या न गच्छति। रजस्वला सूतिका च रक्षेद्गर्भं च गर्भिणी। एवं चान्यतश्चेद्बालसंवर्द्धनं स्यात्
तदा तस्या अप्यधिकारः।। व्यासः। दिनैकगम्यदेशस्था साध्वी चेत्कृतनिश्चया। न दहत्स्वामिनं तस्या यावदागमनं भवेत्। भविष्यपुराणे। तृतीयेह्नि उदक्यायां मृतभर्त्त २ शु
रि वै द्विजाः। तस्यानुमरणार्थाय स्थापयेदेकरात्रकं। तस्य भर्त्तुः। एकां चितिं समारुह्य भर्त्तारं यानुगच्छति। तद्भर्त्तुर्यः क्रियाकर्त्ता स तस्याश्च क्रियां चरेत्। एतच्च पिंडदानपर्यं
तं। यश्चाग्निदाता प्रेतस्य पिंडं दद्यात्स एव हीति वायुपुराणोक्तवाक्यत्वात्। ब्रह्मपुराणे। श्रावयेत् भर्त्तृजायां तु स्वभर्त्तृकुलपावनं। चितामारोपयन प्राज्ञः प्रसृतधर्म्ममुत्त
मं। इमाः पतिव्रताः पुण्याः स्त्रियो याया सुशोभनाः। सहभर्त्तृशरीरेण संविशन्तु विभावसुं। एवं श्रुत्वा ततो नारी श्रद्धाभक्तिसमन्विता। पितृमेधेन यज्ञेन इष्ट्वा स्वर्गमम
वाप्नुयात्। प्रसृते भर्त्तरीति शेषः। पितृमेधेन यज्ञेन चितारोहणरूपेण पादुकाद्वयग्रहणपूर्वकानुमरणेपि सहभर्त्तृशरीरेणोत्यनुग्रहः प्रयोज्यः। देशांतरमृते पत्यावित्यादि
नाशरीरप्रतिनिधित्वेन तदीयद्रव्यविधानात् प्रतिनिधौ च यथाश्रुतमंत्रपाठमाह कात्यायनः। श्राद्धविप्रतिपत्तिरिति एतद्धि हत नैकादशीतत्वे न च ज्वलाग्निप्रविष्टानां

संग्रामदेशान्तरमृतानां गर्भाणां जातदंतानां मरणे त्रिरात्रेणाशुद्धिरिति काश्यपवचनात्। अन्यत्र भार्यात्वस्याशौचप्रतीतेः सहमरणे काश्यपोक्तत्रिरात्राशौचांगीकारेपितस्या
शौचकालावधिस्थायित्वं। अंतर्दशाहे स्यातां चेत् पुनर्मरणजन्मनी। तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति मनुवचनोक्ताशौचशंकरे पराशौचस्य पूर्वाशौचका
लावधिस्थायित्वप्रतीतेः। ततश्च यथाशौचकालसंकोचे तन्मध्य एव संकलय्य पिंडदानं तथाशौचकालवृद्धावपि यावदशौचं यथाक्रमं दशपिंडा देया इति। जीकल्सीया
न्योद्दीपद्धति विध्यनुमरणविवेकयोर्व्यासः संस्थितं पतिमालिंग्य प्रविशेद्या हुताशनं। तस्याः पिंडादिकं देयं क्रमशः पतिपिंडवत्। विष्णुः। अन्वितापिंडदानं तु यथा भ
र्तुर्दिने दिने। तदन्वारोहिणीयस्मात् तस्मात्सा नात्मघातिनी। अत्रानुसहार्थः पतिमालिंग्येत्यनेनैकवाक्यत्वात्। साम्यशौचाभ्यन्तरे पृथक्चितामृतायास्त्र्यहेण पिंडदाने।
स्वाम्यशौचापगमे तु श्राद्धं अन्वितायाः प्रदातव्या दशपिंडास्त्र्यहेण तु। स्वाम्यशौचव्यतीते तु तस्याः श्राद्धं विधीयते। इति जितेन्द्रधृतपैठीनसिवचनात्। अग्निपुराणस्येदमिति तिथ्य
लपाणिः। अत्रानुः पश्चादर्थः। अतीते तु भर्तृशौचे पादुकाद्यमादाय ज्वलदग्निप्रवेशे त्र्यहाशौचं च व्यवस्थाप्य पिंडदानं चतुर्थदिने श्राद्धं पूर्वोक्तब्रह्मपुराणवचनात्। यत्र तु भ
र्तुः संग्रामहतत्वादिना सद्यःशौचं तत्र पृथक्चितामृतायास्तु दशौचस्य पूर्वोक्तवचनात् त्रिरात्रत्वे तत्कालव्यापित्वेन घहद्धिमत्वात्तेनैव पूर्वाशौचस्य व्यपगमस्तत्र भर्तुर
पित्र्यहेणपिण्डदानं। तत्राप्येकचितारोहे सामर्थ्यशौचव्यपगमेन शुद्धिः संस्थितं पतिमालिंगेति। अन्वितापिंडदानमिति पूर्वोक्तवचनाभ्यां मग्निप्रवेशे स्तुमल्लुना सद्यः
शौचविधानाच्च। यथा स्त्रिवग्निजलसंग्रामदेशान्तरस्थसन्न्यास्य नशनाशनिमहाध्वनिकानां सुदकक्रिया कार्या सद्यःशौचं भवतीति भृगुरच प्रदेशः महाध्वनिकः पुण्यार्थ
हिमालयादिमहापथगमनेन संपादितमरणः नचैतत्सद्यःशौचं नित्यवेदाध्याय्यग्निहोत्रिभिरेकाहाशौचिभिः कर्तव्यमिति हारलतादत्तविषयकत्वेन नैतद्विषयक

3 मितिवाच्यं। तन्मात्रविषयकत्वे प्रमाणाभावात्। सामान्यस्तुत्यप्रवृत्ततया वचनान्तरसन्वादितयाचैतद्विषयकमपि अन्यथा काश्यपोक्तचिराशौचमपि अग्निजलसंग्रामप्रविष्टा
नां प्रमादेवमरणेऽइतिस्मरणतादर्शनादनुमरणाविषयकं न स्यात्। तस्मात्काश्यपवचनं ब्रह्मपुराणसमानविषयकमपि तु मन्त्रवचनं तु संग्राममनुतमर्दसहगमनविषयकमपीति ।
न चात्र योगसिद्ध्यधिकरणविरोधात् न समुच्चितफलसिद्धिरितिवाच्यं। योगसिद्ध्यधिकरणे हि यः पुत्रकामः यः पशुकाम इत्यादिना यज्ञक्रतुमुपक्रम्य एकैकस्मै वा कामायान्ये यज्ञक्र
तव आह्रियन्ते। सर्वेभ्यो दर्शपौर्णमासावित्युक्तं तत्र तत्तद्विधिवाक्ये श्रुतिनिरपेक्षफलश्रुतेः कामनाभेदान्नकैवाक्यं ततश्च सर्वशब्देन प्रकृतवाचिनानिरपेक्षगमनमेव पुत्रफलानां
दर्शपौर्णमाससंबंधेऽवगते प्रयोगभेदादेव भवतु तत्र तत्तत्फलसिद्धिः। तथा च तदधिकरणसिद्धान्तसूत्रं योगसिद्धिर्वा। अर्थस्योत्पत्त्ययोगित्वादिति वाशब्दः सिद्धान्तद्योतना
र्थः सर्वेभ्यो दर्शपौर्णमासावित्यत्रार्थस्य तत्तत्फलस्यप्रयोगेन प्रयोगभेदेन सिद्धिः उत्पत्त्ययोगित्वात् सर्वशब्दानुकर्षणीय यः पुत्रकामोयः पशुकाम इत्यादुत्पत्तिवाक्ये फलानां २ शु
युगपदसंबंधात् न चार्थस्य नानाविधस्योत्पत्त्ययोगित्वात् महेन्द्रादित्तश्लोकवासादीनामेकदोत्पत्त्यसंभवादिति व्याख्यानं युक्तमिति वाच्यं तडागोत्सर्गादावेकस्मात्कर्मणः
कामिकफलोक्तेः। तथा च मत्स्यपुराणे एतान्महाराजविशेषधर्मान करोति यो धर्मतिशुद्धबुद्धिः। सयाति रुद्रालयमाशुपूतः कल्पनानेकान्दिवि मोदते च। अनेकलो
कानसमहर्तपादीन भुक्त्वापरार्द्धद्वयमंगनाभिः। सहैव विष्णोः परमं पदं यत् प्राप्नोति तद्यागबलेन भूयः। तथेहापि सर्वनामपदाभावादर्थवादिकफलानि समुच्चितान्येव।
कामनाविषयो लाघवात्। अर्थवादिकसमुच्चितफला फलविषयक विधिरप्येकएव कल्प्यते लाघवात्। नहि निमित्तसाधारण्ये बाधकं विना नैमित्तिकानां पर्यायता संभ
ति वह्निसामीप्यदाहप्रकाशयोः पर्यायादर्शनात् तस्मात्सकृदनुष्ठिते कर्मणि यथैकं फलं निष्पाद्यते। तथा बाधकं विना फलान्तरमपि विनिगमनाविरहात्। ज्योतिष्टोमादस्तु

षष्टिवर्षाद्यवच्छिन्नफलादिश्रुतेः। पृथगनुष्ठानादेव पृथक्फलसिद्धिः। अन्यथा षष्टिवर्षाद्यभिधानं व्यर्थं स्यात्। यत्र तु कर्म्मफले कालविशेषो नोक्तस्तत्रापि तत्कर्म्मसम्पाद
कानुरूपेण कालविशेषो बोध्यः फलस्य कर्म्मनिष्पत्तेस्तेषां लोकवत् परिमाणात्ः फलविशेषः स्यादिति न्यायात्। तथा च मत्स्यपुराणे पौरुषं दैवसम्पत्त्या काले फलति पार्थिव।
त्रयमेतन्मनुष्यस्य पिण्डितं स्यात्फलावहं। कृषेर्वृष्टिसमायोगात् दृश्यन्ते फलवृद्धयः। तास्तु काले प्रदृश्यन्ते नैव काले कथंचन। पौरुषं पुरुषसाध्यैहिकक्रियाजन्यं। दैवं स्वरवाद्युत्
पादनोन्मुखीभूतादृष्टं पूर्वजन्मकृतं। तथा च याज्ञवल्क्यः। तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकं। अभिव्यक्तं फलोन्मुखीभूतं काले तत्तत्कार्यजननोन्मुखीभूते पिण्डितं मिलि
तं तान्येव सर्वैर्निबन्धृभिः बाधकं विना एकस्मात् प्रायश्चित्तात् नानापापध्वंस इत्युक्तं तथा च वृषोत्सर्गजलाशयोत्सर्गदुर्गापूजातन्माहात्म्यपाठनन्दागङ्गास्नानादिष्वेकशास्त्रोक्तानि
मिलितफलवाचकयुक्तानि संकल्पवाक्यानुक्तानि तथा च भवदेवभट्टाः। एकैकस्यैवाकाम्यान्ये यत्कृतवन्त्राच्छ्रियन्ते इति संकीर्त्य सर्वेभ्यो दर्शपूर्णमासाविति प्रयोगविधा
नाद्वत्। तत्र पृथगनुष्ठानसाध्यत्वं ब्रह्मवधप्रायश्चित्ते तथाभूते पृथगनुष्ठानसाध्यत्वप्रतिपादकवचनाभावात्। अनेकफलानां च तन्त्रेण दशाहरान्यायेन एककामनावि
षयत्वसंभवात् तन्त्रत्वमित्याहुः। हरिनाथोपाध्यायास्तु वृषोत्सर्गफलान्युद्दिश्य एतानि चार्थवादिकफलानि समुच्चितान्येव कामनाविषयः पुरुषविशेषणत्वस्यैकत्वात्
तथा च मिलितानामेव कामनाविषयत्वकल्पना अग्नीषोमयोरिव देवतात्वे लाघवन्यायस्याविशिष्टत्वादित्याहुः। यथा वायव्यतारा गीर्धीयीत तस्यापि तरोद्धृतकुल्यामधु
कुल्यास्तृक्षरान्त इत्यत्रापि नैकस्यैकान्वयोपगमे ज्ञाते छिनयभंगप्रसंगात् विकल्पेष्टदोषाद्ध। एकस्य कार्यस्य नियोज्याकांक्षापां सकरणार्थवादोपस्थितफलकामएक

५ एव नियोऽयः स्त्रीकृतस्तथापीति। अथानुत्पन्नब्रह्महत्यादिपातकायस्तत्पूतत्वरूपफलबाधात् ततकामनाविरहेणानधिकारः स्यादिति चेत् उक्तयुक्त्यासमुच्चितफलसिद्धे
रनन्यथासिद्धार्थवादबलेन संदिग्धपापध्वंसकामायाएवाधिकारो मंगलवत्सति तज्जन्मान्तरीये तादृशि पातके संसर्गे कृते वा ध्वंसोपि जायते असति तु तथा प्रतियोगिरूपसहका
रि विरहात् निर्विघ्नस्य कृतमंगलवत् महादाननिर्णयोप्येवं एवं दशहरादावपि अतएव विश्वामित्रेणापापसंदेहेपि प्रायश्चित्तं उक्तं यथा कृच्छ्रचांद्रायणादीनि शुद्ध्यभ्युद
यकारणं। प्रकाशे च रहस्ये च संसयेनुक्ते केस्फुटे। अनुक्ते अतिपातकाद्यष्टान्यतमत्वेन विशेषतोऽनुक्ते प्रकीर्णक इति यावत्। अस्फुटे अज्ञाते। वस्तुतस्तु मिलितफल
दानयोग्यानामपि श्राद्धादिकर्मणां प्रत्येकफलसंपादकत्वं तथा च ग्रंथैतन्मतः। श्राद्धशब्दं कर्म प्रोवाच प्रजानिः श्रेयसार्थमित्यापस्तंबोक्तविशिष्टफलानर्थि
नः केवलरागिनः केवलमुमुक्षारपि प्रत्येकसिद्धेः सांगवैदिककर्मणा इष्टसंपादकत्वनियमात् तथा च मार्कण्डेयपुराणं। पितृन्नमस्ये दिवि ये च मूर्त्ताः स्वधाभुजः ४ श्रु
काम्यफलाभिसंधौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येनभिसंहितेषु। अनभिसंहितेषु काम्यफलष्विति शेषः। अतएव गृह्यपञ्जे वृद्ध्यायुः पुष्टिकामो वे
ति समस्तपदोपात्तानामपि प्रत्येकमपि कामना संबंध इति भूपालः। एवं च ऋग्भ्यां प्राप्नोति व्रीहियवगोधूमकल्पितं हविः। प्रजुहुयात् लक्षमवासरे एकविंश
ताविति बौधायनवचनेतिलादीनासंभवे समुच्चयः असति विकल्पः इति कर्मविपाके विश्वेश्वरभट्टाः। एवं च समाधिना त्यक्तदेहस्य मुक्तस्य ध्रुतराष्ट्रस्य परोटजा
ग्निना देहदाहकाले तत्पत्न्या गांधार्या अग्निप्रवेशदर्शनात् इदानीं गंगादिमृतस्य मुक्तस्यापि पत्युस्तत्पत्न्याः सहमरणं संगच्छते तदुक्तं श्रीभागवते॥ दह्यमानेऽग्नि
भिर्देहे पत्युः पत्नी सहोटजे। बहिः स्थिता पतिं साध्वी तमग्निमनुवेक्ष्यति। अनुवेक्ष्यति अनुप्रवेशं करिष्यति इति युधिष्ठिरायनारदस्य कथनं। दयितं यान्यदेशस्थं मृ

तं श्रुत्वा पतिव्रता । समारोहति शीघ्रमग्नौ तस्याः सिद्धिं निबोधत इति व्यासवचनादिना सहमरणानुमरणयोर्निरवकाशेन नैमित्तिककाम्यत्वेन मलमासादावपि कर्त्तव्यतां नै
मित्तिकानि काम्यानि निपतन्ति यथा यथा । तथा तथैव कार्य्याणि न कालस्तु विधीयते इति वचनात् ॥ ० ॥ तदित्थं प्रयोगः ॥ ० ॥ पुत्रादिना स्वगृह्योक्तविधिनाग्नौ दत्ते ज्वलितायां
भर्त्तृचितायां सहगन्त्री साध्वी स्नाता परिहितधौतवासा युगा कुशहस्ता प्राङ्मुखी उदङ्मुखी वा दैवेन तीर्थेन ताम्रपात्रे तिलजलकुसुमकुशयवमादाय ॐ तत्सदिति ब्राह्मणो
च्चरिते नारायणं नमस्कृत्य नमोद्यामुके मास्यमुकपक्षेऽमुकतिथौ अमुकगोत्रामुकादेवी अरुन्धतीसमाचारत्वपूर्वक स्वर्गलोकमहीयमानत्वमानवाधिकरणक लोमस
म संख्याब्दावच्छिन्नस्वर्गवासभर्तृसहितमोदमानत्वमातृपितृश्वशुरकुलत्रयपूतत्वचतुर्दशेन्द्रावच्छिन्नकालाधिकरणकाप्सरोगणस्तूयमानत्वपतिसहितक्रीडमान
त्वब्रह्मघ्नकृतघ्नमित्रघ्नपतिपूतत्वकामा भर्तृज्वलच्चितारोहणमहं करिष्ये । अनुमरणे तु भर्तृज्वलच्चितारोहणमित्यत्र ज्वलदग्निप्रवेशेन भर्त्रनुमरणमिति संकल्प्य अ
ष्टौ लोकपाला आदित्यचन्द्रानिलानलाकाशभूमिजलहृदयावस्थितान्तर्यामिपुरुषयमादिनरात्रिसन्ध्याधर्मा यूयं साक्षिणो भवत ज्वलच्चितारोहणेन भर्तृशरीरानु
गमनमहं करोमीति । अनुमरणे तु भर्तृशरीरानुगमनमित्यत्र भर्त्रनुमरणमित्युच्चार्य्य चिताग्निं त्रिः प्रदक्षिणीकृत्य ॐ इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा संविशन्तु
अनश्रवो अनमीवाः सुरत्नाः भरणा आरोहन्तु जनयो निमग्नेरित्यपि ऋग्वेदोक्तमंत्रे । ॐ इमाः पतिव्रताः पुण्याः स्त्रियो यायाः सुशोभनाः । सह भर्तृशरीरेण संविशन्तु विभा
वसुमिति पौराणिके च ब्राह्मणेनाश्राविते नमो नम इत्युच्चार्य्य ज्वलच्चितां समारोहेत् । आपस्तम्बः । चिताभ्रष्टा तु या नारी मोहाद्विचलिता भवेत् प्राजापत्येन शुद्ध्येत्तु तस्माद्धि
पापकर्मणः । पाश्चात्य निर्णयामृते स्मृतिः ॥ एवं चितां समारूढौ दम्पती निधनं गतौ । पृथक्श्राद्धं तयोः कुर्य्यादोदनं तु पृथक्पृथक् ॥ विद्याकरधृता स्मृतिः । एकाहेन मृता

5 नांतु बहूनामथवा द्वयोः। तं च राशिपरां कृत्वा पृथक्श्राद्धं प्रवर्त्तयेत्। यत्तु यदा नारी विशेदग्निं स्वेच्छया स्वामिना सह। आशौचमुदकं तस्याः सह भर्त्रेति निश्चितं। तिथ्यन्तरमृ
तायान्तु पृथक्श्राद्धं न विद्यते॥ इति चतुर्भुजभट्टाचार्य्यधृतयमवचनात्॥ भिन्नतिथिमृतायाऽपि पत्युर्मृततिथौ श्राद्धमिति हरिदासभट्टाचार्य्याः। तन्न अस्य वचनस्या
मूलत्वात् समूलत्वेपि श्राद्धपदं पुरकपिंडपरं। एकोद्दिष्टं मृताहनीति विधिवचनविरोधात्॥१०॥ अथाशौचसंकरः॥ ननु अंतर्दशाहे स्यातां चेत् पुनर्मरणजन्मनी। तावत्
स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमित्यनेन पराजातस्य पूर्वजातसमानकालीनाशौचस्य संकोचं विनाशुद्धेरजन्यत्वात् यथा समानाशौचं प्रथमं प्रथमेन समापयेत्। न
असमानं द्वितीयेन धर्म्मराजवचो यथा। प्रथमार्द्धपतितं सजातीयाशौचं प्रथमेन समापयेत्। अत्र प्रथमार्द्धपतितेन विशेषोऽघवृद्धिमदाशौचविषयः। अघवृद्धिमदा- ५
शौच मूर्द्धं चेत्वेन शुद्ध्यति। अथ चेत् पंचमीं रात्रिमतीत्य परतो भवेत्। अघवृद्धिमदाशौचं तदा पूर्वेण शुद्ध्यतीति कूर्म्मपुराणवचनात्। एकस्मादशौचजन्मनस्तूर्द्धं
परतः तुल्यवत् शास्त्रे व्यवहार इति न्यायात् तेनाशौचकालमध्ये यद्यघवृद्धिमदाशौचं तदा तेनाघवृद्धिमता द्वितीयाशौचेन शुद्ध्यतीति तस्यापवादमाह अथ चेदिति
परतोऽशौचकालावधः। प्रातिलोम्येन पंचमीं रात्रिमतिक्रम्य यदा भवति पूर्वाशौचप्रथमार्द्धे इति यावत् तदा प्रथमेन शुद्धिः शंखवचनैकवाक्यत्वात् अन्यथा क्रमिक
परतस्यातीत्वेत्यनेन लब्धत्वात् परत इत्यस्यानर्थक्यापत्तेः। तथाच देवलः। परतः परतः शुद्धिरघवृद्धौ विधीयते। स्याच्चेत् पंचतमादह्नः पूर्वेणाप्यतु शिष्यते। पंचतमा
दह्नः परतोऽघवृद्धौ शेषाहासमाप्याशौचान्तरपाते सति परतोन्नितियाशौचापगमात् शुद्धिः पंचतमादह्नः पूर्वेनाघवृद्धौ सत्यां पूर्वाशौचापगमे शुद्धिः। अघवृद्धिमतत्त
न्तु सपिंडजननाशौचापेक्षया स्वपुत्रजननाशौचस्य सपिंडमरणाशौचापेक्षया पितृमातृभर्तृमरणाशौचस्य च यतः स्वपुत्रजनने स्नानात्पूर्वमंगास्पृश्यत्वमन्यत्र तु न तथा-

मातापितृभर्तॄणां महागुरुत्वात् तेषां मरणे द्वादशरात्रमक्षारलवणान्नासनं सपिंडमरणे तु त्रिरात्रं यथा कूर्मपुराणे। सूतके तु सपिंडानां संस्पर्शो नैव दुष्यति। सूतकं सूतिकां चैव
वर्जयित्वा नृपं पुनः। सूतकं पितरं सूतिकां मातरं नृणां सस्पर्शकर्तॄणां संवर्त्तः। जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते। माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः। शुद्ध्येत्स्पर्श
मात्रे उत्तरवाक्ये तथा दर्शनात् सपिंडमरणं प्रकृत्याश्वलायनः त्रिरात्रमक्षारलवणान्नाशिनः स्युर्द्वादशरात्रं महागुरुष्विति। महागुरूनाह विष्णुः त्रयः पुरुषस्यातिगुरवो भवन्ति
मातापिताचार्यश्चेति। आचार्यास्तु उपनीय ददद्वेदमाचार्य्यः स उदाहृतः। इति याज्ञवल्क्योक्तास्तन्मरणे त्रिरात्राशौचस्य श्रुतत्वेनैतादृशनियमः। पत्युर्महागुरुत्वमाह रामायणे
नातो विशिष्टं पश्यामि बांधवं वै कुलस्त्रियाः। पतिर्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च। शातातपः। गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः। पतिरेको गुरुः स्त्रीणां सर्वत्राभ्यागतो गु-
रुः एकपदेन दत्तस्त्रीणां पितृमातृव्यावृत्तिः अत्राशौचस्याघवृद्धिमद्विशेषणे न तद्राहितेऽप्याशौचमात्रे पूर्वापरार्द्धि पतितत्वेन व्यवस्था मैथिलोक्ता हेया। अत एव नवमदिनाभ्य
न्तरपातिनि तुल्याशौचे तु प्रथमेन समापनं बौधायनेनोक्तं। यथा। अथ चेद्दशरात्राः सन्निपातयुर्वाद्यं दशरात्रमानवमाह्निवशादिति दशरात्राइति। शुद्ध्येद्विप्रो दशाहेन द्वादशा
हेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यति इति मनूक्तस्वस्वजात्युक्ताशौचपरं। आनवमादिति तत्तदुपान्त्यदिनपरं। एवं पंचमीनित्यपि स्वस्वजात्युक्ताशौचार्द्धपरं
समानाशौचं प्रथमे प्रथमेन समापयेदित्येकवाक्यत्वात्। असमानमिति असमानं पूर्वजातं जननाशौचं द्वितीयेन मरणाशौचकालेन समापयेत्। सूतके मृतकं चेत्स्यान्मृतके
सूतकं तथा। मृतेन सूतकं गच्छेन्नेतरत् सूतकेन तु। इति लघुहारीतवचनैकवाक्यत्वात्। एवं च यदि जननस्य परभाविना मरणेन समापनं तदाल्पकालीनस्यापि पूर्वभाविना
दीर्घकालेन स्तुतरां समापनं शंखवचनस्य समानं। लघुत्वाशौचमिति पारिजातपाठे स्तुतरां तथैवार्थः। विष्णुः। जननाशौचमध्ये तु यद्यपरं जननं स्यात्तदा पूर्वाशौचव्यपगमे शुद्धिः

6 रात्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेण मरणाशौचमध्येज्ञातिमरणेप्येवमिति रात्रिशेषे इति पुंनपुंसकयोः शेषइत्यमरसिंहोक्तेः। शेषशब्दस्य त्रिलिंगत्वात् स्त्रीलिंगविशेषणत्वेना
पि न स्त्रीलिंगता तेन रात्रिः शेषोऽवशिष्टा यत्र तत्राशौचान्तदिनइत्यर्थः। अहःशेषविरात्रकमिति आनवमाद्दिवसादित्याभ्यामेकवाक्यत्वात्। प्रभाते तद्दिवसोत्तरप्रभाते अरुणोद
यात्प्रभृति सूर्योदयात्प्राक्काले प्राप्तायां तु सवितर्य्युद्भास्करे तु दिने तथा इति विष्णुधर्म्मोत्तरवचनात् उदयमाह गृह्यसंग्रहे रेखामात्रं च दृश्यत रश्मिभिश्च समन्वितं। उदयं तं विजा
नीयाद्धोमं कुर्य्याद्विचक्षणः। अत्र सर्वैर्निबन्धृभिर्दशमदिनादाधिकेन दिनद्वयेनइति व्याख्यानात् दिनद्वयेन पूर्वाशौचस्यापि समापने अन्यथा पराशौचकालत्वे स्वनिमित्तावध्येव
दिनद्वयं स्यात् न च विध्यनुवाद वैरूप्यान्नान्यदिनपरिग्रहे इति वाच्यं। दिनद्वयस्य पराशौचमात्रकालत्वेन प्रागप्राप्तत्वेन दशमदिनस्यानुवादानुपपत्तेः। किंतु पूर्वाशौचकालत्वेना
न्त्यदिनमादाय दिनद्वयाशौचविधानेऽन्त्यदिनस्य पूर्वाशौचकालत्वेन प्राप्तत्वात्तदंशेऽनुवादकत्वं अपरदिनस्य चाप्राप्तत्वात्तदंशे विधित्वमिति विध्यनुवादवैषम्याद्दधिकेने
ति व्याख्यानं संगच्छते न च पूर्वाशौचव्यपगमे दिनद्वयेनेति व्याख्यानान्न तथात्वमिति वाच्यं मरणाशौचदशमदिने मृतस्य तद्दिने प्रेतोदकदानं न स्यात् तस्य स्वाशौचविधानात्। य
था विष्णुः। यावदशौचं तावत् प्रेतायोदकं पिंडमेकैकं च दद्युरिति पूर्वाशौचव्यपगमे इत्यस्यान्वयःकल्पने मानाभावाच्च मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निना। दाहादूर्द्ध्वमशौ
चं स्याद्यस्य वैतानिको विधिरिति शंखोक्तस्य निमित्तीभूतमरणस्य सत्त्वे नैमित्तिकाशौचावश्यंभावस्य बाधापत्तेश्च वैतानिकः श्रौतहोमः अग्निपदमपि तदग्निपरं तेन निरग्नेः
स्मार्त्ताग्नेश्च मरणादवाशौचं तस्माद्दशमदिनजातं परनिमित्तं स्वावध्येवादनिर्दशौचजनकं दिनद्वयेनेति पूर्वाशौचं वर्द्धयते पराशौचस्य ह्रासकं। अन्यथाकल्पनागौरवं
स्यात् अथवान्तर्दशाह इति मनुवचने दशदिनपातिनोपि यावत्तस्यादनिर्दशमित्यनेन दशमदिनसमाप्यत्वाभिधानात् रात्रशेषे दिनमित्यादिकं विरुद्धेतेति अनिर्दशपद॰ ६ श्री

पूर्वाशौचनाशोपलक्षणमिति वाच्यं। तथा चरविशेषे चेदधिकदिनक्षयेनैव नश्यतीत्यनिर्देशान्नित्यस्यैव विवरणं तच्छेषइति प्राहुः। अतएव पूर्वाशौचान्तदिनकृत्यमपि द्वादशदिने क्रियते।
तत्कारणादेव च शुद्धिः। तथा चादिपुराणे। यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः। स तस्य वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि। समाप्य दशमं पिंडं यथाशास्त्रमुदाहृतं। ग्रामाद्वहिस्त
तो गत्वा प्रतस्पृष्टे च वाससी। अंत्यानामाश्रितानां च मुक्त्वा स्नानं करोत्यपि। श्मश्रुलोमनखानां च यत्त्याज्यं तज्जहात्यपि। गौरसर्षपकल्केन तिलतैलेन संयुतः। शिरःस्नानं ततः कृ
त्वा तोयेनाप्यम्यवाग्यतः। वासोयुगं नवं शुभ्रमव्रणं शुद्धमेव च। गृहीत्वा गांस्तु वर्णं च मंगलानि शुभानि च। स्पृष्ट्वा संकीर्तयित्वा च पश्चाच्छुद्धो भवेन्नरः। पश्चिमं त्विहः अशौचान्ति
मदिनं। गृहशुद्धिः प्राक्तनपाकभांडत्यागः तन्हेपादिनान्यान्यत्यागार्हं यत्तदा त्यज्यत इत्यर्थः। यथा मिताक्षरायां मुंडयेत्सर्वगात्राणि कक्षोपस्थशिखां वहिः। क्रममाहवराहपुराणम्।
श्मश्रुकर्म कारयित्वा नखच्छेदमनन्तरं। गोभिलः॥ केशश्मश्रुलोमनखानि वापयीत शिखावर्ज्यं अशौचाधिकारे। आपस्तंबः। अनुभाविनां च श्वाशौचमवभवतां सुप्त
केशनखश्मश्रुदांतः शुक्लांबरः शुचिः इति मनूक्तप्रायमंडनानां समाहृत्तानामपि सर्वाशौचमुंडनं यत्पुनरापस्तम्बः। न समाहृत्ता वपेयुरन्यत्र वीहरेदित्येके अथापि ब्रा=
ह्मणां त्रिषरिक्तो नपिहितः तस्यैतदपिधानं यत् शिखाइति। केचिदाचार्या मन्यन्ते वीहारादृशिपौर्णमासांगयोगविशेषात् अन्यत्र समाहृत्ता गृहस्था न वपेयुः। तत्र प्रमाणं
अथापीति ब्राह्मणं मंत्रेतरभेदभाग इति माधवाचार्यः। एष गृहस्थः अनपिहित आवरणशून्यः सन् रिक्तस्तुच्छो भवतीति यं तस्य या शिखा तदेवापिधानं तेन वीहारादिं
विना नगृहस्थः शिरो मुंडयेदित्येकेषां मतं तत् काम्यपरं। यथा दानधर्मे। केशश्मश्रुधारयतामग्र्या भवति सन्ततिः। एवं केशश्मश्रुनखधारिणामशौचेपि पितृमातृमर
णएव मुंडनं यथा विष्णुः। प्रयागे तीर्थयात्रायां पितृमातृवियोगतः। कचानां वपनं कार्यं वृथा न विकचो भवेत्॥ अतएवादिपुराणे यत्त्याज्यमित्युक्तं। मंगलान्यादर्शघृतप्र

7 मतीनि शुभानि दोषरहितानि पिंडदानमंत्यजेभ्यो वासोदानं चाद्यक्रियाधिकारिणः। अन्यत्सर्वमशौचिमाचस्य परदिने स्नानगवादिस्पर्शब्राह्मणस्वस्तिवाचनैर्विनाप्यशौच
स्थितिः। तथा च देवलः। अथाहः सुनिष्टप्तेषु सुस्नाताः कृतमंगलाः। आशुच्याद्विप्रमुच्यन्ते ब्राह्मणान्स्वस्तिवाच्य च। अस्य वक्ष्यमाणव्याख्यानात् सर्वं स्फुटीभविष्य
ति मंगलान्याह नारदः। लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः। हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः। एतानि सततं पश्येन्नमस्येदर्चयेच्च यः। प्रदक्षिणं च कुर्वी
त तथा चायुर्न हीयते। अभिप्रेतार्थसिद्धिर्मंगलं तद्धेतुतया ब्राह्मणाद्यपि। गोप्रणामो ब्रह्मपुराणे। सदा गावः प्रणम्यास्तु मंत्रेणानेन पार्थिव। नमो गोभ्यः श्रीमतीभ्यः सौरभेयी
भ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। मंत्रस्य स्मरणाद्देव गोदानफलमाप्नुयात्। भविष्ये। गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणं। प्रदक्षिणीकृता तेन स ७ 23
प्तद्वीपा वसुंधरा। गवामस्थि न लंघेत मृते गंधं न वर्जयेत्। यावदाघ्राति तद्गन्धं तावद्गन्धेन युज्यते। विष्णुः। गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च रोचना। षडंगमेतन्मंगल्यं पवित्रं
सर्वदा गवां। षडंगं षट्प्रकारं। अत्र वैदिककर्मानर्हत्वप्रयोजकसंस्कारविशेषरूपमशौचं। वैदिककर्मार्हत्वप्रयोजकसंस्कारविशेषरूपं शौचं न चाशौचाभाव एव
शुद्धिर्न संस्कार इति वाच्यं। अघानां योपपद्ये त्विति न वर्द्धयेदघाहानीत्येताभ्यामशौचे पापपर्यायाघपददर्शनात् शौचस्यापि भावरूपताप्रतीतेः। तदहरिति आच्छिन्न
नाडीपर्यन्तपरं तथा च दानदर्पणे वराहपुराणं। यावत्कालं सुते जाते न नाडी छिद्यते पुनः। चंद्रसूर्योपरागेण तमाहुः समयं समं। कृत्यचिन्तामणौ देवलः। पुत्रे जाते
पिता श्रुत्वा सचेलं स्नानमाचरेत्। ब्राह्मणेभ्यो यथाशक्ति दत्वा वालं विलोकयेत्। एतेन सुतकेतु मुखं दृष्ट्वा जातस्य जनकस्ततः। कृत्वा सचेलं स्नानं तु शुद्धो भवति
तत्क्षणात्। अन्याश्च मातरस्तत्र कृत्तगृहं न व्रजन्ति चेत् इत्यादिपुराणवचने मुखं दृष्ट्वेति विशेषणात् पुत्रजन्मनि पितुर्यत्स्नानमुक्तं तन्मुखदर्शनानन्तरमेवेति

हारलतोक्तं हेयं एवं हि विदेशस्थस्य पितुः पुत्रजन्मश्रवणे तन्मुखदर्शनार्थ्यं गास्पृश्यत्वं स्यात् किन्त्वादिपुराणां । मुखदर्शनानन्तरं पुनःस्नानार्थं अत्रान्याश्चे
तिचकारेणाभ्युच्चइति । प्राप्नोतद्वदिति पितृत्वस्यार्थं तेनयथापितुःस्नानादस्पृश्यत्वनिवृत्तिः सूतिकास्पर्शे तत्समकालास्पृश्यत्वं चमातुरेवसूतकं तांस्पृशतः पितुर्ने
तरेषामितिसुमन्तुवचनात् तत्रसूतकमस्पृश्यत्वं तथासूतिकासपत्नीनांज्ञेयं । अतस्तत्र गृहगमनं तत्स्पर्शे नोपलक्षणं तास्तु मातृपदप्रयोगोपेतदर्थकइति अत्र मातुरेवे
त्येवकारेणान्येषां बालकादीनांस्पृश्यतासदाप्रतीयते । ततश्चअतऊर्ध्वं मसमालंभनमादशरात्रादिति गोभिलसूत्रेणनाडीच्छेदात्परतोमातुरंगास्पर्शाभावोदशरा
त्रावधिः प्रतीयते । तेनचमाताशुद्धा दशाहेनस्नानातुस्पर्शनेपितुरित्यनेन प्राप्तस्यमातुरंगास्पर्शस्यनाडीच्छेदोत्तरत्वमप्राप्तं विधीयते लाघवदन्यथाश्रुतिकल्पना
पत्तेः । एवंचनाडीच्छेदात्प्रांमातुस्पर्शेदोषाभावः । एवमेवमदनारायणाचरणाः । गर्गः श्रुत्वापुत्रस्यवैजन्मकृत्वावेदोदिताः क्रियाः । अच्छिन्नं नालंपश्येतुंदत्त्वारूफ
लान्वितं । रागप्राप्तदर्शनेपि पुन्नाम्नोनरकाद्यस्मात्त्रायतेपितरंसुतः । मुखसन्दर्शनेनापितदुत्पत्तौयतेतमः । इतिहृदयस्यत्युक्तं नरकनिस्तारायच्चणानस्मिन्नृणंनयति
अमृतत्वंचविंदति । पितापुत्रस्यजातस्यपश्येतुजीवितोमुखमिति । वशिष्ठोक्तफलायचयत्पश्येदिति नियमाभिधानं तदकृतपुत्रकार्य्यपुत्रपरं । सत्यच्चस्तु मुखद
र्शनं विनापिनरकनिस्तारकं । तथाचविष्णुपुराणं । सतपुत्रेणतुजातेनयेनोपित्रिदिवंययौ । पुन्नाम्नोनरकात्त्रातः सतेनसुमहात्मना । तेनसत्पुत्रेणमृतवेणादक्षिणाह
स्तमन्थनजातेनपृथुनाब्रह्मपुराणोपिसमुत्पन्नेनभोविप्राः सत्पुत्रेणमहात्मना । एते सपुरुषव्याघ्रः पुन्नाम्नोनरकात्तदा । पिंडदातृत्वमात्रेणैवानृण्यमाहुः । शंख

४ लिखितपैठीनसयः। यत्रक्वचनजाते नपितापुत्रेणान्नं ददाति। तेन चानन्ततां याति पितॄणां पिंडदेनेवे। विष्णुधर्म्मोत्तरेपि। देवानां च पितॄणां च ऋषीणां च तथानरः। ऋणवान
जायते यस्मात्तन्मोक्षे प्रयतेत्सदा। देवानामनृणो जन्तुर्यज्ञैर्भवति मानवः। अनन्तवित्तः पूजाभिरूपवासव्रतैस्तथा। श्राद्धेन प्रजया चैव पितॄणामनृणो भवेत्। ऋषीणां ब्रह्म
चर्य्येण श्रुतेन तपसा तथा। पुन्नाम्नो नरकाद्यस्मादित्यादिकन्तु पुत्रोत्पत्तिस्तावकं न चातद्रूपस्य पुत्रत्वाभावपरं। दशास्यात्पुत्राणाधेहीति श्रुतौ बहवः स्युर्यदा पुत्रा इत्यादि-
स्मृतौ चौरसमात्रे पुत्रपदप्रयोगात्। अन्यथा श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत्सदा। इति जाबालोक्तस्मृति प्राप्तं श्रुतेर्बलत्वं वा
ध्येत क्षेत्रजातु पुत्रपदं गौणमेव क्षेत्रजादीन सूतानेतानेकादश यथोदितान। पुत्रप्रतिनिधीनातुः क्रियालोपान्मनीषिणः। इति मनूक्तेः। कनकं वा सकेनापि धारणी
यं सर्वरत्नपवित्रदेवतात्मकत्वात्। तथा च रामायणे महाभारते च। परशुरामं प्रति वशिष्ठवचनं। सर्वरत्नानि निर्म्मथ्य तेजोराशि समुत्थितं। सुवर्णमेभ्यो विप्रेन्द्र रत्नंप ट ३
रमुत्तमं। एतस्मात्कारणाद्देवगंधर्वोरगराक्षसाः। मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत्। तथा तस्मात्सर्वपवित्रेभ्यः पवित्रं परमं स्मृतं। तथा अग्निर्वै सकला
देवाः सुवर्णं च तदात्मकं। तस्मात्सुवर्णं ददताददत्ताः स्युः सर्वदेवताः। तस्मात्पादादौ न धार्य्यं देवतात्मकत्वादिति प्रसंगादुक्तं विष्णुधर्म्मोत्तरे। सूतिकावासनि
लयाजन्मदानामदेवताः। तासां यागनिमित्तार्थं शुद्धिर्जन्मनि कीर्त्तिता। षष्ठेह्नि रात्रियागन्तु जन्मदानं च कारयेत्। अत्र यागनिमित्तार्थमित्युपादानात् तत्कर्म्मण्ये
व शुद्धिर्नान्यस्मिन अत्र कारयेदित्यन्यगोत्रजाभिप्रायेण तथान्याशौच मध्येपि जातकर्म्म षष्ठीपूजे कर्त्तव्ये तथा च मिताक्षरायां परिशेषखंडे प्रजापतिः। अशौचे-

तुसमुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचाद्विशुद्ध्यति। अत्र पुत्रजन्मेति श्रुतेः। शूद्रस्याप्यधिकारः एवं षष्ठदिनकृत्येपि पुत्ररक्षायाः कर्त्तव्यत्वा
त्। अतः प्रागुक्तादिपुराणेषु। द्विजन्मनामित्युपलक्षणं। ततश्च शुद्ध्यशुद्ध्योः संस्काररूपत्वस्यैकपुरुषस्यैकदोभयस्थितिर्घटते। अशुद्धेर्भावरूपत्वे शुद्धेस्तदभावरूपत्वे
तु नैवं विरोधात् अत एव शंखः। ततः श्राद्धमशुद्धौ तु कुर्यादेकादशे तथा। कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः। अशुद्धौ चतुर्थाहादौ कथमशुद्धौ श्राद्धं
कालशौचाधिकरणाशौचस्याधिकारिविशेषणत्वादित्याह कर्त्तुस्तात्कालिकी शुद्धिरिति। श्राद्धविधानात्सेपात्तन्मात्रनिष्ठा शुद्धिः कल्प्यते स पुनरशुद्ध एव क
र्मान्तर इति श्राद्धविवेकः। एवं शुद्धेर्भावरूपत्वे अशौचस्य तदभावरूपत्वे विरोधः। तथात्वे अशौचशंकरोपि न स्यात् एकस्मिन्नशुद्धभावरूपे शौचे सत्यपरस्य
तद्रूपस्य तदानीं शुद्धिरूपप्रतियोग्यन्तराभावादनुत्पत्तेः तस्मात् शुद्ध्यशुद्ध्योर्भावरूपत्वं। यदा तु सपिंडमरणाशौचदशमदिने अपरसपिंडस्य मरणे पूर्वाशौचस्य दि
नद्वये हृद्यापादशदिने एकादशदिने वा पित्रादिमरणं तदा पूर्वाशौचपादशाहेन वहुकालव्यापिना गुरुणा लघुकालव्यापिनः परताशौचस्य शुद्धिः। अघाना-
योगपद्ये तु ज्ञेया शुद्धिर्गरीयसा इति देवलवचनात्। अत्र च प्रथममृतपितृकेण एकादशाह एव कृत्यं कर्त्तव्यं पराद्धपतितद्वितीयमरणप्रतियोगिपितृकेन पि
त्रमरणावध्येकादशाह एव कृत्यं। वृद्धिभूतदिनद्वयाभ्यन्तरमरणप्रतियोगिपितृकेण पूर्वमृतत्रयोदशाह एव कृत्यं कर्त्तव्यं। सपिंडमात्रेणात्तु पूर्वमृतत्रयोदशाह
एव कृत्यं कर्त्तव्यं। प्रथममृतपितृकेण तु एकादशाहादि मृतस्य तदवधि दशाहाशौचमेव कर्त्तव्यमिति पूर्वाशौचपराद्धमृतपितृकस्य द्वितीयाशौचनिहन्तिकालए

९ वशुद्धिः परतः परतःशुद्धिरघट्टोद्धो विधीयते स्याच्चेत्पं चतमादहः पूर्वेणाप्यनुशिष्यते इत्यत्र परत इति अवधारणार्थत्वात् अन्यथा वैयर्थ्यात्। एवं पूर्वार्द्धे निमित्तान्तरपा
ते परार्द्धे उभयोर्ज्ञाने गुरुणः परनिमित्ताशौचस्यापि पूर्वनिमित्ताशौचकालेनैव शुद्धिः विगतन्तु विदेशस्थमिति वक्ष्यमाण वचनात्। अथ सर्वस्मृति प्रवत्तमनुस्मृता वन्त
र्दशाहइति श्रवणात्। यदि निमित्तस्य मरणादेः कालमध्ये निमित्तान्तरमुत्पद्यते तदा पूर्वनिमित्तकालमात्रमशौचं ततश्च कालद्वारा निमित्तयोगपद्यमेवाशुद्धिप्रयाज
कं न तु नैमित्तिकाशौचद्वारा यौगपद्यमपि इत्थं च पूर्वनिमित्ते ज्ञाते ज्ञाते वा परनिमित्तं पूर्वनिमित्तकालादुपरिस्थावधिदशाहाभ्यन्तरे श्रुतमपि नाशौचं जनयति तस्य तत्
कालीनाशौचं प्रत्यनिमित्तत्वात् इत्थं चाश्रुतपूर्वनिमित्तस्य तत्कालमध्यपाति द्वितीयनिमित्तश्रवणे यत्तेद्वध्यशौचाचरणं तद्भ्रान्त्यैवेत्याहुस्तत्त्विन्त्यं मरणादिसंबंधि २
त्वेन सर्ववर्णसाधारणकालस्य बोधकाभावादशौचान्तर्भावेनैव तद्बोधनं अत एव मनुनैव। न वर्द्धयेदघाहानीत्युक्तं ततश्च मरणादिसंबंधिश्च स्वाशौचापरं द
शाहपदमवश्यं वाच्यं ततश्च लाघवात् स्वव्यापारत्वाच्चाशौचद्वारैव निमित्तानां संकर्ष्यं फलोपधारकं वक्तव्यं अशौचरूपव्यापारानुबंधेन प्रथमस्यापि जनना
देस्तदासत्वात् तथा च शंखः। समानाशौचं प्रथमे प्रथमेन समापयेदिति। एतच्चाशौचशांकर्ष्यं। वक्ष्यमाणोशनो वचने स्फुटी भविष्यतीति अत एव संवैर्निबन्धृ
भिर्यथाशौचशंकर इति प्रतिज्ञायां निर्दिश्यते इति। अन्तर्दशाहकालोपादानन्तु तत्कालाभ्यन्तरस्याशौचशांकर्यार्थं न तु तदनन्तरं स्नानादेः प्रागशौचशांक-
र्यार्थं एतत् पश्चादपि स्फुटी भविष्यति यत्र तु पूर्वं ज्ञातं निमित्तं पश्चाज्ज्ञातं पश्चाज्ज्ञातं च पूर्वं ज्ञातं तत्र निमित्तज्ञानाशौचपौर्वापर्य्यं मरणादिष्विवाशौचस्वरूपयोग्यनि

मित्तकालपौर्वापर्यादेवाशौचव्यवहारार्थं चेति। जननं मरणान्तदशाहाद्यशौचं प्रतिस्वरूपसन्निमित्तं। फलोपधायकं तत्त्वदवधारणं। अपि दातृगृहीत्रोश्च सूतके सति
र्वांतरा। अविज्ञातेन दोषः स्यात् श्राद्धादिषु कथंचन। विज्ञाते भोक्तुरेव स्यात् प्रायश्चित्तादिकं क्रमादिति ब्रह्मपुराणात्। यदा त्वशौचं स्वीयं दाता न जानाति भोक्ता जानाति
तदा लोभाद्ज्ञानस्य भोक्तुः प्रायश्चित्तं अशौचस्तु दातृतुल्यं तच्च क्रमाद्दशौच कालोत्तरकालकर्त्तव्यमित्यर्थः। एवञ्च श्रुत्वा देशान्तरस्थेष्व जननमरणोत्थशौच शे
षेणाशुद्ध्यतेति विष्णुवचने शौचशेषेणेत्यस्याशौचयोग्याह शेषेणेत्वर्थो विदेशस्था शौचस्य जातनिमित्तकत्वात्स्वरूपयोग्यत्वं अन्यथाशौचशेषेणेत्यनुपपन्नं स्यात् श्रु
त्वेत्युपादाने च तत्कालमध्ये श्रवणात् फलोपधानं ततश्च पूर्वनिमित्तकाले निमित्तान्तरपाते स्वरूपसत्त्वं कार्यं वृत्तं पूर्वनिमित्तकालाभ्यन्तरे उभयश्रवणे शांक
र्यस्य कार्यं न तु पूर्वनिमित्तकालोत्तरश्रवणेऽपि। किन्त्वश्रुतपूर्वनिमित्तकाले समानं लघु वा निमित्तं जातं पूर्वनिमित्तकालादुपरि स्वकाले श्रुतमशौचं जनयत्ये
व अत एवंभूतविषये यत्त्वद्धशौचाचरणं तद्भ्रान्त्यैवेति यत्किञ्चिदेतत् तन्नस्तु दूरं। तथा त्वे तु पूर्वाशौचकालोत्तरं यत्तद्दिने पिंडदानवृषोत्सर्गादिकृतं परकाले पूर्वजा
तशंकरत्वानेन तस्यायथाकालकृतत्वात् कस्यचित्पुनःकरणप्रसंगः कस्यचिद्वैफल्यं तत्कालीनसन्ध्याद्यकरणनिमित्तप्रायश्चित्तप्रसंगः स्यात् देशान्तरीयाशौ
च निमित्तानन्तरशंकया बहुवित्तव्ययायाससाध्यवृषोत्सर्गाद्यनुष्ठानं च न स्यात् तस्मादविज्ञातेन दोषः स्यादित्यविशेषात् शंकरेऽपि प्रसज्जतीति अत एव वाचस्पति
मिश्रेण प्रथमजनिताद्यसत्त्वेऽपरं निमित्तं जातमपि येन तदानन्तातं तस्य न शंकरः द्वितीयस्य तं प्राति तदापंडत्वात् तस्य क्रमिकं प्रकृतमशौचद्वयमित्युक्तं जनन म

10 रणनिमित्तावधारणांतु मम प्रमास्ताधारणां छंदोगपरिशिष्टमृतभ्रान्त्यापर्णानरदाहे पश्चादागतस्य शान्त्यभिधानात् यथा एवं कृते मृतभ्रान्त्या यद्यागच्छेत्सुमानक
चित्। कुर्य्याद्यथाबुद्धिं त्विष्टिं पुनराधाय पावकं। एतच्च साग्नेर्निरग्निस्तु सामान्यं स्वस्त्ययनं विष्णुपूजादिकं अत एव विष्णुपुराणीयं स्यमंतकोपाख्याने गयंतस्य जी
वतः कथमेतानि दिनानि शङ्काजये व्याक्षेपो भवतीति कृत्वाध्ययनापापकारकामागत्य हृतः कृष्ण इति कथयामासुः। तद्बांधवास्तत्र लोचित मखिलमुपरत क्रियाक
लापंचक्रुः। तथाचास्य पुत्रमानस्यातिश्रद्धादत्तवशिष्टपाथेयपुष्टान्नतोयादिनाद्धस्यावलप्राण पुष्टिरभूदिति एवं स्वरूपयोग्यतामादायैव तथा चेद्दशरा-
त्राः सन्निपातयुगाद्यं दशरात्रमानवमाद्दिवसादिति बौधायनीयेपि दशरात्रासन्निपाताभिधानं संगच्छते अन्यथा प्रथमदिनातिरिक्त फललोपहित दशरात्रत्वेपि स्वरूप
योग्यतया दशरात्रत्वं तेन सदृशं करे पराशौचस्य पूर्वाशौचकालावधिस्थायित्वात् यथा तत्र पूर्णपूर्वाशौचान्त्यदिने पूर्णाशौचनिमित्तान्तरपाते दिनक्षयादिरूपत १०ब
दृक्षामधजाताशौचस्यापि स्थितिस्तथा यत्र सपिंडजननाशौचकालमध्ये सपिंडान्तरजननं तत्र पूर्वजातस्यान्तरा मरणे पूर्वाशौचस्यानिवृत्त्या पराशौचस्यापि निवृत्तिः
न तु परजातस्य तन्मध्ये मरणेपि पूर्वाशौचस्य निवृत्तिः तस्य स्वाधीनस्थायित्वात् एवमेव शुद्धितत्वार्णवे यत्र दशमदिने सपिण्डजननान्तरं भूतं तत्र तद्दिने पूर्वजा
तमरणे सपिंडानां सद्यः शौचं बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति सद्य एव शुद्धिः स्यात् नाशौचं नैव सूतकमिति शंखोक्तेः पूर्वजातमातापित्रोस्तु स्वजात्यु-
क्ताशौचकालेन शुद्धिः। जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः। मातुश्च सूतकं तत्स्यात् पिता त्वस्पृश्य एव चेति कूर्म्मपुराणवचनात्। परजातपितुस्तु स्वपुत्र

जातजन्मावधिपूर्णाशौचकालेन शुद्धिः पराद्धिपतितत्वात्। परजातपुत्रकन्यामात्रस्तु विंशतिदिवसमासाभ्यां शुद्धिः। सूतिकां पुत्रवतीं विंशतिरात्रेण स्नातां सर्वकर्म्मा-
णि कारयेत्। मासेन तु स्त्रीजननीमिति पैठीनस्युक्तेः बहुकालिनाशौचत्वात् पूर्वजातकन्यामरणे तु मातृपितृप्रभृति सपिण्डानां सद्यः शौचं। आजन्मनस्तु चूडान्तं यत्र क-
न्या विपद्यते। सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः। इति ब्रह्मपुराणोक्तेः परजातकन्यामरणे तु पितृसपिंडयोर्वर्द्धित दिनद्वयसहित पूर्वाशौचान्ता देव शुद्धिः। तन्मा-
तुस्तु मासाश्चैव भगित्वात् पूर्वाशौचावधिस्थायित्वाभावेन सद्यः शौचं आजन्मनस्त्विति प्रागुक्तेः। एवं चासमानं द्वितीयेनेति प्रागुक्तशंखवचने यन्मरणास्य शुद्धिहेतुत्व-
मुक्तं तज्जननाशौचकालापेक्षया समानदीर्घकालव्यापकाशौचजनकत्वेबोध्यं। अन्यथा दीर्घकालाशौचस्य स्वकालशुद्धिं प्रति दीर्घकालीनत्वरूपं गुरुत्वं बाधि-
त्वा समानलघुकालाशौचयोस्तु दीर्घकालीनत्वरूपगुरुत्वासंभवेन तद्बाधित्वा मरणमात्रस्य गुरुत्वेन बाधसापेक्षतया विधिद्वैरूप्यापत्तेर्वाक्यभेदः स्यात् तथा च दी-
र्घकालाशौचात् शुद्धिमाह मिताक्षरायामुशनास्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि। न तु पूर्वेण शुद्धिः स्यात् स्वकालेनैव शुध्यति। द्व्याहन्यान्तरे काले प्र-
मिते तस्य वार्धवैः। सा वा शौचं न कर्त्तव्यं सूत्याशौचं विधीयते। इति मिताक्षराधृत वृहन्मनुवचनात्। मातुश्च सूतकं तस्मात् पिता त्वस्पृश्य एव चेति कूर्म्मवचनाच्च।
मरणोत्पत्तियोगे तु गरीयेमरणं भवेत् इत्यस्य मतेन सूतकं गच्छेन्नेतरत् सूतकेन तु इत्यस्य च सामान्यविषयत्वे व्यभिचारः। तथा च जननाशौचमध्ये मरणाशौचे न्यधि-
ककालव्यापकेन जननाशौचेन शुद्धिः कुबेरधृत वृहन्मनुरपि शावस्योपरि शावे तु सूतकोपरि सूतके। शेषाहोभिर्विशुद्ध्येत्तु उदक्यां सूतिकां विना। अत्र शावमात्रस्य

॥ तकमात्राभिधानात्त्रिरात्रादिशंकरेपि पूर्वाशौचशेषाहेन शुद्धिः। एकदिनपातितु त्र्यंमरणाशौचद्वयेयावदशौचंसर्वगोत्रास्पृश्यत्वं यथासर्वगोत्रसंस्पृश्यतत्रस्यात् सू
तकेसति मध्येपिसूतकेदद्यात् पिंडानप्रेतस्यतन्नये। मरणंयदितु त्र्यंस्यात् मरणेन कथंचन। अस्पृश्यं चभवेज्ञोत्रसर्वमेवसबांधवमित्यादि पुराणांगिरोवचनाभ्यां ।
एवंचतदन्तिमदिने जात्यन्तरमरणेन दिनद्वयवृद्धिः किन्तु मरणागुरुनिपातेइति ध्येयं अतएव समानंलघुचाशौचं पूर्वेणैवविशुद्ध्यतीति हारलता। एतेनसजातीयत्र्य
हाशौच शंकरमात्रेऽघवृद्ध्यावशौचंतु पक्षिमेनसमापयेदितियमवचनेनोत्तराशौचव्यपगमात् शुद्धिरितिमिश्रोक्तं निरस्तं। अघवृद्ध्यावित्यस्य प्राग्उक्ताघवृद्धिमदा
शौचविषयकत्वात्। अत्रतुस्नानमात्रोपमेयांगास्पृश्यत्वयुक्तत्रिरात्रस्यैकरात्रांगास्पृश्यत्वयुक्तत्रिरात्रेणागुरुणैवशुद्धिः। अद्यानांयोगपद्येतु ज्ञेयाशुद्धिर्गरीय
सेतिदेवलवचनात् एवंजननमरणत्रिरात्रयोः शांकर्ये मरणत्रिरात्रात्शुद्धिः। मरणोत्पत्तियोगे तु गरीयो मरणंभवेदिति देवलवचनांततादिति उदक्यांसूति ११ शु
कांविनेत्यत्रेदं वीजंउदक्याशौचस्य जननमरणाशौचभिन्नत्वंसूतिकाशौचस्य बहुकालव्यापित्वं अतएव कूर्म्मपुराणे तुल्यकालाशौचमुपक्रम्य मरणात्शुद्धिरुक्ता
यथायदिस्यात् सूतकेसूतिर्मृतकेच मतिर्भवेत् शेषेणैव भवेत् शुद्धिरहः शेषेद्विरात्रकंमरणोत्पत्तियोगे तु मरणात्शुद्धिरिष्यते। शेषेणापूर्वाशौचशेषाहेनग्रहः
शेषेसम्पूर्णाशौचान्तदिने आनवमाद्दिवसादित्येकवाक्यत्वात्। अत्रजननस्यतुल्यकालीनमरणेनशुद्ध्यभिधानात् मनुवचनेपुनर्मरणाजन्मनोत्यत्रपुनःशब्दोम
रणामात्रेसमान्वितोनतुजन्मनापि अव्यावर्त्तकत्वात् जननाशौचतुल्यकालीन मरणाशौचस्यापि गुरुत्वाभिधानांमंगास्पृश्यत्वादिनानैयायिकंनतुवाचनिकंगौरवात्

एतेन मरणासंबन्धि सद्यःशौचादिना दशाहजननाशौचनिवृत्तिः । वाचनिकत्वादिति मैथिलमतमपास्तं । एवमेव हारलतादयः । ततः पुत्रवत्या विंशतिरात्राशौचान्तादि
नेपत्युर्मरणे वा कृत्स्नकालाशौचकालेन यथा शुद्धिः तथा सपिण्डद्वयजननजातद्वादशरात्रान्तदिने पितुर्मातुर्भर्तुर्वा मरणे पूर्वेणैव शुद्धिः । एवमन्यत्र एवं मृतजाते तु अ
जातदन्तमरणस्य स्वल्पकालिनाशौचनिमित्तत्वाज्जननाशौचमेव दशाहं । तथा च मिताक्षरायां पारस्करः । गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत् । दशाहमिति
स्वस्वजात्युक्ताशौचपरं । एतच्च नवमादिमासमृतजातविषयं न तु गर्भस्रावविषयं । अथ स्रावाशौचं ॥ कूर्मपुराणे ॥ अर्वाक्षण्मासतः स्त्रीणां यदि स्याद्गर्भसंस्र
वः । तदा माससमैस्तासामशौचं दिवसैः स्मृतं । पित्रादीनां तु सर्वेषां नैवाशौचं विदुर्बुधाः । अत ऊर्ध्वं तु पतने स्त्रीणां स्याद्दशरात्रकं । सद्यःशौचं सपिण्डानां गर्भस्रावा
च्च वा ततः । गर्भच्युतावहोरात्रं सपिण्डेत्यन्तनिर्गुणे । यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः । दशरात्रकमिति स्वस्वजात्युक्ताशौचकालपरं । तथा चादिपुराणे ॥
षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि । तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते । अत ऊर्ध्वं स्वजात्युक्तमशौचं तासु विद्यते । गर्भस्रावाच्च वा तत इति तच्छ
ब्देन सन्निधानादत ऊर्ध्वमित्युक्तषण्मासोत्तरकालः परामृश्यते षण्मासोपरि सगुणानां सद्यः निर्गुणानामेकाहः अत्यन्तनिर्गुणानां यथेष्टाचरणानां त्रिरा
त्रं एवं च जातमृते मृतजाते वा कुलस्य त्रिरात्रमिति हारीतमिति वचनं यथेष्टाचरणज्ञातिविषयं । जातमृत इति जातदिन एव मरणे त्रिरात्रं तथा हि स्त्रीणां
तु पतितो गर्भः सद्योजातो मृतोथवा । अजातदन्तो मासे वा मृतः षड्भिर्गतैर्बहिः । वस्त्राद्यैर्भूषितं कृत्वा निक्षिपेत्तं तु काष्ठवत् । खनित्वा शनकैर्भूमौ सद्यः +

12

शौचं विधीयते इति ब्रह्मपुराणे । ऊनद्विवर्षपर्य्यन्तं मृत प्रतिपत्तौ विशेषाभावेपि यत्तद्विशेषकालोपादानं तत्तद्विशेषदर्शाचविशेषविज्ञापनाय । एवं च यथा ऽप्रजातदं
न्ता मासैर्वा मृतः षड्भिर्गतैर्वा हिरित्यनेन दन्तजन्मकालस्य षण्मासानन्तरत्वसूचनात् आदन्तजननात्सद्य इति कूर्म्मपुराणे । षण्मासाभ्यन्तरे सद्यः शौचं षण्मासोत्तर
स्त्वन्यदशौचं । तथा सद्यो जातोमृत इत्यत्र सद्य एव जातो जीवन्नुत्पन्नः सद्यो मृतः जन्मसमाने ह्नि मृत इत्यर्थे न जातमृते तद्दिन मरणादेवस प्तमाष्टमासीयस्य त्र्यहाशौ
चं तदुत्तरदिने तु नवममासादिजातमृतवद्वेदितव्यं । एतेन जन्मावधित्रिरात्राभ्यन्तरमरण एव त्रिरात्रमिति निरस्तं प्रमाणाभावात् अत्र विशेषमाह मरीचिः । गर्भश्र
त्यां यथामासमचिरे तूत्तमे त्र्यहं । राजन्ये च चतूरात्रं वैश्ये पंचाहमेव च । अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता । यथामासमिति मासमसंख्यानतिक्रमेण -
यावन्मासीयो गर्भः स्रुतस्तावन्मास समसंख्यानि दिनानीति एष च प्रथमादिषण्मासपर्य्यन्तः अचिरे द्वितीये मासि । तथा च यमः । गर्भमासा अहोरात्रं त्र्यहं वा गर्भसंस्रवे १२ ग
इति अत्र गर्भमाससमसंख्या दिवसाः बहुवचननिर्द्देशात् तृतीयमासात् प्रभृति षण्मासपर्य्यन्तं । अहोरात्रं प्रथममासीयगर्भस्रावे त्र्यहं वेति परिशेषात् द्वितीय
मासीयगर्भस्रावशति मासद्वये तु दिनद्वयात् । षड्रात्रस्य या वह्निमधिकं मरीच्युक्तं । तद्देवपित्र्यकर्म्मानधिकारार्थं रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुद्ध्यति ।
रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला इति मनुवचने समभिव्याहृतयोर्गर्भस्रावरजोयोगाशौचयो रजस्वलायां तथा दर्शनात् । यथा शंखः । शुद्धा भर्त्तुश्चतुर्थे
ह्नि अशुद्धा दैवपित्र्ययोः । दैवे कर्म्मणि पित्र्ये च पंचमे ह्नि शुद्ध्यति । एवं च तृतीयचतुर्थपंचमषष्ठमासेष्वपि ब्राह्मणीक्षत्रीयावैश्याशूद्राणां यथाक्रमं मास॰

संख्यादिनातिरिक्तमेकरात्रं द्विरात्रं त्रिरात्रं षड्रात्रं च दैवपित्र्यकर्म्मानधिकारो बोध्यः लौकिककर्म्मणि तु मासमसंख्यादिनान्तरत्वमेव शुद्धिः । अन्यथा द्वितीय न
मासमात्रपरत्वे तत्परमासे लघ्वशौचेन वैषम्यं स्यात् हारलतायामेवं मिताक्षरायां गर्भधारणां च भ्रमादिलिंगैरवगन्तव्यं तथा च श्रुतिः । सद्योगृहीतगर्भाया अमो ग्ला
निः पिपासा अश्रान्त्या निषदनं शुक्रशोणितयोरनुबन्धः स्फुरणं च योन्या इति ॥ ० ॥ अथ स्त्र्यशौचं ॥ आदिपुराणे । दत्ता नारी पितुर्गेहे सूयते म्रियतेथवा । स्वमशौ
चं चरेत् सम्यक् पृथक्स्थान व्यवस्थिता । तद्बन्धुवर्गस्त्वेकेन शुद्ध्येत्तु जनकस्त्रिभिः । आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते । सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः
ततो वाग्दानपर्यन्तं यावदकाहमेव हि । अतः परं प्रवृद्धानां त्रिरात्रमिति निश्चयः । वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहं । पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि
स्वजात्युक्तमशौचं स्यात् सूतके मृतकेपि वा । पितुर्गृहे यदा सूयते म्रियते वा दत्ता नारी सा तदा प्रसवे स्वं जननी प्रत्युक्तमशौचं पैठीनस्युक्तं व्यवहरेत् न सपिण्डज
ननमात्राशौचं । यथा पैठीनसिः ॥ सूतिकां पुत्रवतीं विंशतिरात्रेण स्नातां सर्वकर्म्माणि कारयेत् । मासेन स्त्रीजननीमिति । अस्य स्वजात्युक्ताशौचकालादधिककाल
बोधकत्वात् शूद्रायाश्च विंशतिरात्राशौचं नेत्यस्मात् शूद्रेतरपरत्वं अत्र पुत्रवतीमिति मत्र निर्देशो विद्यमानपुत्रत्वार्थः स्त्रीजननीमित्यत्रापि साहचर्यात् तथा
कल्प्यते । ततश्च जातानन्तरमृतयोरविमृतजातयोरपि न विंशत्यहमासाशौचं विद्यमानत्वाभावहेतोरविशेषादिति पृथक्स्थानव्यवस्थिता इति । पृथक्स्थाने
पित्रादिसंसर्गशून्ये पितृगेहस्थिता स्याच्चेत्तदा तद्बन्धुवर्गो भ्रात्रादिरेकाहेन जनकस्त्र्यहेन शुद्ध्यतीति । जनककर्तृत्वाविशेषाज्जनन्यपि अन्यथा तस्याः संसर्गे

13 पित्रादेस्तत्तुल्या प्रायत्यभंगप्रसंगः। यथाशौचाधिकारे कूर्म्मपुराणे। यस्तैः सहाशनं कुर्य्याच्छयनादीनि चैव हि। बांधवो वा परो वापि स दशाहेन शुद्ध्यति। आदिशब्दाद्
लिंगनौगसेवाहनादिग्रहणं अत्रैव पूर्वोक्ते ॥ बृहस्पतिः॥ यस्तैः सहासपिंडोपि प्रकुर्य्याच्छयनासने। अत्र प्रशब्देन कामतोऽनुवृत्तं च दोत्यते पराशरः॥ सम्पर्काद्दुष्यते वि
प्रो जननेमरणेपि वा। सम्पर्कविनिवृत्तानां न प्रेतं नैव सूतकं। म्रियते त्यनेन तु पितृगेहे मरणाभावे पित्रोस्त्रिरात्रं भ्रात्रादेरेकरात्रमिति कल्पतरुः॥ केचित्तु यदि पितृगेहे सू
यते म्रियते वा तदा बंधुवर्गो भ्रात्रादिरेकरात्रेणाजनकस्त्रिभिः। पृथकस्थाने शयनभोजनदेवार्चनगृहभिन्नगृहे सूयते म्रियते वा तदा नारी ज्ञातीर्वक्ष्यमाणं समशौचं
चरेत् न पित्रादिरिति परिसंख्याविधिः। तथा च कल्पतरुः। दत्ता नारी पितुर्गेहे प्रधाने सूयते यदा। म्रियते वा तदा तस्या पिता शुद्ध्येत् त्रिभिर्दिनैरिति। तदसत् अन्यत्र प्रश्न १२ श्रु
त्वभावेन निषेधानुपपत्तेः दत्तानां भर्त्तुरेव हीति पौनरुक्त्यापत्तेश्च। हारलताप्रभृतयस्तु चरेदित्यस्य कर्त्ता बन्धुवर्गः पिता च तथा च पितुः। प्रधानगृहे संसर्गस
त्वे प्रशवमरणे च स्वजात्युक्तमशौचं। पृथक्गेहे चेदेकाहाशौचं बन्धुवर्गः पिता च त्रिरात्राशौचं चरेदित्यर्थः। गेहे प्रधाने सूयत इत्यत्राकार प्रश्लेषान्न विरोध
इत्याहुस्तच्चिन्त्यं संस्कारेभर्त्तुरेव हि इत्युक्त्वा स्वजात्युक्तमशौचमिति वक्ष्यमाणविरोधात्। यद्वा प्रधानगृहे पृथकस्थाने व्यवस्थिता संसर्गमूल्या सती यदि सूय
ते म्रियते वा तदा स्वं ज्ञातिकुलं अशौचं चरेत। संसर्गे पूर्णाशौचमेव ज्ञातिषु कस्यांकिमशौचं तत्राह तद्वन्धुवर्ग इत्यादि। चूडान्तमिति चूडापदं व्रतचूडाद्विजानानु
प्रतीतिषु यथाक्रममिति वक्ष्यमाणात् प्रतीति परं द्वितीयवर्षसमाप्तिपर्यन्तकालोपलक्षणं च अहस्त्वदत्तकन्यानामशौचं मरणे स्मृतं। ऊनद्विवर्षीनमरणे।

स्यः शौचमुदाहृतमिति कूर्म्मपुराणीयैकवाक्यत्वात्। अतः परं प्रवृद्धानां अकृतवाग्दानावस्थातः परं प्राप्ताधिकरूपाणां अधिकरूपं व्यनक्ति वाक्प्रदाने कृतइ
ति उभयत इति व्याकरोति पितुर्वेश्म चेति हारलताप्रभृतयः केचित्तु अतः परमित्यादिना वाग्दानोपलक्षितकालानन्तरं त्रिरात्रं विधीयते तत्कालश्च कन्याविवाह
कालस्सोप्युपनयनकालः पतिसेवा गुरौ वास इति मनुवचनोपनयनतुल्यत्वाभिधानात् सोपि गर्भाष्टमाब्द इत्याहुः तच्चिन्त्यं नखलु शूद्राणामुपनयनमस्ति। नवास
र्वेषां द्विजानां गर्भाष्टमएवोपनयनकालः। नवा विवाहस्य वाग्दानकालत्वे प्रमाणमस्ति नचातः परं प्रवृद्धानामित्यस्य वैयर्थ्यमेव प्रमाणमिति चेदाचार्याणामि
यं शैली यत्सामान्येनाभिधाय तदेव विवृणोति यथा तत्रैवोभयतइत्युक्ता पितुर्वेश्म चेति न वैयर्थ्यं सामान्याविधिरस्पष्टः। संक्षिप्येत विशेषत इति न्यायात् पितु
र्वेश्म चेत्युभयपक्षोपलक्षणं। तथा च मनुः। स्त्रीणामसंस्कृतानान्तु त्र्यहात् शुद्ध्यन्ति बान्धवाः। यथोक्तेनैव कल्पेन शुद्ध्यन्ति तु सनाभयः। असंस्कृतानाम कृ
तपाणिग्रहणरूपसंस्काराणां वाग्दत्ता वा भर्तृसपिंडास्त्र्यहेण शुद्ध्यन्ति एतच्च वाग्दानात्प्रभृति वाग्दानव्यतिरेकेण भर्तृपक्षे संबंधाभावात् सनाभयः पितृपक्षीय
स्त्वसपिंडाः पुरुषत्रयपर्यन्त इति यावत्। सपिंडमधिकृत्य अप्रत्तानां त्रिपौरुषमिति वशिष्ठवचनात् नच अप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषमिति रत्ना
करधृतकूर्म्मपुराणात् कन्यानां त्रिपौरुषसापिंडप्रतिपादकं वचनं वाग्दानोत्तरविषयमिति रुद्रधरोक्तं। तस्य वचनस्योद्वाहपरत्वेनैवोपपत्तौ त्रैपुरुषिकवचनस्य वाग्दानो
त्तरकालपरत्वे प्रमाणाभावात् गौरवाच्च यथोक्तेन पूर्वार्द्धोक्तेन त्रिरात्रेण शुद्ध्यन्ति रत्नाकरादौ भ्रान्तरवः। विष्णुधर्म्मोत्तरं च। पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता। तस्यां मृता

14

यां नाशौचं कदाचिदपि साम्यतिरिति। पितुर्यावज्जीवमशौचमिति वाचस्पतिमिश्राः। सोदरे विशेषयति कूर्म्मपुराणे। आदन्तात्सोदरे सद्य आचूडादेकरात्रकं। आप्रदानात्त्रिरात्रं
स्याद्दशरात्रमतः परं। न चात्र सोदरपदं कैश्चित्कन्यापालकन्यायात् पित्राद्युपलक्षणपरमिति वाच्यं। आदिपुराणे जनकस्त्रिभिरित्यभिधाय प्राजन्मनस्तु चूडान्तं इत्यभिधानेन
पितुरपि चूडापर्यन्तसद्यःशौचाभिधानात् वाचनिकऽर्थे न्यायानवतारात् दशरात्रमिति। भर्त्रादिसपिण्डपरं दन्तानां भर्त्तुरेव हीति स्मृतेः। केचित्तु विषमशिष्टमियासमानमुद
रं। यस्मादिति बहुव्रीहि विग्रहेण सोदरपदं पितृपरमित्याहुः तन्न पितुर्वस्य चेत्यनेन विरोधात्॥ अथवालाद्यशौचं। नवमे दशमे मासि प्रबलैः सूतिमारुतैः। निःसार्यते
बाण इव जन्तुश्छिद्रेण सज्वरः इति। याज्ञवल्क्येयात्प्रकृतप्रसवकालान्नवममासादि जातमृते कूर्म्मपुराणं। जातमात्रस्य बालस्य यदि स्यान्मरणं पितुः। मातुश्च सूतकं त
स्यात् पिता त्वस्पृश्य एव हि। सद्यःशौचं सपिण्डानां कर्त्तव्यं सोदरस्य च। ऊर्द्ध्वं दशाहादेकाहं सोदरो यदि निर्गुणः। सूतकं ततस्यादित्यनेन पूर्वजातं जननाशौचमेव पितु १४ शु
र्मातुश्चोच्यते न तु मरणाशौचं मातुरस्पृश्यत्वं पूर्वमेव सिद्धमिदानीं पितुरपि तथा चमिताक्षरायां हरिहरश्च। दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः। शावाशौचं न क
र्त्तव्यं सूत्याशौचं विधीयते। बान्धवैः पितृमातृभिर्वचनान्तरैकवाक्यत्वात् वस्तुत्वन्तु व्यक्तिभेदेन दशाहपदं न तत्कर्त्तव्यताशौचाहपरं। सामान्यतः कूर्म्मपुराणे। तत
सूतकमित्युक्तत्वात् पारस्करेणान्तःसूतक इत्यभिधानाच्च। यथाप्रविविर्षे प्रेते मातापित्रोरशौचमेकरात्रं त्रिरात्रं वा शरीरमदग्ध्वा निखनन्ति। अन्तःसूतके चेदु
त्थानाद्दशौचं सूतकवदिति। नवममासादिति मृतजाते तु सपिण्डानां दशाहादि जननाशौचं। गर्भे यदि विपत्तिः स्यादिति प्रागुक्तेः एकरात्रं त्रिरात्रं वेत्यजातदन्ते विष

यं। यथाकौर्म्मे। अजातदन्तमरणे पित्रोरेकाहमिष्यते। दन्तजाते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ। अजातदन्तमरणे यदेकाहमुक्तं तत्शूद्रेतरविषयं। तस्य त्रिरात्रविधानात् यथा
ऽष्टाहात् शुध्यतीत्यनुवृत्तौ शंखः। अनूढानां तु कन्यानां तथा वै शूद्रजन्मनामिति। न चैतत् सगुणशूद्रस्य जातदन्तविषयमिति। रत्नाकराद्युक्तं शंखवचनस्य बालानामजा
तदन्तानां त्रिरात्रेणाशुद्धिरिति मिताक्षराधृतकाश्यपवचनेन बालेऽजातदन्ते च त्रिरात्रं शावमशौचमिति गौतमशंखरत्नाकरधृतवैवस्वतवचनेन चैकमूलकत्वात् अन्न
माह मत्स्यसूक्तं। त्रिरात्रं तु भवेत् शूद्रे षण्मासेन शिशौ मृते। एवं च जातशूद्र एव परिशेषात् पंचाहमांगिरसं। शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पंचभिः। अतऊर्द्ध्वं मृ
ते शूद्रे द्वादशाहो विधीयते। षडब्दान्तमतीतो यः शूद्रः संम्रियते यदि। मासिकं तु भवेच्छौचमित्यांगिरसभाषितं। त्रिवर्षावर्त्तमानतृतीयवर्षान्न्यूने अप्रसमाप्तद्वितीय
वर्ष इत्यर्थः। षण्मासाभ्यन्तरे शूद्रे मृते बाले त्र्यहं विदुः। अनतीते द्विवर्षे वै मृते शूद्रेपि पंचभिः। इति यमवचनैकवाक्यत्वात्। यत्तु अनूढभार्य्यः शूद्रस्तु षोड
शाद्वत्सरात्परं। मृत्युं समधिगच्छेत्तु मासं तस्यापि बान्धवाः। शुद्धिं समधिगच्छन्ति नात्र कार्य्या विचारणा इति शंखवचनं। तदंगिरोवचनविरोधात् सगुणशूद्र-
विषयमिति गौडाः। मैथिलास्तु षडब्दोपर्य्युढभार्य्यत्वे मासः। अनूढभार्य्यत्वे द्वादशाहः। षोडशवर्षोपर्य्यनूढभार्य्यत्वेपि मास इत्याहुस्तन्न षडब्दाभ्यन्तरे कृतकृत
निवाहस्य मरणे मासाशौचस्य वक्ष्यमाणत्वेन षडब्दोपर्य्युढभार्य्यत्वे मास इत्यत्र षडब्दोपरीत्यस्य वैयर्थ्यापत्तेः। एवं च षडब्दोपर्य्यनूढभार्य्य मरणे निर्गुणानां संपूर्णा
शौचं। षोडशवर्षोपरि मरणे सगुणानामिति शूद्रस्य प्रधानसंस्कारत्वेन षडब्दमध्ये दैवात् कृतोद्वाहेपि मासाशौचव्यवह्रियते अन्यथा द्विवर्षविषययोः शूद्रपत्न्याम

15 रणे मासाशौचं। तदूर्द्ध्वं तु। पंचवर्षीयस्य मरणे द्वादशाहमिति मनुद्वैधमयंस्यात् अत एव द्विवर्षोत्तरं। षोडशवर्षाभ्यन्तरमनूढभार्य्यमृते द्वादशाहमेवाशौचं वदता वाचस्पति
मिश्रेण द्विवर्षोपर्य्यूढभार्य्यमरणे मासाशौचमंगीकृतं। केचित्तु अनूढभार्य्यं ऊढभार्य्यत्वस्वरूपयोग्यतारहितः शूद्रो नपुंसक इति यावत् पुंलिंगस्तु छान्दस इति वदन्ति।
न च षोडशाब्दत्सरात् परमित्यत्रानूढभार्य्यत्वविशेषणमपि व्यर्थमिति वाच्यं। तद्विशेषणेन न्यायवर्त्तिशूद्राणां षोडशवर्षोपरि विवाहकालः कल्प्यते। तथा हि शूद्रा
णां वपनं कार्य्यं मासिकं न्यायवर्त्तिनां। वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं तु भोजनमिति मनुवचनेन न्यायवर्त्तिनां शूद्राणां वैश्यवच्छौचकल्पश्चेति चकारोद्देश्यध
र्म्मातिदेशेनोपनयनप्रश्नेनोत्तस्थाने ब्रह्मपुराणेन विवाहो विधीयते यथा विवाहमात्रं संस्कारं शूद्रोपि लभतां सदेति तत्रोपनयनकालश्च। गर्भाष्टमेऽष्टमे वाब्दे ब्रा
ह्मणस्योपनायनं। राज्ञामेकादशे सैके विशामेके यथाकुलमिति। याज्ञवल्क्योक्तेः सैके सैकादश इत्यनुषंगात् द्वादश इत्यर्थः। अत्र चोत्तरोत्तरवर्णानामुत्तरोत्तरकाल १५ श्रु
दर्शनात् शूद्राणामुपनयनस्थानाभिषिक्तविवाहस्य तथैव युक्तत्वात्। अत एव यथाकुलमित्यति देशेन षोडशाब्दत्सरात् प्रागपि विवाहो दृश्यते स तु न प्रकृष्ट इ
ति विशेषः। प्रतिलोमजानन्तु शौचाशौचं प्रकुर्वीरन् शूद्रवद्वर्णशंकरा इत्यादि पुराणाद्यवस्था इदानीन्तनक्षत्रियाणामपि शूद्रत्वमाह मनुः। शनकैश्च क्रिया
लोपादिमाः क्षत्रियजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च। अत एव विष्णुपुराणे महानन्दितः शूद्रागर्भोद्भवोतिलुब्धो महापद्मानन्दः परशुराम इवा
परोखिलक्षत्रियान्तकारी भविता ततः प्रभृति शूद्रा भूपाला भविष्यन्तीति तेन महानन्दिपर्य्यन्तं क्षत्रिय आसीत् एवं च क्रियालोपाद्देश्यानामपि तथा एव मद्गुष्टादीनाम

पि। इतिप्रसंगादुक्तं उत्थानादिति आउत्थानादुत्थानपर्यन्तं उत्थानं च स्वस्वजात्युक्ताशौचान्तदिन एव दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोतीति पारस्कर
वचनात्। न च दशम्यामित्यस्यापि लक्षणात्वे प्रमाणाभाव इति वाच्यं। ब्राह्मणानित्यादिना तदुत्तरदिने वृद्धिश्राद्धसम्बन्धिब्राह्मणभोजन पूर्वकनामकरणं नामधेयं दश
म्यां तु द्वादश्यां वाथ कारयेत् इति मनुवचनादिति हरिशर्म्मोक्तं युक्तमिति वाच्यं अशौचव्यपगमे नामधेयमिति विष्णुविरोधात् अत एव दशम्यामिति निवृत्ताशौचपर
मिति ब्रह्मचारिकाण्डं। एतद्दशं करणाशौचह्रासे तदानीं नामकरणं बोध्यं। एतत्परमेव दिगविभिरशता हइति क्षिपिकोक्तं च अविद्धादशाहः अव्ययः शैलमेघार्का
इत्यमरकोषात् पारस्करीयदशम्यामित्यस्यानुपलक्षकत्वे सूतकं तदिति सूत्याशौचमित्येतयोः संकोचापत्तेः। यत्र ब्राह्मणस्य संपूर्णाशौचं तत्र क्षत्रियादीनामपि द
शाहमध्य एव बालमरणेऽङ्गास्पृश्यत्वयुक्तमशौचं उत्थानावधि तदुक्तं नु सद्यः वा न स्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति। सद्य एव विशुद्धिः स्यात् नाशौचं नैव सूतक
मिति शंखोक्तनायनोत्थानं च दशमदिन इति निरस्तं। तस्मादेतच्छंखवचनं मातापितृव्यतिरिक्तसपिंडानां सद्यः शौचं विधायकं। अन्तर्दशाहपदं च स्वस्वजात्युक्ता
शौचपरं। एवं च सूतकं तदित्यभिधानात् तत्र बालस्य शृंगारादिमिहितत्वेपि न मरणनिमित्तको विशेषः। तत्रान्तः सूतक इति उभयोरपि कन्यापुत्रयोः सूतकमध्ये म
रणे मातापित्रोर्दशाहपर्यन्तमेवाशौचमिति तच्चिन्त्यं। अद्विवर्षे प्रेत इत्यनेन पुत्रस्य प्रकृतत्वात् न च निमित्तविशेषणत्वात् पुंस्त्वमविवक्षितं तथात्वे द्विवर्षीयकन्या
मरणेप्येकरात्रं त्रिरात्रं वेति स्यात्। न च शरीरमदग्ध्वा निखनन्तीति शरीरप्रतिपत्तेः पुंस्त्रीसाधारणत्वे स्त्रिया अपि प्रकृतत्वमिति वाच्यं। पारस्करेण पुरुषस्य शरीरप्रतिप+

16 त्यादिकमभिधाय स्त्रीणां चेत्युक्तं तदनन्तरमप्रत्तानामिति सूत्रान्तरेण कन्यानां यथायोग्यमतिदिश्यते अतः शरीरप्रतिपत्तिपिण्डोदकादीनामनन्यत्वात् पुंवदेवाशौचस्य वचनान्त
रेण कन्यानां पृथग्विधानादतथात्वमिति अतएव सर्वैर्निबन्धृभिः प्रकरणभेदेन स्त्र्यशौचं निर्दिश्यते। अतएवादिपुराणे जनकस्त्रिभिरित्यनन्तरमेव आजन्मनस्तु चूडान्तमित्य
भिधानात् पितुरपि सद्यः शौचमुक्तं तस्माददन्तः सूतक इत्यादि पुंमात्रविषयं न कन्याविषयमिति कूर्मपुराणे आदन्तजननात्सद्य आचूडादेकरात्रकं त्रिरात्रं चोपनयनात् स
पिण्डानां यदा स्मृतं। सपिण्डानां निर्गुणानां अथोर्द्ध्वं दन्तजननात् सपिण्डानामशौचं एकाहं निर्गुणानान्तु चौडादूर्द्ध्वं त्रिरात्रकं इति तन्नैवोक्तेः। अदन्तजननादिति तु विप्रविषयं
दन्तजननादिकं दन्तजन्म चूडोपनयनोपकालोपधायकं च अन्यथादेवादजातदन्तस्य प्रथमेऽब्दे चूडाकरणमिति वचनात् कुलाचाराच्च नवमे मासि कृतचूडस्य मरणे
न ध्यवसायः स्यात् किमदन्तजातत्वेन सद्यः किं वा कृतचूडत्वेन त्रिरात्रमिति अतएव ब्रह्मपुराणीय षड्भिर्मासैर्गतैर्वह्निरित्यत्र तथा व्याख्यातं गर्भोपनिषदि दन्तजन्म स १६ ४३
प्तमे मासीत्युक्तं तेन षण्मासावधिः सद्यः शौचं चूडायामपि विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी। निर्वृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते इत्यङ्गिरोवचनैकवाक्यत्वे
न त्रिभिर्वर्षै रूपलक्षितादृत्नमानतृतीयवर्षन्यूने ऊनद्विवार्षिक इत्यर्थः। एवं शूद्रे त्रिवर्षान्न्यूने इत्यपि बोध्यं एवमुपनयनकालेपि गर्भाष्टमाब्द एव आदिपुराणे। नुपनी
ते विप्रस्त्वित्यभिधाय म्रियते यत्र तत्र स्याद् शौचं त्र्यहमेव हि। द्विजन्मनाम यं कालत्रयाणां तु षडाब्दिक इत्युक्तत्वात् षडरूपदं च मासत्रयाधिकषड्रूपरं। गर्भाष्टमे
ष्टमे वाब्दे ब्राह्मणस्योपनयनमिति याज्ञवल्क्यादिति हारलता। यत्र व्रतचूडद्विजानान्तु प्रतीतिषु यथाक्रमं। दशाहत्र्यहमेकाहैः शुद्ध्यन्त्यपि च निर्गुणा इति। जाबालवचनं

तत्प्रतीतिविरित्यभिधानात्। पंचमाब्दोपनीतस्य प्रथमाब्दकृतचूडस्य षण्मासाभ्यन्तरजातदन्तस्य च मरणे दशाहादिभिः शुद्धिपरं। एतद्ब्राह्मणविषयं क्षत्रियादीनामपि तथा
शौचवृद्धिः कल्प्यते अन्यथा ब्राह्मणस्य दन्तादिप्रतीतावशौचाधिक्यमन्यस्य न तथेति वैषम्यं स्यात् तेन शूद्रस्य षण्मासाभ्यन्तरे दन्तोत्पत्तौ मरणे पंचाहः द्विवर्षाभ्यन्तरे कृ
तचूडस्य द्वादशाहः उपनयनवत् प्रधानसंस्कारत्वेन देवात् पंचवर्षाभ्यन्तरे कृतोद्वाहेऽपि मासो व्यवह्रियते अन्यथा द्विवर्षीयायाः शूद्रपत्न्या मरणे मासाशौचं तत्र तद्बो
द्धुः पंचाब्दीयस्य मरणे द्वादशाहाशौचे वैषम्यापत्तेः अत एव द्विवर्षोत्तरं षोडशवर्षाभ्यन्तरेऽनूढभार्य्यशूद्रे मृते द्वादशाहाशौचमिति वदता वाचस्पतिमिश्रेणापि द्विवर्षो
पर्यूढभार्य्यमरणे मासाशौचमंगीकृतमित्युक्तं प्राक् एवं च प्रथमाब्दकृतचूडमरणविषयमेतत्तुः। ऊनद्विवार्षिकं प्रेतं निदध्युर्बान्धवा बहिः। अलंकृत्य शुचौ भूमावस्थि
संचयनादृते। नास्य कार्य्योऽग्निसंस्कारो नापि कार्य्योदकक्रिया। अरण्ये काष्ठवत् क्षिप्त्वा क्षपेयुस्त्र्यहमेव हि। अकृतचूडोऽपि स एवन्तराणामकृतचूडानां अशुद्धिर्नै शि
कीर्त्तिता। निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते। एतत्परोऽनेन ऊनद्विवार्षिकमिति वचनस्य विषयो दर्शितः। यत्तु पैठीनसी वचनं अकृतचूडानां त्रिरात्रमिति तद्द्विव
र्षादुपरि अकृतचूडानां मन्तव्यमिति मिताक्षरायामेवं एतेन ऊनद्विवार्षिकस्य दाहेऽपि त्रिरात्रविधानात् स्नेहात् दाहादाहकृतत्रिरात्रैकरात्राशौचव्यवस्था मैथिलोक्ता हेयाहा
रलताप्रभृतिभिस्तु निर्गुणात्यन्तनिर्गुणाभ्यां व्यवस्थाकृतेति। अद्विवर्षीयशूद्रस्य स्नेहादाहे यथा अनतीतद्विवर्षस्तु शूद्रो यद्यपि दह्यते। अपि विंशतिरात्रेण शूद्रा
णां तु भवत्यशुचिरित्यादिपुराणात्॥ ० ॥ अथ सगुणाद्यशौचं ॥ ० ॥ ननु बालादीनां सद्यः प्रभृत्यशौच श्रवणात् सद्यः शौचं तथैकाहत्र्यहश्चतुरहस्तथा। षड्दशाहा

17 दशाहश्चपक्षो मासस्तथैव च। मरणान्तं तथा चान्य दशपक्षास्तु सूतक इति। यत्र त्रिरात्रं विप्राणामशौचं संप्रदिश्यते। तत्र शूद्रे द्वादशाह षड्नव क्षत्रवैश्ययोरिति चेन्न। उपन्या
सक्रमेणैव वक्ष्याम्यहमशेषतः। ग्रन्थार्थतो विजानातीत्यादिवचनैर्दक्षिणैव सगुणनिर्गुणभेदेन दत्तविषयत्वात् अतएव वाचस्पतिमिश्रेण गुणहान्या षडहेपि व्यवस्थोक्ता
अन्यज्ज्ञानन मरणाद्भिन्नं मरणान्तं दशमतिरत्नाकरः तथा च कूर्म्मपुराणे। क्रियाहीनस्य मूर्खस्य महारोगिनस्य च। यथेष्टाचरणस्याहुर्मरणान्तमशौचकं। मूर्खस्य गायत्री
रहितस्य इति कल्पतरुः। मरणान्तं यावज्जीवं केचित्तु दक्षवचने। सगुणानां दशाहादि समभिव्याहृतत्वात् सद्यः प्रभृतिः सर्वाशौच निवृत्तिः न तु होमाध्यापनमात्रार्थमित्याहुस्त
च्चिन्त्यं जाबालादिविरोधात् तथा जाबालः। उभयत्र दशाहानि सपिंडानामशौचकं। स्नानोपस्पर्शनाभ्यासादग्निहोत्रार्थमर्हति। उभयत्र मृत्युजन्मनोः अत्र साग्निकाना
मेव दशाहाशौचं प्रतीयते। स्नानाचमनाभ्यासादेकाहघुत्तरमाग्निहोत्राहिता च अन्यथा निरग्निसाग्निविषयत्वेन वाक्यभेदाङ्गौरवं स्यात् संवर्त्तः। होमस्तत्र तु कर्त्तव्यः शु- २७ श्र
ष्कान्नेनाथवा फलैः। पंचयज्ञविधानं च न कुर्य्यान्मृत्युजन्मनोः। दशाहात्तु परं सम्यग्विप्रोधीयीत धर्म्मवित्। अत्रापि येषामशौचाभ्यन्तरे होमस्तेषामेव दशाहोत्तरं पंचयज्ञाति
प्रतीयते। गोतमः। श्रुत्वा चोर्द्ध्वं दशम्याः पक्षिणीमिति अस्य चतुरपंचाहाशौचि सगुणविषयतया नैरेव व्यवस्थापितत्वेन दशम्या ऊर्द्ध्वमित्यनुपपत्तेः। आश्वुच्यं दशरा
त्रस्तु सर्वत्राप्यपरे विदुरिति देवलेन सगुणत्वान्नक्षत्रियादीनां सर्वाशौच निवृत्तिः चकैकादशिकं श्राद्धं त्रयोदशिकमेव च इति वक्ष्यमाणवचने रामादिविवाहप्रस्तावचीन
ग्निस्ते परिक्रम्यताउदूहुर्वधुः पृथगित्यादिकाण्डोक्त साग्नित्वेन सगुणस्य भरतस्य द्वादशाहिकादि श्राद्धकर्त्तृत्वेन श्रुते। शूद्रस्यापि ब्राह्मणस्य सेवकान्तराभावे ब्राह्मणसेवार्थ

मेव दशाहोत्तरं शुद्धिः। मासेनैव तु शुद्धिः स्यात् सूतके मृतके तथेत्यंगिरोवचने एवकारश्रुतेः। सर्वांशे। च निवृत्तिर्मासेनैव तस्मात् सगुणानां तत्तत्कर्मण्येवांशे च संकोचः

सर्वांशे च निवृत्तिस्तु दशाहाद्युत्तरमिति हारलतामिताक्षरारत्नाकराद्युक्तं साधीयः। 'वस्तुतस्तु हेमाद्रिपराशरभाष्यधृतादित्यपुराणे नहृत्त्वादिनिमित्ताशौचसंकोचः क

लौ निरस्तः। यथा कन्यानां सवर्णानां विवाहश्च द्विजातिभिः। तथाहृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा। तथा। दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः। शूद्रेषु दासगोपा

लकुलमित्रार्द्धसीरिणां। भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः। तथा। ब्राह्मणादिषु शूद्रस्य पक्वतादिक्रियापि च। भृग्वग्निपतनं चैव वृद्धादिमरणं तथा इत्यादिन्यभि

धाय एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः। निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः। एवं च कालावमवर्णविवाहनिषेधात् वर्णसन्निपाताशौचं नाभिहितं। प

क्षिणी तु अहर्द्वयसहिता रात्रिरेव। द्वावह्नावेकरात्रिश्च पक्षिणीत्यभिधीयते इति महनारायणधृतवचनात् पक्षतुल्यदिवसौ पार्श्वयोरस्य इति पक्षिणी रात्रिरिति सर

लाहं पियचरा नैषां मृतं तच्च पूर्वदिनमादाय पक्षिणी व्यवहारः रात्रावेव समुत्पन्ने मृते रजसि सूतके। पूर्वमेव दिनं ग्राह्यं यावन्नैवोदितो रविरिति वाचस्पतिभिः धृतपराशर

वचनात्। एतेन दिनद्वयसहिता रात्रिः रात्रिद्वयसहितं च दिनमविशेषात् पक्षिणीति निरस्तं। दिनविशेष्यत्वे स्त्रीलिंगानुपपत्तिः स्यात्॥ ८॥ अथ विदेशस्थाशौचं ॥

श्रुत्वा चोर्द्धं दशम्याः पक्षिणीमिति अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् इत्यादौ स्वस्वजात्युक्तपूर्णाशौचानन्तरमेवातिक्रान्ताशौचं प्रतीयते ननु बालादिरवं

डाशौचानन्तरवाले देशान्तरस्थे तु पृथक्पिण्डे च संस्थिते। सवासा जलमाप्लुत्य सद्य एव विशुद्ध्यतीति मनुवचनात् अत एव शंखेन। मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निना

दाहादूर्द्ध्वमशौचं स्याद्यस्यैतानि को विधिरित्यतो विशेषवचनाभावे मरणकालावध्यशौचं सामान्यत उक्तं। अन्यथा पूर्वाशौचशेषदिने तन्मरणश्रवणोत्पत्तौ नामैकाहः
दौहित्रादीनां त्र्यहादिरिति वैषम्यं स्यात् तथा च मिताक्षरायां। व्याघ्रपादः तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च। उपनीते तु विषमं तस्मिन्नेवातिकालजं। वयसि उपनयनका
लात् पूर्वस्मिन् काले सर्वेषां वर्णानां त्रिरात्राशौचं तुल्यमिति। दाक्षिणात्यदेशव्यवस्थितं अन्यदेशे तु कूर्म्मपुराणादिना तत्त्वत्कालेतत्त्वदर्शिनामशौचविशेष उक्तः। तथा
च मरीचिः। यस्तु स्थानेषु यच्छौचं धर्माचारश्च यादृशः। तत्र तत्रावमन्येत धर्मस्तत्रैव तादृशः। विदेशं च गतानां तु पित्राद्याचार एव च। येनास्य पितरो याता येन माताः पि
तामहाः। येन यायात् सतां मार्गं तेनाच्छन्न दुष्यतीति। मनुवचनात्। अतिक्रान्ते यत् त्रिरात्रं तदपि तुल्यं। तथा च शंखः। अप्रतीते मृतके स्वे स्वे त्रिरात्रं स्याद् शौचकं। 
संवत्सरे व्यतीते तु सद्यः शौचं विधीयते। मृतके मरणाशौच। कौर्म्मे। तथैव मरणे स्नानमूर्द्ध्वं संवत्सराद्यदि। जननाशौचे तु देवलः। नाशौचं प्रसवस्यास्ति व्यतीतेपि दिने
ष्वपि। पुत्रजन्मन्यतीतास्से चकालेपि स्नानमाह मनुः। निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। सवासा जलमाप्लुत्य शुद्धो भवति मानवः मरणे स्नानदेवांगास्पृश्यत्वनिहृ
त्तिरूपा शुद्धिः न तु सर्वाशौचनिवृत्तिः त्रिरात्रादिविधानात् पुत्रजनने तु सर्वाशौचनिवृत्तिः। संकोचकाभावात् उपनीते त्वित्युपनयनानन्तरन्तु दशाहद्वादशाहादिरूपे
णाविषमं स्वस्वजात्युक्ताशौचमित्यर्थः। तस्मिन्नेव उपनीतोपरम एवातिकालजमिति अतिक्रान्तकालाशौचं न तु बालाद्यशौचादिक्रमेपि अत्र विशारदधृतवचनं अप्र
तीतेऽशौचएकाहं खंडाशौचमृते श्रुतौ। संपूर्णाशौचमरणे श्रुते ज्ञेयं त्रिरात्रिकमिति पुराणवचनं। यदि समूलं तदा खण्डाशौचे महागुरौ मृते ज्ञेयं। ऊर्द्ध्वं दशम्याः पक्षि

णीमित्यत्रदशम्याऊर्द्ध्वमितिश्रुतेः। प्राच्यमैथिलीनां चतुर्मासोपरि अर्वाचां च षण्मासोपरियत् पक्षिण्यशौचाभिधानं तज्ज्ञेयं। किंतु स्मार्त्तलनोक्तं सगुणा विशेषाणामेवेति युक्तं। षण्मासत्रयेविरात्रं स्यात् षण्मासे पक्षिणी तथा। अहस्तु नवमादर्वाग् ऊर्द्ध्वं स्नानेन शुद्ध्यतीति मिताक्षरायां बृहद्वशिष्ठवचनाद्व्यवस्थेति। तद्दाक्षिणात्यानां देवलः॥
अशौचाहस्त्रीतेषु बंधुश्चेत् श्रूयते मृतः। तत्र त्रिरात्रमाशौच्यं भवेत्संवत्सरान्तरे। ऊर्द्ध्वं संवत्सरादाद्यात् बंधुश्चेत् श्रूयते मृतः। भवेदेकाहमेवात्र तत्रसंन्यासिनो न तु।
बंधुरत्र मातापिता भर्त्ता च यद्वमिताक्षरायां। पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतिकी भवेदिति। पैठीनस्युक्तं। ततकलिंगोड्रादिद
शव्यवस्थितं तेषां तथाचारात् तथा च वामनपुराणं। देशानुशिष्टं कुलधर्ममग्र्यं सगोत्रधर्मं नहि सन्त्यजेत। एवमन्यानि तत्स्मृतवचनानि व्यवस्थेयानि॥ ०॥ अथस
पिंडाद्यशौचं॥ बृहस्पतिः॥ दशाहेन सपिंडास्तु शुद्ध्यन्ति प्रेतसूतके। त्रिरात्रेणासकन्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः। प्रेतसूतके मरणजननयोः सपिण्डाः सप्तमापुरु
षवेधयः। सकुल्या दशमपुरुषावधयः। एष विशेषः सपिंडादिविचारे स्फुटी भविष्यति। गोत्रजा निहत्र समानोदकभावाः दशाहेनेति विप्रपरं तथा च मनुः। शुद्धे
द्विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यति। अंगिराः। दशमेहनि शूद्रस्य कार्य्यं संस्पर्शनं बुधैः। मासेनैव तु शुद्धिः स्यात् सूतके
मृतकेपि वा। अत्र वर्ज्यावर्ज्ये जाबालः। सन्ध्यां पंचमहायज्ञान्नैत्तिकं स्मृतिकर्म्म च। तन्मध्येहापयेत्तेषां दशाहान्ते पुनः क्रिया। तन्मध्य अशौचमध्ये हापयेत्त्यजेत्।
स्मृतिकर्म्मवैधस्नानादि॥ अत्र चन मुहूर्त्तमप्यप्रयतः स्यादित्यापस्तंबवचनादस्पृश्यस्पर्शनादेशौचस्य कृतिसाध्यत्वात्तदर्थं स्नानादि कर्त्तव्यं। मूत्रपुरीषोत्सर्गादि

19 निमित्तकाशौचे प्रक्षालनादिवत्। एवं भोजनाश्रितत्वात् प्राणाहुत्यादि च एवं च कर्म्माभ्यन्तरे चाप्रायत्ये शौचसम्पादकतया स्नानादिकं नैमित्तिकं गत्वा न व्यवधाप
कं अतः पूर्वकृतानां न पुनः करणं। अत एवाचाररत्नाकरे कर्म्ममध्येपि पः कश्चिद्यदि स्यादशुचिर्नरः स्नात्वा कर्म्म ततः कुर्यादन्यथा विफलं भवेत्। यत्तपार्श्वेपि स्मार्त्त
कर्म्मपरित्यागो राहोरन्यत्र सूतके। अशुचिर्देवपितृर्षिनामानि च न कीर्त्तयेदिति वचनं विष्णुनामातिरिक्तपरं। न देशनियमस्तत्र न कालनियमस्तथा। नोच्छिष्टादौ
निषेधोस्ति हरेर्नामानि लुब्धक इति संवत्सरध्वतवचनात् शौचवः दानं प्रतिग्रहो होमः स्वाध्यायपितृकर्म्म च। प्रेतपिण्डक्रियावर्जं सूतके विनिवर्त्तते। अभिवादये
दित्यनुवृत्तौ शंखलिखितौ। नाशुचिर्न जपन्न देवपितृकार्य्यं कुर्वन्निति आपस्तम्बः। अप्रयतायाप्रयतश्च न प्रत्यभिवादयेदिति नमस्कारमाह स्मृतिः। सर्वे- १८ श्र
चापि नमस्कुर्य्युः सर्वावस्थासु सर्वदा। राघवभट्टधृतनारदवचनं। अथ सूतकिनः पूजां वक्ष्याम्यागमनोदितां। स्नात्वा नित्यं च निर्वर्त्त्य मानस्या क्रियया तु वै। वाह्य
पूजाक्रमेणैव ध्यानयोगेन पूजयेत्। यदा कामी न चेत्कामी नित्यं पूर्व्ववदाचरेत्। नित्यं चाशुचि कर्त्तव्यं। प्रेततर्पणादि मंत्रमुक्त्वा वस्यां जपो देवार्चनविधिः।
कार्य्ये दीक्षान्वितैर्नरैः। नास्ति पापं यतस्तेषां सूतकं वायतात्मनां। अत एव मन्त्रग्रहणादिने तथाविधा प्रतिज्ञा राघवभट्टेन लिखिता यथा वरं प्राणपरित्याग
श्छेदनं शिरसापि वा। न त्वनभ्यर्च्य भुंजीत भगवंतं त्रिलोचनमिति अन्यच्चाधोक्षजमित्यूहेत् पत्युन्नतिं हकल्पेसदा मंत्रजपस्तु क्रायदिस्यादशुचिस्तत्र स्मरन् मंत्रं
न तु च्चरेत्। मनो हि सर्व्वजन्तूनां सर्व्वदैव शुचिस्मृतमिति। तन्मूलोच्चार्य्य राघवशौचपरं। रामार्चनचंद्रिकाधृतमंत्रोत्तरेपि अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन् स्वपन्नपि।

मंत्रैकस्मरणे। विद्वान् मनेत्स्वैव सदाभ्यमेत्। मरीचिः। लवणे मधुमांसे च पुष्पमूलफलेषु च। शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्सु च। तैलौषध्यजिने चैव पक्वापक्वे
स्वयंग्रहे। पण्येषु चैव सर्वेषु नाशौचं मृतसूतके। पक्वं शुष्कान्नं शक्तुलाजादि तत्स्वयं गृह्यमाणं न दोषाय पण्याय चेति। पृथगभिधानात् तेष्वशौचिनादत्तेष्वपि न दोषः वो
धायनः। मानसमप्यशुचेरिति मानसो जननमरणयोरनध्यायः मिताक्षरायामं गिराः। अतिक्रान्ते दशाहे तु पश्चाज्ज्ञानाति चेत् क्वहि। त्रिरात्रं सूतकं तस्य न तु द्रव्येषु कर्हिचित्
कूर्म्मपुराणे। मातामहानां मरणे त्रिरात्रं स्यादशौचकं। एकोदकानां मरणे सूतके चैतदेव हि। पक्षिणी योनिसंबन्धे बान्धवेषु तथैव च। एकरात्रं समुद्दिष्टं गुरौ सब्रह्मचा
रिणि। प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितिः। तथा परपूर्वासु भार्यासु पुत्रे सुकृतकेषु च त्रिरात्रं स्यात्तथा चार्य्यस्वभार्यास्वन्यगासु च। आचार्य्यपुत्रपत्न्योश्च अहोरा
त्रमुदाहृतं। एकाहं स्यादुपाध्याये स्वग्रामे श्रोत्रियेषु च। त्रिरात्रमसपिण्डेषु स्वगृहे संस्थितेषु च। एकाहं चाप्यशुद्धिः स्यादेकरात्रं च शिष्यके। त्रिरात्रं श्वश्रूमरणे श्वशु
रे चैतदेव हि। सद्यःशौचं समुद्दिष्टं सगोत्रे संस्थिते सति। एकोदकानां समानोदकानां योनिसंबन्धे मातृष्वस्रीयपितृष्वस्रीयभागिनेयेषु बान्धवेषु पितृबान्धवेषु तथैव
चेति प्रागुक्तपक्षिणीत्यर्थः अन्यथा तदुपादानं व्यर्थं स्यात् अतएव दंतजातेनुजाते च कृते चूडे च संस्थिते। अप्रत्ता बान्धवाः सर्वे सूतके च तथोच्यते इति मनुवचने बान्ध
वाः सर्व इत्यत्र सर्वशब्दात्सपिंडानामेकाशौचं किन्तु सगोत्रसमानोदकमातृबन्धुपितृबन्धुप्रभृतीनां ग्रहणमिति हारलताव्याख्याने पितृबन्धूनामप्यशौचमुक्तं
संबन्धविवेके पितृबन्धूनामप्यशौचमुक्तं संगृह्यते पितृबान्धवाश्च। पितुः पितुः स्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः। पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः। अनुजा

२०

तइतिदत्तजातस्य प्रांनिर्दिष्टंशातदृष्टवत् शास्त्रेव्यवहारइतिन्यायेनजातदन्तादनुपश्चाज्जातोजातदन्तइत्यर्थः कृतचूडेचेतिचकारात्कृतोपनयनेचसंस्थितेमृतेऽप्रच
मृतस्यतन्नत्क्षौलत्वेदोपादानमशौचमेदायसचप्रागेवविहितः मातृबांधवेषुत्वेकरात्रंतथाचजाबालः। समानोदकानांच्यहोगोत्रजानामहः स्मृतः। मातृबंधौगुरौमित्रे
मंडलाधिपतौतथा। मातृबांधवाः मातुर्भ्रातुः स्वसुः पुत्राः मातुः पितुः स्वसुः सुता। मातुर्मातुलपुत्राश्च विज्ञेयामातृबांधवाः। गोत्रजाएकग्रामवासित्वेन विशेषणीयाः। तन्मरणे
इत्यत्तनिर्गुणानामहः। अन्येषांतुसद्यः प्रागुक्तकूर्मपुराणात्। मंडलाधिपतिर्यस्यमंडलेनिवासरूपेणास्थितिः क्रियते। कृतकेषुचेतिचकारात्क्षेत्रजादिषु। तथाचविराज्ञा तु
दृत्तौविष्णुः। अनौरसेषुपुत्रेषुजातेषुचमृतेषुच। परपूर्वासुभार्यासुप्रसूतासुमृतासुच। पितृमरणेषुतेषांत्रिरात्रंचमाहव्यल्लपुराणं। दत्तकश्चस्वयंदत्तकृत्रिमक्रीतएवच
अपविद्धाश्चयेपुत्राभरणीयाः सदैवहि। भिन्नगोत्राः पृथक्पिंडाः पृथग्वंशकराः स्मृताः। सूतकेमृतकेचैवत्र्यहाशौचस्यभागिनः। एतच्चकलौदत्तकपुत्रमात्रविषयं।
अन्येषांतुप्रागुक्तादिपुराणोनकारणानिषेधात्स्वभार्यास्वन्यगासुचसजातीयोत्कृष्टजातीयपुरुषान्तरसंगृहीतासु अपकृष्टजातिगमनेपतितत्वेनाशौचाभावात् असपिं
डेषुमित्रकुलजेषुश्रोत्रियरूपेषुमातृष्वश्रादिषुचस्वगृहेमृतेषुत्रिरात्रंतथाचप्रचेताः। मातृष्वसृमातुलयोःश्वश्रूश्वशुरयोर्गुरौ। सत्विजोपरतेचैवत्रिरात्रमितिशिष्यके।
एकाहंचएकारात्रंचेतिग्रहोरात्रंइत्यर्थः। श्वश्रूश्वशुरयोश्चस्वगृहभिन्नेपिसन्निधिमरणमात्रेत्रिरात्रं। श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेदितिमनुवचनेउपसंपन्नइत्यत्र
सन्निहितत्वेनाशौचविशेषदर्शनादत्रापितथाकल्प्यते अन्यथास्वगृहमात्रपरत्वेत्रिरात्रंसपिंडेषुस्वगृहेसंस्थितेशुचेत्यनेनसंबंधिमात्रपरेणकूर्मपुराणीयेनत्रिरात्रं श्वश्रूमरणेश्वशुरे

२· शु

श्रोत्रियमाह । एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य वा । षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित् । यत्तु पन्नवचनं । श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले
पित्रोः स्वसरि च द्व्यपक्षिणीं क्षपयेन्निशामिति मिताक्षरारत्नाकरयोर्दृष्टं मन्वनुवचनं च । मातुलश्वशुरे मित्रे गुरौ गुर्वङ्गनासु च । आशौचं पक्षिणीं रात्रिं मृता मातामही यदीति
तत्श्वशुरयोरेकग्रामस्थितयोः सन्निधिमरणे पक्षिणीविधायकं स्वग्रामे श्रोत्रियेषु चेत्यत्र स्वग्रामत्वेन विशेषदर्शनाद्वचनान्तरविरोधेन बहूनामेकधर्म्मिणामेकस्या
पिपरित्यज्यते । सर्वेषामेव तत्कुर्यादेकरात्राहितेस्मृता इति बोधायनस्वरसात् तथा कल्प्यते एवं च श्वश्रूश्वशुरयोर्विप्रकृष्टमेकरात्रं भिन्नग्राममरणविषयकं यथा आचार्य
पत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूश्वशुर्य्यसहाध्यायिशिष्येष्वेकरात्रेणेति । आचार्य्यपत्नीपुत्रयोर्मातुः सापत्न्यभ्रातर्य्येकाहोरात्रं मातुः सोदरेतु भिन्नस्थानमृतेप-
क्षिणी एवं हारलताप्रभृतयः । श्वश्रुर्व्यैश्यालके सहाध्यायिनि सतीर्थ्ये शिष्ये वैदेकदेशे वेदाङ्गाध्यायी । मनुः । मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च । अत्र पक्षि
णीविधानात् बान्धवपदं स्वबान्धवपरं स्वबान्धवाश्च मिताक्षरायां आत्ममातुः स्वसुः पुत्रा आत्मपितुः स्वसुः सुता । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः । मा
तृबन्धौ जाबालेनाहर्विधानादात्मबान्धवे तदधिकं युक्तं । रायमुकुटप्रभृतयोप्येवं एकरात्रमित्यत्र दृष्टान्तो विष्णुः । असपिण्डे स्ववेश्मनि मृते इति असपिण्डे अश्रो=
त्रियरूपे अश्रोत्रियत्वहः कृत्स्नमिति मनुवचनैकवाक्यत्वात् । ब्रह्मपुराणे । आदावेकस्यदत्तायां कुत्रचित्पुत्रयोर्द्वयोः । पितुर्यत्र त्रिरात्रं स्यादेकं तत्र सपिण्डनं । एका
माता द्वयोर्यत्र पितरौ द्वौ च कुत्रचित् । तयोः स्यात्सुतकादेकं मृतकाद्यपरस्परं । मथनमन्येनाढातेनैव जनितपुत्रा पुत्रसहिते वात्यमाश्रिता पश्चात्तेनापि जनित

21 पुत्रातयोः पुत्रयोर्यथासंभवं प्रसवमरणयो द्वितीयपुत्रपितुस्त्रिरात्रं एवंविधेत्रविषये यत्र परस्त्रीषु पुत्रजनकस्य त्रिरात्रं तत्र तत्सपिंडानामेकरात्रं तथाविधपुत्रयोः परस्परं जननम
रणयोर्मातृजात्युक्ताशौचं अत्र विशेषयति नारदः। जाता येत्व नियुक्तायामेकेन वहुभिस्तथा। अरिक्थभाजस्ते सर्वे वीजिनामेव ते सुताः। दद्युस्ते वीजिने पिंडं माता चेच्छु-
ल्कतो हृता। अशुल्कोपहृतायांतु पिंडदा वोढुरेव ते। अरिक्थभाजः स्वपिधारणामित्यर्थः एवकारेण क्षिपितृकत्वं निरस्तं तदेतत् शुल्कतस्त्रीसंग्रहे वोढव्यं शुल्काभावे
क्षेत्रिणएव पिंडदा इव श्राद्धविवेकः। वस्तुतस्तु प्रागुक्तां पुराणात् कलौ क्षेत्रजपुत्रकरणनिषेधात् सच पुत्रो जीवितानि दानीं व्यवहारोपि तथा।। जातोपि दास्यां शूद्रेण
कामतोंऽशहरो भवेत्। मृते पितरि कुर्युस्तं भ्रातरस्त्वर्द्धभागिनमिति याज्ञवल्क्यवचनाच्छूद्राणामेव तथा —— विधाचारोनान्यवर्णानामिति प्रागुक्त ब्रह्मपुराणवचनम २१ २३
पेतत्परं। यत्तु अन्यपूर्वा गृहे यस्य भार्या स्यात् तस्य नित्यशः। अशौचं सर्वकार्येषु देहे भवति सर्वथा दानं प्रतिग्रहः स्नानं सर्वं तस्य हि था भवेदिति ब्रह्मपुराणवचनान्तर
नपित कृहइत्युपादानात् समस्तगृहकार्याधिकारिणी यस्येत्यर्थः इति हारलतादत्तविषयकं। अत्र प्रतिग्रहश्रवणात् ब्राह्मणमात्रपरं वा यस्येति विप्रविशेषणात्वे
नप्युपपद्यते तथाच शंखः। हीनवर्णातु या नारी प्रमादात्प्रसवं व्रजेत्। प्रसवे मरणे तज्जमशौचं नोपशाम्यति। हीनवर्णा हि अत्र शूद्रा प्रमादात् परिणयं विना कृतसंग्रहात्
तेनयद्यपरिणीता शूद्रोत्तु सवर्णादपत्यमुत्पादयाति तदा तस्याः प्रसवमरणज मशौचं तद्गर्भजनकस्य यावज्जीवं भवतीत्यर्थः इति शुद्धिचिन्तामणिः। यत्तु शंखलि
खितौ अन्यपूर्वास्तु भार्यास्तु कृतकेषु मृतेषु च। नानध्यायो भवत्तत्र नाशौचं नोदकक्रिया इति तदपकृष्टजातिविषयं मिताक्षरायां वृद्धयाज्ञवल्क्यः। संस्थिते प-

क्षिणीं रात्रिं दौहित्रे भगिनीसुते । संस्कृतेषु त्रिरात्रं स्यादिति धर्म्मो व्यवस्थितः ॥ पित्रोरूर्ध्वं मे स्त्रीणां मूढानां तु कथं भवेत् । त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्मनुः । सं
स्कृते स्वयं दाहादिना संस्कृते तथा पैठीनसिः । असंबन्धिनो द्विजान् दहित्वा रहित्वा सद्यः शौचं संबंधे त्रिरात्रमिति । ऊढकन्यानां तु दाहादिकं विनापि अन्यथा दाहादिकं
विनापि तद्बोद्धुः शौचं न तस्याशतिः । महद्वैषम्यं स्यात् अत्रायं विशेषः दानाध्ययने वर्जयेत् न दशाहं मृतेषु सपिंडेषु गुरौ चासपिंडे त्रिरात्रमिति राचोर्ध्यं च्छित्याश्वलायन
वचनैर्दशाहाशौचमुपक्रम्यं त्रिरात्रविधानात् याहग्वयसि याहं मरणे सपिंडानां दशाहं तहग्वयसि ताहं मरणे आप्याचादीनां त्रिरात्रादि अन्यथा मातुलेपक्षिणीं रात्रि
मिति मनुवचनेनाजातदन्तमातुलमरणेपि भागिनेयस्य पक्षिणी तत् सपिंडानां सद्यःशौचं अदन्तजननात् सद्य इत्यादिनेति महद्वैषम्यं स्यात् अत्रानूढकन्यायाः पित्रा
दिमरणे संपूर्णाशौचं कार्यमिति मुकुटप्रभृतयः तत्र अपुत्रस्य चापाऽपुत्री सापि पिण्डप्रदा भवेत् । तस्य पिण्डान दशैतान रात्रकाहे नैव निर्वपेदिति यावदशौचं पिण्डानद
द्यादिति यमवचनयोरेकवाक्यतया एकाहे पिण्डदानविधानादेकाहाशौचावगतेः इत्थं च वाग्दानात्पूर्वमेकाहः वाग्दानात्परं तु त्रिरात्रमित्यनूढापाव्यवस्था । दृ
ष्ट्वा शतातपः । यदा भोजनकाले च अशुचिर्भवति द्विजः । भूमौ निःक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुद्ध्यति । भक्षयित्वा तु तं ग्रासमहोरात्रेण शुद्ध्यति । अशित्वा सर्वमे
वान्नं त्रिरात्रेण विशुद्ध्यति । अत्र भोजनगततारतम्ये न स्नानादिप्रायश्चित्तभेदात् नात्राशुचिपदं स्नानाहाशौचमात्रपरं । अन्यथास्नानविधाने व्यर्थं स्यात् मरणपुत्रजन्म
स्नानादेव तत्प्राप्तेः किन्तु सपिंडसमानोदकजननाद्यादिमरणाशौचिपरमपि अविशेषात् अतएव शुद्धिः सूतकादिनेत्यर्थः इति प्रायश्चित्तविवेकः अहोरात्रेण

२२ उपोषितेन एवं चिराचेण प्रायश्चित्तकरणात्॥ ९॥ अथमृत्युविशेषाशौचं॥ कूर्म्मपुराणे व्यापादयेद्यथात्मानं स्वयं योग्न्युदकादिभिः। विहितं तस्य नाशौचं नाग्निर्नाप्युदका
दिभिः। अथ कश्चित्प्रमादेन म्रियताग्निविषादिभिः। तस्याशौचं विधातव्यं कार्य्यं चाप्युदकादिकं। आत्मानं स्वदेहं स्वयमित्युपादानात् एवं चावैधबुद्धिपूर्वकात्मघातिनो ऽशौ
चेप्युदकेतदित्तस्याशौचप्राप्तौ यत् पुनरभिहितमकथश्चित्प्रमादेनेत्यादिना तदग्न्यादिभिः प्रमादमृते सत्यशौचविशेषज्ञापनार्थं न च काश्यपोक्तं चिराचं अग्निविषादि
भिरित्यादिपदं रोगव्यतिरिक्तहेतुपरं काश्यपः। अनशनमृतानामशनिहतानामग्निजलप्रविष्टानां भृगुसंग्रामदेशान्तरमृतानां गर्भानां जातदन्तानां चिराचमिति अन
शनमृतानां शास्त्रानुमत्या तत्फलान्याह दानरत्नाकरे नरसिंहपुराणे जलप्रवेशी चानन्दं प्रमोदं वह्निसाहसी। भृगुप्रपाती सौख्यं च रणे चैवातिनिर्मलं। अनशन
मृतो यः स्यात् स गच्छेत्तु त्रिपिष्टपं। आनन्दादयस्तु स्वर्गविशेषाः एकविंशत्यमी स्वर्गा निविष्टा मेतमूर्द्धनीत्युपक्रम्याभिधानात्। कौर्म्मे। यः सर्वपापयुक्तोपि पुण्यतीर्थे २२ शु
षु मानवः। नियमेन त्यजेत्प्राणान् मुच्यते सर्वपातकैः। नियमेन तत्तत्संकल्पपूर्वकजलप्रवेशादिना जलप्रवेशादिकं तु कलौ शूद्रस्यैव ब्राह्मणानामादिपुराणेन
सगुणाद्यशौचप्रकरणोक्तेन निषेधात् यथा प्रायश्चित्तविधानं च विप्राणां मरणान्तिकं। भृग्वग्निमरणं चैव वृद्धादि मरणान्तथा इत्यादीन्यभिधाय एतानि लोकगुप्त्य
र्थं कलेरादौ महात्मभिः। निवर्त्तितानि कर्म्माणि व्यवस्थापूर्वकं द्विजैः। तीर्थकाण्डकल्पतरावादित्यपुराणे च कीदृशैस्तु तपोदानैः पुरीं पश्यन्ति मानवाः॥ भा
नुरुवाच। राज्यार्थं निहता ये च राजानो धर्म्मतत्पराः। अग्निविद्युद्धता ये च सिंहव्याघ्रहताश्च ये। आप्नुवन्ति च ते सर्वे पुरीमेतावतीं शुभां। साक्षाद्धि भगवानग्निर्नो

गस्य वसते सुखे । सिंहव्याघ्रगजेन्द्राणां विष्णोरेव व्यवस्थितः। विद्युदग्निहताये च सिंहव्याघ्रहताश्च ये। नागैश्चैव हताये च ते नराः पुण्यकर्म्मिणः। एतच्च प्रमादद्वैधा
न्यतरकृतविषयं। अशनिहतानां प्रमादात् भृगुरुच्चप्रदेशः। ब्रह्मपुराणं। प्रमादादपि निःशंकस्त्वकस्माद्विधिचोदितः। शृंगिदंष्ट्रिनखिव्याल विषविद्युज्जलादिभिः।
चांडालैरथवाचौरैर्निहते वापि कुत्रचित्। तत्रं दाहादिकं सर्वं यस्मान्नपतितश्च सः। शृंगिदंष्ट्रिनखिव्यालविषवह्निस्त्रियाजलैः। आदरात् परिहर्त्तव्यः कुर्वन् क्रीडां मृ
तस्तु यः। नागानां विप्रियं कुर्वन् दग्धश्चाप्यथ विद्युता। निगृहीतस्वयंराज्ञा चौर्य्यदोषेण कुत्रचित्। परदारान्रमन्तश्च द्वेषात्तत्पतिभिर्हताः। असमानैश्च संकीर्णैश्चा
ण्डालैश्च विग्रहं। कृत्वा तैर्निहतास्तांस्तु चाण्डालादीन् समाश्रिताः। गराग्निविषदाश्चैव पाषण्डाः क्रूरबुद्धयः। क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलं। गिरिवृक्ष
प्रपातं च ये कुर्वन्ति नराधमाः। कुशिल्पजीविनश्चैव सूनालंकारकारिणः। मुखेभगाश्च ये केचित् क्लीवप्राया नपुंसकाः। ब्रह्मदंडहताये च ये च वै ब्राह्मणैर्हताः।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः। पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसंचयः। न चाश्रुपातः पिंडो वा कार्य्यं श्राद्धादिकं क्वचित्। एतानि पतितानां तु यः करोति
विमोहितः। तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा। प्रमादात् अनवधानात् निःशंकः दंष्ट्रिशृंगिनखादिहिंस्रजन्तुसन्निधिशंकारहितः पुरुषो विधिचोदितो मरणाक
र्मणि प्रेरितः स न पलायनासमर्थोऽकस्मात् झटिति शृंगादिभिर्हतो भवति तदा सर्वमेव दाहादिकं कर्त्तव्यं। संकीर्णैः प्रतिलोमसंकरजैः। असमानैरित्यनेन ब्राह्मणादी
नामेव न तु चांडालादीनामन्योन्यकलहेन गरं व्याधिजनकमौषधं क्वचिन्न विषयमिति कश्चित् पाषण्डा इति वेदबाह्य रक्तपटमौण्डादिव्रतचर्य्या पाषण्डं तद्देषामस्ती

23

त्वंशो आदित्यादजिति पाणिनीयाः अदितिकल्पाः अतएवपाषंडमाश्रितास्तेनाइतियाज्ञवल्क्यः। क्रूरबुद्धयोनित्यं परापकारएवबुद्धिर्येषां तेनतन्निन्दमोहमत्स्यपुराणे वि
षाग्निसर्पशस्त्रेभ्योनतथाजायतेभयं। अप्रकारणाजगद्वैरिघातकेभ्योजायतेयथा। कुशिल्पजीविनः सज्जातीयाएवचर्म्मस्यूदि भयपात्रनिर्म्मितारः सूत्रालंकारिणोमनुष्यव
धस्थानाधिकारिणः मुखेभगाः कंठदशोत्पन्नभगाउत्कलदेशे ताहृशरोगयुक्तत्वेनस्तु प्रसिद्धाः। क्लीवप्रायानपुंसकाः इति चतुर्दशप्रकारानपुंसकानारदेनोक्ता तत्रकेचि
त्पुरुषकर्म्मकरणासमर्थाः केचित्पुरुषकर्म्मकरणासमर्थास्तु क्लीवप्रायाः ब्रह्मदण्डहताब्राह्मणाविषयापराधकरणान्निहताइत्यनिरुद्धभट्टाः। येत्वेवंब्राह्मणेर्हिताइ
ति तन्मन्युत्पादनादपि चोरेणाशापेन शस्त्रादिनावाप्रायश्चित्तविवेकोप्येवं। तत्रविप्रतिरस्कारादि फलपरिपाककालमाहपराशरः। कृतेतात्कालिकं पापं त्रेतायां दशभि
र्दिनैः द्वापरेचैकमासेनकलौसंवत्सरेणतु। तदितरत्रमरीचिः विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातीनां। चतुर्दश्यां क्रियाकार्य्याअन्येषांतुविगर्हिता। संग्रामे विशे २३ शु
षमाह अग्निपुराणे। दंष्ट्रिभिः शृंगिभिर्वापि हता म्लेच्छैश्चतस्करैः। येस्वाम्यर्थे हतायान्तिराजानस्वर्गसंशयः। तथासर्वेषामेववर्णानांक्षत्रियस्यविशेषतः। विष्णुधर्मो
त्तरे। स्वाम्यार्थेब्राह्मणार्थेवामित्रकार्य्येचयेहताः। गोग्रहेनिहतायेचतेनराः स्वर्गगामिनः। तस्माच्चांडालाद्येश्चविग्रहमिति यदुक्तंतत्क्रीडापरं। भविष्यपुराणेपि
मध्यतंत्रषष्ठाध्याये। श्रणुकुष्ठगणंविप्रा उत्तरोत्तरतोगुरुं। विचर्चिकातुदुश्चर्म्मा चर्चरीयस्तृतीयकः। विकर्चुर्व्रणनामाच कृष्णश्वेतेतथाष्टकं। एषांमध्ये-
तुयः कुष्ठी गर्हितः सर्वकर्म्मसु। व्रणावत्सर्वगात्रेषु गंडेमालेतथानति। तथाच। मृतेचाप्रापयेतीर्थे अथवातरुमूलके। नोपिंडंनोदकंकार्य्यं नचदानक्रियाचरेत्

षाण्मासीयत्रिमासीयमतः कुष्ठी कदाचन। यदिस्त्रेहाद्वे द्वाहं पति चान्द्रायणं चरेत्। यति चान्द्रायणाशक्तौ पादोनधेनुचतुष्टयं देयं। अतिपातकशेषफलत्वादप्येवं युक्तं
यथा विष्णुः। अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुषे लक्षणानि भवन्ति कुष्ठ्यतिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः स्वर्णहारी कुनखी गुरुतल्प
गो दुश्चर्म्मा इत्यादि श्यावदन्तः स्वभावकृष्णदन्त उपरिदन्तद्वयमध्ये क्षुद्रदन्त इति केचित् कुनखी सङ्कुचितनखः दुश्चर्म्मा अप्राकृतमेदः अत एव महारोगिणो यावज्जी
वमशौचमाह कूर्म्मपुराणं क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याहुर्मरणान्तमशौचकं। क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः मूर्खस्य
गायत्रीरहितस्य महारोगिणाः पापरोगाष्टान्यतमरोगवतः ते च उन्मादस्त्वग्दोषो राजयक्ष्माश्वासो मधुमेहो भगन्दरो महोदरोऽश्मरीत्यष्टौ महारोगा देवलोक्ताः।
यथेष्टाचरणस्य द्यूतवेश्याद्यासक्तस्य एवं च भविष्यपुराणोक्त यतिचान्द्रायणप्रायश्चित्तमकृतप्रायश्चित्तानां कुष्ठ्यादीनां दाहे बोध्यं अन्यथैषां प्रायश्चित्तोपदेशो वि
फलः स्यात् यथा विष्णुः। कुनखी श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वा उद्धरेयातां दन्तनखमिति अत्र द्वादशरात्रसाध्यं पराकरूपं तत्र पंच धेनवः तन्मूल्यं पंच दर्शी
कार्षापणं वा न तु प्राजापत्यं तद्वाहकर्तुः यतिचान्द्रायणेन विशमशिष्टत्वात्। अत एव बहूनामेकधर्म्माणामिति वचनादाकांक्षितत्वात् कुष्ठ्यादीनामपि प्रायश्चि-
त्तं अत एव प्रायश्चित्तविवेकेप्युक्तं। एवं दुश्चर्म्मादिष्वप्युह्यं महापातकादतिपातकस्य गुरुत्वादस्य शेषेपि प्रायश्चित्तं द्विगुणं कर्म्मविपाकेपि शातातपः। महापा
तकजं चिह्नं सप्तजन्मनि जायते। बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः। कुष्ठं च राजयक्ष्मा च प्रमेहो ग्रहणी तथा। अत्र कुष्ठपदमत्यकुष्ठपरमिति पूर्वेणाविरोधः

23 एवंचैतेनैकादशवर्षस्य पंचवर्षाधिकस्य च । चरेत् गुरुः सुहृद्वापि प्रायश्चित्तं विशुद्धये इत्यंगिरोवचने । रोगी वृद्धस्तु पौगंडः कुर्वन्त्यन्ये व्रतं सदा इति ब्रह्मपुराणे च । अन्य
पापक्षयार्थं अन्यकर्तृकप्रायश्चित्तदर्शनात् तुल्यन्यायतयापि स्वयमकृतप्रायश्चित्तस्य मृतस्य पुत्रादिना प्रायश्चित्तं कृत्वा दाहादिकं कार्य्यं मतः । शस्त्रेणाभिमुखो
यस्तु वध्यश्च क्षात्रधर्म्मेण । यत्नसंतिष्ठते तस्य सद्यः शौचं विधीयते । क्षात्रधर्म्मेण अकातरत्वादिना यत्नः पिण्डदानादिरूपः संतिष्ठते समाप्तिमेतीति रत्नाकरः । य
शज्योतिष्टोमादिस्तस्य भवतीति । प्रसंगादुक्तमिति प्रकाशकारः । ब्राह्मणार्थे विपन्नानां दंडिनां गोग्रहे तथा । आहवेषु विपन्नानामेकरात्रमशौचकं । गवार्थे ब्राह्म
णार्थे संग्रामे दंडेन युध्यमानानां मरणे एकरात्रमशौचं । बृहस्पतिः । डिम्बाहवे विद्युता च राज्ञा गोविप्रपालने । सद्यः शौचं मृतस्याहुः त्र्यहं चान्ये महर्षयः । डिम्बा
हवेन्नृपतिरहितयुद्धे शस्त्रैरभिमुखैः हतस्य सद्यः शौचं लगुडादिहतस्य परांमुखहतस्य च त्रिरात्रं वज्रादिघातेन मरणं भवतीति अभिसन्धायस्थितस्य मरणे २४
सद्यः शौचं प्रमादात् त्रिरात्रं राज्ञा वधार्हापराधहतस्य सद्यः शौचं तदन्यस्य त्रिरात्रं गोविप्रपालनेऽभिमुखत्वपरांमुखत्वाभ्यां सद्यस्त्रिरात्रे । व्याघ्रः क्षतेन म्रियते य
स्तु तस्याशौचं भवेद्द्विधा । आसप्ताहात् त्रिरात्रं स्यात् दशरात्रमतः परं । शस्त्रघाते त्र्यहादूर्ध्वं यदि कश्चित् प्रमीयते । अशौचं प्रकृतं तत्र सर्ववर्णेषु नित्यशः ।। विधाछं=
दस्य वचनं यथेति क्वचित्पाठः । अत्र क्षतपदं शस्त्रघाते रक्षतपरं शस्त्रघातपदं च पारिभाषिकशस्त्रघातपरमपि यथा देवीपुराणे । पक्षिमत्स्यमृगैर्यैस्तु दंष्ट्रिशृं
गिनखैर्हतां । पतनानशनप्रायैर्वज्राग्निविषबंधनैः । मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः । अन्यथा क्षतं विना पतनादिभिर्विलंबमृतानां दिनग्रहणेऽनध्यव

साय:स्यात् न च शास्त्रीयव्यवहारेणांतरंगत्वात् पारिभाषिकग्रहणस्यैव युक्तेति वाच्यं श्राद्धे पारिभाषिकग्रस्य घातग्रहणवदत्रापि तथा प्रयुक्तत्वात् पारिभाषिकत्वादेव
न प्रकरणान्नियम॥ ० ॥ अथ सद्यःशौचं ॥ ० ॥ विष्णुः ॥ नाशौचं राज्ञो राजकर्म्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां स्वकर्म्मणि न राजाज्ञाकारिणां तदिच्छया
न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोरिति सत्रिणां नित्यप्रवृत्तान्नदानानां सत्रेऽन्नदाने कारवः सूपकाराद्याः । आदित्यपुराणे । सूपकारेण यत्कर्म्म करणीयं नरेष्वि
ह । तदन्यो नैव शक्नोति तस्माच्छुद्धः स सूपकृत् । कूर्म्मपुराणे । कारवः शिल्पिनो वैद्या दासीदासास्तथैव च । दातारो नियमी चैव ब्रह्मविद्ब्रह्मचारिणौ । सत्रिणो व्र
तिनस्तावत्सद्यःशौचाः प्रकीर्त्तिताः । आदित्यपुराणे ॥ शिल्पिनश्चित्रकाराद्याः कर्म्म यत्साधयन्त्युत । तत्कर्म्म नान्यो जानाति तस्माच्छुद्धः स्वकर्म्मणि । दासी
दास्यश्च यत्कर्म्म साधयन्त्यपि लीलया । तदन्यो न क्षमः कर्त्तुं तेन ते शुचयः स्मृताः । चित्रकाराद्यरूपासिल्पिनः । आद्यशब्दाच्छैनशिलेजकाद्याः । शातातपः । मू
ल्यकर्म्मकराः शूद्रा दासीदासास्तथैव च । स्नाने शरीरसंस्कारे गृहकर्म्मण्यदूषिताः ॥ स्मृतिः । सद्यःस्पृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः । वैद्याश्चापि चिकित्सा
यामेव तथा च स्मृतिः । चिकित्सको यत्कुरुते तदन्येन न शक्यते । तस्माच्चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः । दातारश्चावश्यकप्रत्यहगोहिरण्यादिदाने प्र
वृत्तास्तेषां तद्दानएव प्रत्यहं दानं च प्रत्यहं पाचइति याज्ञवल्क्यात् कादाचित्कदानकारिणां तु दाने प्रक्रान्ते शौचं नास्ति तावत् यावत्कर्म्म करोति हारलतायां एवं
पूर्वसंकल्पितद्रव्यदानेपि नाशौचं तथा च मिताक्षरायां । क्रतुः । पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति । आदित्यपुराणे । निष्टत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ।

25 गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित्। निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्म्मणि। निमंत्रणाद्धि विप्रस्य स्वाध्यायादिरतस्य च देहे पितृगणस्तिष्ठत्यतो नाशौचं विद्यते
क्वचित्। प्राजापत्यादिकृच्छ्रे सत्रान्ते होमयागजपेषु समाप्तेषु संपूर्णार्थं मयाब्राह्मणा न भोजयितव्या इति गृहीतनियमो यस्तस्याशौचेऽन्यकुलजानामपि मृतजननादिदोषा
भावः कस्यचिदिति दातृभोक्त्रोरित्यर्थः। एवं प्रारब्धश्राद्धेऽपि क्वचिदित्यनेन दातृभोक्त्रोरशौचाभावः। तथा च विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे। आरब्धे
सूतकं न स्यादनारब्धे तु सूतकं। पराशरः। दीक्षितेष्वग्निचित्येषु व्रततीर्थपरेषु च। तपोदानप्रसक्तेषु नाशौचं मृतसूतके। यजमानानां सोमयागाग दीक्षणीयेष्टौ कृता
यां दीक्षितत्वं भवति तेन दीक्षणीयेष्ट्युत्तरकालं। यजमानस्य यत्कर्म्म तत्राशौचं नास्ति अग्निचित्येषु क्षत्रियनृपतिषु तीर्थ· गंगादिगुरुरिति कश्चित् कालमाधवीये कूर्म्मपु
राणं। काम्योपवासप्रक्रान्ते अन्तरामृतसूतके। तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितं। तत्र स्नानार्चनं स्वयं विवर्जयेत् अन्यद्वारा तु कारयेदिति तथा च मत्स्यपुराणं २५ ३
गर्भिणी सूतिका नक्तं कुमारी च रजस्वला। यदाशुद्धा तदान्येन कारयेत् क्रियते सदा। उपवासाचरणे गर्भादिपानसम्भावनायां नक्तं भोजनं कुर्य्यात्। उपवासेष्वशक्तानां
तदेव फलमिच्छतां। अनभ्यासेन रोगाणां किमिष्टं व्रतमुच्यतां इति नारदप्रश्नानंतरं उपवासेष्वशक्तानां नक्तभोजनमिष्यते इति मत्स्यपुराणे ईश्वरप्रतिवचनात् स्व
यमशुद्धावशुद्धद्वारा पूजादिकं कारयेत् कायिकमुपवासादिकं सदाशुद्धशुद्धिकाले स्वयं क्रियते स्मृतिपरिभाषायामप्येवं विष्णुः। बहुकालिकसंकल्पो गृहीतश्च पुरा
यदि। सूतके मृतके चैव व्रतं तन्नैव दुष्यति। एतत्काम्यव्रतपरं। नित्यानान्त्वारब्धानारब्धानामविशेषेण कर्त्तव्यता नाशौचे नित्यतुष्टौ ब्रह्मपुराणं। नैष्ठिकस्याथ

वात्यस्य भिक्षार्थं प्रस्थितस्य च। नैष्ठिकस्य ब्रह्मचारिविशेषस्य अन्यस्य चतुर्थाश्रमिणः संन्यासिनः अशौचमिति स्याग्रहणे दोषाभाव इति हारलतादयः कौर्म्मे॥ सद्यः
शौचं समाख्यातं दुर्भिक्षे चाप्युपद्रवे। डिम्बाहवहतानां च विद्युता पार्थिवैर्द्विजैः। सद्यः शौचं समाख्यातं शापादिमरणे तथा। उपद्रवे राजविप्लवे औपसर्गिकात्यन्तमरक
पीडायां च तथा च पराशरः उपसर्ग मृते चैव सद्यः शौचं विधीयते। अतएव आपद्यपि च कष्टायां सद्यः शौचं विधीयत इति याज्ञवल्क्यवचने ऽनिरुद्धभट्टशूलपा
णिप्रभृतिभिरौपसर्गिकात्यन्तमरकपीडायां सद्यः शौचमित्युक्तं उपसर्गश्च त्रिविधोत्पातः तथा च गर्गसंहितावार्हस्पत्ययोः अतिलोभादसत्याद्वा नास्तिक्याद्वाप्य
धर्म्मतः। नराचारात्त्रिपसर्गः स्मृतो रोगभेदोपपलवायारपीति विश्वकोषादुपसर्गपदस्य उभयवाचकत्वं तथाप्य त्रमुनिप्रयुक्तत्वे नान्तरंगत्वात् त्रिविधोत्पातरूप
उपसर्गो गृह्यन्ते ननु रोगविशेषालक इति स्मृते नोपसृजन्तीति व्युत्पत्त्या देहाभ्यन्तर एव यावद्वर्त्तते तावत्कालमरणएव सद्यः वहिर्भावे त्वशापं परया मरणे सति
स्वजात्युक्तमेवेति अहनिति दर्पणस्मृतिसारप्रदीपा इति वाचस्पतिमिश्रोक्तं हेयं। द्विजैर्ब्राह्मणैः शापादित्यादिशब्देनाभिचारमृतस्य ग्रहणं ब्रह्मकूर्म्मपुराणाभ्यां
यद्ब्राह्मणा इत्यस्याशौचाभाव उक्तः स बुद्धिपूर्वकहनने बोध्यः। प्रमादमृतेत्वशौचाद्यस्त्येव अन्यथा मरीचिवचनं निर्विषयं स्यात् यथा विषशस्त्रश्वापदाहिति
र्यग्ब्राह्मणघातिनां। चतुर्दश्यां क्रियाकार्या अन्येषान्तु विगर्हिता। विषादिसाहचर्याद्ब्राह्मणाहतघातोस्यास्तीति प्रतीयते यच्चाङ्गये च वैर्ब्राह्मणैर्हिता इति ब्रह्मपुरा
णीयं साधकत्वेनोपन्यस्तं। श्राद्धविवेके तच्चिन्त्यं महापातकिनो ये च पतितास्ते प्रकीर्त्तिता इत्युत्तरार्द्धे पतितमभिधायते ऽपां श्राद्धनिषेधात् जाबालः॥ ० ॥

२६ दुर्भिक्षे राष्ट्रसंपाते शस्त्रगोब्राह्मणघातिते। पतिते नष्टे न प्रेते विदेशस्थे शिशौ न च। नाशौचमित्यर्थः॥ अथ शवानुगमनाशुद्धिः॥ कूर्म्मपुराणे। प्रेतीभूतं द्विजं विप्रो योऽनुगच्छ
ति कामतः। स्नात्वा सचेलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति। एकाहात्क्षत्रिये शुद्धिर्वैश्ये च स्याद्द्व्यहेन तु। शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः। अत्रातुः स्नानार्थ
ष्ट त च घृतप्राशनं शुद्धिहेतुत्वान्नियमपरं। न तु प्रायश्चित्तवद्भोजनाभावपरं। तच्च तपस्त्वात्तथा यत्तथात्रैव स्वयं वचनं। ब्राह्मणेनानुगन्तव्यो न तु शूद्रः कथंचन।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः। तत्प्रमादादनुगमने कथंचनेत्यभिधानात्। अम्भसि नन्द्युतोदकेन मनुः। नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो
विशुद्ध्यति। आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य च। आलभ्य स्पृष्ट्वा अज्ञानत इदं ज्ञानतोऽन्यन्ताभ्यासे तु पैठीनसिः। असम्बन्धिनो द्विजान्दहित्वा वहित्वा
सद्यः शौचं सम्बन्धे त्रिरात्रमिति संबंधेतद्युतो मातुलादिः कौर्म्मपुराणे अनाथस्यैव निर्हृत्य ब्राह्मणं धनवर्जितं। स्नात्वा संप्राश्य तु घृतं शुद्ध्यन्ति ब्राह्मणादयः २६ शु
तथा यो यनिर्द्दहति प्रेतं प्रलोभात्क्रान्तमानसः। दशाहेन द्विजः शुद्ध्येद्द्वादशाहेन भूमिपः। अर्द्धमासेन वैश्यस्तु शूद्रो मासेन शुद्ध्यति। तथा अवरं श्चेद्वरंवर्णा
मवरं वा वरो यदि। अशौचे संस्पृशेत्स्नेहात्तदाशौच्येन शुद्ध्यति। तदाशौच्येन तदीयाशौचेन तथा आदिपुराणे। योऽन्यवर्णान्तु मूल्येन नीत्वा चैव दहेन्नरः। अ
शौचन्तु भवेत्तस्य प्रेतजातिसमं तदा। मनुः। असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्। विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्। यद्यन्नमत्ति तेषान्तु दशाहेनैव
शुद्ध्यति। अन्नदन्नमह्नैव न चेत्तस्मिन् गृहे वसेत्। बन्धुवत्स्नेहाद्बन्धुवत्स्यात् अशौचि गृहवासे तदन्नभक्षणरहितानां त्रिरात्रं तद्गृहवसे तदन्नभोजनरहितानां स्नेहा

दसंबंधिनो निर्हरणेऽहोरात्रं बांधवेषु तु अदृष्टबुध्या तद्गृहवासाद्यभावेपि निर्हरणे त्रिरात्रं विष्णुः। चिताधूमसेवने सर्वे वर्णाः स्नानमाचरेयुः। पारस्करः। अस्थिसंचयनादर्वा
ग्दिविप्रोऽश्रुपातयेत्। मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति। अस्थिसंचयनादूर्ध्वं मासं यावद्द्विजातयः। दिवसेनैव शुध्यन्ति वाससां क्षालनेन च। स्वजातेर्दिवसेनैव
द्व्यहात्क्षत्रियवैश्ययोः। स्पर्शं विना तु गमने शूद्रेणोक्तं न शुध्यति। मृतस्य बान्धवैः सार्द्धं कृत्वा तु परिदेवनं। वर्जयेत्तदहोरात्रं दानं स्वाध्यायकर्म च। गृहगमन एव त्रिरा
त्रं स्यानान्तरमेलके एकरात्रं मृतस्य शूद्रस्य परिदेवनं रोदनरहित विलापमात्रं। अस्थिसंचयनोऽगस्पर्शयोः कालमाह संवर्त्तः। चतुर्थेऽहनि कर्त्तव्यमस्थिसंचयनं द्विजैः
ततः संचयनादूर्द्ध्वमंगस्पर्शो विधीयते। चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य च। अष्टमे दशमे चैव स्पर्शः स्याद्वैश्यशूद्रयोः। एतत्पूर्णाशौचे खंडाशौचे तु देवलः। अ
शौचकालाद्विज्ञेयं स्पर्शनं तु विभागतः। अतिक्रान्ताशौचे तु सचेलस्नानादेवांगास्पृश्यत्वनिर्वृत्तिः। पूर्वोक्तनिर्द्देशमितिमनुवचनात् जनने तु कूर्म्मपुराणे। सूतके तु
सपिंडानां संस्पर्शो नैव दुष्यति। मातृणान्त्वादिपुराणे। ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः। गतैः शूद्रा तु संस्पृश्या त्रयोदशभिरेव च। पुत्रजननेपि तु विमातॄणां च
स्नायात्स्पृश्यत्वं सूतिकास्पर्शे तत्समकालास्पृश्यत्वं च वक्ष्यते। तत्रैव वृद्धशातातपः। उदक्या सूतिका वापि अन्त्यजं संस्पृशेद्यदि त्रिरात्रेणैव शुद्ध्येत इति शाता
तपोऽब्रवीत्। उदक्या रजस्वला तत्साहचर्यात् सूतिकापयस्पृश्या बोध्या त्रिरात्रेण त्रिरात्रोपवासेन प्रायश्चित्तप्रकरणात् तच्च शुद्ध्यनन्तरं कर्त्तव्यमिति प्रायश्चित्तवि
वेकः। यमः। अजागावो महिष्यश्च ब्राह्मणी च प्रसूतिका। दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकं॥ ब्रह्मपुराणे। नवखातजलं गावो महिष्यश्छागयोनयः। शुद्ध्य

२७ न्तिदिवसैरेवदशभिर्नात्रसंशयः। मिताक्षरायांस्मृतिः॥ कालेनवोदकं शुद्धं नपातव्यन्तु तत्र्यहं। अकालेतद्दशाहंस्यात्पित्रानाद्यादहर्निशं। कालेवर्षाकाले। शंखः। स्नान
माचमनंदानंदेवतापितृतर्पणं। शूद्रोदकैर्नकुर्वीततथामेधाविनिःसृतैः। पानादितरस्पर्शादौतु हरिवंशे। अम्भोममम्भोविसृजन्तिमेघाः पूतंपवित्रंपवनैः सुगन्धिः
अथद्रव्यशुद्धिः। ब्राह्मे। सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानिच। कांश्यायस्ताम्ररैत्यानित्रपुसीसमयानिच। निर्लेपानिविशुद्ध्यन्ति केवलेनजलेनतु। शूद्रोच्छिष्टानि
शुद्ध्यन्तित्रिधाक्षाराम्लवारिभिः। सूतिकाशवविण्मूत्ररजस्वलाहतानिच। प्रक्षेप्तव्यानितान्यग्नौयच्चयावत्सहेदपि। रैत्तुंपित्तलं त्रपुरंगं यत्पात्रं यावत्कालमग्निंसह
तेतत्पात्रं प्रक्षपणानान्तरं तावत्तापनीयमित्यर्थः। बृहस्पतिः। अम्भसाहेमरूप्यायःकांस्यंशुद्ध्यतिभस्मभिः। अम्लैस्ताम्रंचरैत्यं च पुनः पाकेनमृन्मयं॥ राजधर्मे॥ ॥
पर्जन्योच्छिष्टकांस्यंयत्नवाघ्रातमथापिवा। गंडूषोच्छिष्टमपिच विशुध्येद्दशभिस्तुतत्। दशभिर्दिनैरितिशेषः। तथाचनकांश्येधारयेत्पादौपत्रस्यादपिभोजनमिति २७
यत्रपात्रान्तरेभोजनं तत्रापिश्रुतस्यैव तस्यसाहचर्यात् कांस्यवच्छुद्धिः। बौधायनः। भिन्नकांश्येतुयोस्नीयान्नघांस्नात्वाजपनद्विजः। गायत्र्यष्टसहस्रं च एकभक्तास्त
तःशुचिः। अष्टसहस्रमष्टोत्तरसहस्रं अन्यथावक्तुवचनापत्तेः। देवलः। ताम्ररत्नादस्तु वर्णाभ्रस्फटिकानां भिन्नमभिन्नमितिनादोषइत्यर्थः। विष्णुः शारीरैर्म
लैःसुराभिर्मद्यैर्वायदुपहतं तदत्यन्तोपहतं अत्यन्तोपहतं सर्वं लौहभांडमग्नौप्रतप्तं शुद्ध्येत। मणिमयमश्ममयं चसप्तरात्रंमहीखननेन श्रृंगदन्तास्थिमयंचसप्त
रात्रंतक्षणेनदारुमयं मृण्मयंजह्यादिति लौहपदं सुवर्णाद्यष्टकपरं सर्वंचतैजसं लौहमित्यमरकोषात्। मनुः॥ चीनिदवाः पवित्राणिब्राह्मणानामकल्पयन् ॥

ऽप्रदुष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते। इति शूलपाणिमहामहोपाध्यायकृतस्मृतिकौमुद्यां॥ शातातपः। गोकुले कन्दुशालायां तैलयंत्रेक्षुयंत्रयोः। अमीमांस्यानि शौचानि स्त्रीषु बाला
न्तरेषु च। अमीमांस्यानि शौचाशौच मार्गितपान विचारणीयानि॥ मनुः। मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः। रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत्॥ बौधायनः। अ
दुष्टाः सन्तता धारा वातोद्धूताश्च रेणवः॥ आकराः शुचयः सर्वे वर्जयित्वा सुराकरं। शंखलिखितौ। आकरद्रव्याणि प्रोक्षितानि शुचीनि॥ यमः। आममांसं घृतं क्षौद्रं स्नेहाश्च
फलसंभवाः। म्लेच्छभाण्डस्थिता दुष्टा निष्क्रान्ताः शुचयः स्मृताः। विष्णुधर्मोत्तरे मुखवर्ज्यं च गौः शुद्धा मार्जारश्चंक्रमे शुचिः। पुष्पाणां च फलानां च प्रोक्षणाच्छुद्धिरिष्यते।
बौधायनः। मक्षिका सन्तता धारा भूमिस्तोयं हुताशनः। मार्जारश्चापि दर्वीं च मारुतश्च सदा शुचिः। बौधायनः॥ अनेकोच्चारितदारुशिलाभूमिसमेष्टकाश्च संकीर्णीभूता इति।
संकीर्णीभूताः परस्परसंबद्धाः। विष्णुः। प्रोक्षणेन पुस्तकमिति। शातातपः। तापितं घृततैलानां प्लावनं गोरसस्य च। तन्मात्रशुद्धितं शुद्ध्येत्कठिनन्तु पयो दधि॥ अविलीनं
तथा सर्पिर्विलीनं कठिनं मनुः। द्रव्याणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतं। उत्पवनं वस्त्रान्तरितनिर्यापनेन कीटाद्यपनयनं। शातातपः। क्लीबैर्वा भिः सत्पतितैः सूतिकोदक्य
नास्तिकैः। दृष्टं वास्याद्यदन्यत्तु तस्य निष्कृतिरुच्यते। अभ्युक्ष्य किंचिदुद्धृत्य भुंजीताप्यविशंकितः। देवलः। चाण्डालेन शुना वापि दृष्टं हविरयज्ञियं विडालादिभिरुच्छि
ष्टं दुष्टमन्नं विवर्जयेत्। अन्यत्र हिरण्योदकस्पर्शादिति शुद्धिरित्यनुवृत्तौ। विष्णुः। गुडानामिक्षुविकाराणां प्रभूतानां वाप्यग्निदानेन सर्वेलवणानां चेति। सूतिकास्पर्शतः पि
तुरपि ताद्दृशमङ्गास्पृश्यत्वमाह स मनुः। मातैरेव सूतकं तां स्पृशतश्च पितुर्नेतरेषामिति। इतरेषां सपत्नीमातृव्यतिरिक्तानां। तासां तु सूतिकास्पर्शे पितुर्यथा यावद्शौचमंगा

28 स्पृश्यत्वं तथा तासामपि तथा चादिपुराणं। सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः। कृत्वा सचेलं स्नानं तु शुद्धो भवति तत्क्षणात्। अन्याश्च मातरस्तद्वन्नदेहं नवजन्ति
चत। तद्वत् पितृवत् स्नात्वा शुद्धाः गृहगमनं सूतिकास्पर्शोपलक्षकं अन्यथा पितृतोप्यधिकदोषापत्तेः। एवं च तद्गृहगमनेपि स्पर्शाभावे नास्पृश्यत्वं। पुत्रजन्मनि स्ना
नात् पूर्वमंगास्पृश्यत्वमाह संवर्तः। जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते। माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः। एकदिनपतितुल्यमरणाशौचक्षये यावदशौ
चं सर्वगोत्रास्पृश्यत्वमाहादिपुराणं। सर्वं गोत्रमसंस्पृश्यं तच्च स्यात्सूतके सति। मध्येपि सूतके दद्यात् पिंडान् प्रेतस्य तृप्तये। तत्र आद्यदिने भिन्नदिने तु प्रथमेन द्वितीयस्या
नवमीयस्य शुद्ध्यभिधानान्न तथा अत्र च सूतकपदं मरणाशौचमात्रपरं। द्वितीयसूतकपदं चांगास्पृश्यत्वपरं पिंडदानमात्रश्रुतेः। तथा च याज्ञवल्क्यः। त्रिरात्रं दशरात्रं
वा शावमाशौचमिष्यते। ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि। शावमाशौचमस्पृश्यत्वलक्षणं त्रिरात्रं दशरात्राशौचिनां एकस्मिन्सूतके द्वितीयसूतके समानदिनप २८ : ३३
तिते दशरात्रमस्पृश्यत्वं ऊनद्विवर्षमरणलक्षणमस्पृश्यत्वं मातापित्रोरेव अर्थादन्येषां स्पृश्यत्वं एवमेव मिताक्षरादीपकालिकेन च शावाशौचपदमशौचमात्रपरमिति मिता
क्षरोक्तं युक्तमिति वाच्यं। आदन्तजननात् सद्य आचूडादेकरात्रकं त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परमिति याज्ञवल्कीयेन पौनरुक्त्यापत्तेः व्यक्तमाहांगिराः मरणं यदि तुल्यं स्या
न्मरणेन कथं चन। अस्पृश्यं तु भवेज्जातं सर्वमेव सबान्धवं। तुल्यमभिन्नदिनजाततया दिनरात्रादिव्यापितया च समानं। एवमन्यानि वचनानि सर्वत्र निर्गुणविषयतया-
व्याख्येयानि। यथायथं वेदाग्न्यादिसगुणासर्वाशित्वसर्वविक्रयित्वात्यन्तनिर्गुणादेशभेदादिना व्यवस्थेयानि॥ ०॥ अथ मुमूर्षुमृतकृत्यानि॥ हारीतः॥ शूद्रान्नेन तु भुक्तेन

उदरस्थेनयेन्मृतः। सवैखरत्वमुष्ट्रत्वं शूद्रत्वं चाधिगच्छति। शूद्रान्नं शूद्रस्वामिकमन्नं तद्दत्तमपि भोजनकालेन दगृहावस्थितं शूद्रान्नं तदाहांगिराः। शूद्रवेश्मनि विप्रेण क्षीरं वा
यदि वा दधि। निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतं। अपिशब्दात्साक्षाद्दत्तकपर्दिकादिना क्रीतमपि। स्वगृहागते पुनराहांगिराः। यथा यतस्ततो ह्यापः शुद्धिं यान्ति नदीं ग
ताः। शूद्राद्विप्रगृहेष्वन्नं प्रविष्टं च सदा शुचि। प्रविष्टं स्वत्वापादकप्रतिग्रहादिनिति शेषः। अतएव पराशरः। तावद्भवति शूद्रान्नं यावन्नस्पृशति द्विजः। द्विजातिकरसं
स्पृष्टं सर्वं तद्धविरुच्यते। स्पृशति प्रतिगृह्णातीति कल्पतरुः। तच्चसंप्रोक्ष्य ग्राह्यं विष्णुपुराणे। संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतं। तत्र पात्रान्तरेण ग्राह्यमाहांगि
राः। स्वपात्रे यत्तु विन्यस्तं शूद्रो यच्छति नित्यशः। पात्रान्तरगतं ग्राह्यं शूद्रान्नं गृहमागतं। एतेन स्वगृहागतस्यैव शुद्धत्वं तद्गृहगतस्य शूद्रान्नदोषभागित्वं प्रतीयते। न
तच्चैतादृगपि मुमुक्षुणा सर्वथा शूद्रान्नं न भोक्तव्यं। पूजारत्नाकरे शालग्रामशिला यत्र तत्र सन्निहितो हरिः। तत्सन्निधौ त्यजेत् प्राणान् याति विष्णोः परं पदं लिंगपुराणे शालग्रा
मसमीपे तु क्रोशमात्रं समंततः। कीकटेपि मृतो याति वैकुंठभवनं नरः। कीकटो मगधः वैष्णवामृते व्यासः। तुलसीकानने जन्तोर्यदि मृत्युर्भवेत् क्वचित्। स निर्भर्त्स्य यमं
पापी लीलयैव हरिं विशेत्। प्रयाणकाले यस्यास्ये दीयते तुलसीदलं। नीर्वाणं याति पक्षींद्र पापकोटियुतोपि सः। कूर्मपुराणे। गंगायां च जले मोक्षो वाराणस्यां जले स्थले
अन्तरीक्षे च गंगायां गंगासागरसंगमे। चकारात्स्थलेपि भुवनेश्वरमधिकृत्य ब्रह्मपुराणे। एष विश्वेश्वरो देव एषैव मणिकर्णिका। कलावन्तर्हिता काशी मुक्तिरत्र
न संशयः। ब्रह्मपुराणे। या गतिर्योगयुक्तस्य वाराणस्यां मृतस्य च सा गतिर्यद्विकोर्ध्वं न पुरुषोत्तमदक्षिणे। वार्षिकांश्चतुरो मासान् यस्तिष्ठेत्पुरुषोत्तमे। काशीवासो युगा

29 नष्टो दिनैनैकेन लभ्यते। स्कांदे। गंगायां त्यजतः प्राणान् कथयामि वरानने। कर्णे तत्परमं ब्रह्म ददामि मामकं पदं। तथा तीराद्गव्यूतिमात्रमुपरितः क्षेत्रमुच्यते। तत्र स्नानं जपो
होमो गंगायां नात्र संशयः। अत्रस्था त्रिदिवं यान्ति ये मृतास्ते पुनर्भवाः। गव्यूतिः॥ क्रोशयुगं तीर्थचिन्तामणौ ब्रह्मपुराणे। अत्र दूरे समीपे वा सदृशं योजनद्वयं। गंगायां
मरणे नेह नात्र कार्य्या विचारणा। स्कांदे। त्रिभिः सारस्वतं तोयं सप्तभिस्त्वथ यामुनं। नार्मदं दशभिर्मासैर्गांगं वर्षेण जीर्य्यति। नाम्यन्तर्गततोयानां मृतानां क्वापि देहि
नां तत्र तीर्थफलावाप्तिर्नात्र कार्य्या विचारणा। एवं च गंगादिमरणेन प्राप्तमोक्षस्याप्यौर्ध्वदैहिकी क्रिया तदधिकारिणा कर्त्तव्या नित्यत्वात् तथा च श्रीभागवते ब्रह्मण्येवं
भगवति मनोवाग्दृग्वृत्तिभिः। आत्मन्यात्मानमावेश्य सोऽन्तःश्वास उपारमत्। सम्पद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले। सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये। २८ ३३
तस्य निर्हरणादीनि सम्परेतस्य भार्गव। युधिष्ठिरः। कारयित्वा मुहूर्त्तं दुःखितोऽभवत्। ब्रह्मेत्यात्मनि परमात्मनि आत्मानं स्वीयात्मानं निवेश्य एकीकृत्य सभीष्म उपार
मत् मुक्तिं गतवान् निष्कले निरुपाधौ ब्रह्मणि सम्पद्यमानं मिलितमाज्ञाय आलक्ष्य तस्य भीष्मस्य निर्हरणादीनि संस्कारादीनि संपरेतस्य सम्यक्परेतस्य मुक्तस्यापि भा
र्गवेति शौनकसम्बोधनं एवं चैतेषामपि तत्तत्कर्म्माणि तत्तद्वचनैः परिभाषितस्य प्रेतपदस्य पितृपदस्य च मंत्रादिषु यथायथं वाचनिकत्वात् प्रयोगः संगच्छते। दक्षः।
आसन्नमृत्युना देया गौः सवत्सा च पूर्ववत्। तदभावे च गौरेव नरकोद्धारणाय वै। तदा यदि न शक्नोति दातुं वैतरणीं च गां। शक्तोऽन्योरुक्तदा दत्वा श्रेयो दद्यान्मृतस्य च।
पूर्ववद्धेमशृंगादि नाम्न न मृतस्य चेति श्रवणादेकादशाहेऽपि वैतरणीदानाचारः। वनपर्वणि सार्थः प्रवसतो मित्रं भार्य्या मित्रं गृहे सतः। आतुरस्य भिषं मित्रं दानं मित्रं म

रिष्यतः। व्यतीपातोऽथसंक्रान्तिस्तथैवग्रहणंरवेः। पुण्यकालास्तथा सर्वे यद्यान्मृत्युरुपस्थितः। गोभूतिलहिरण्यादिदत्तमक्षयतामियात् निरवकाशत्वादत्र मलमासादिदो
षोनास्तिसूतकमपिन। तथाचशुद्धिरत्नाकरेदक्षः। सुस्थेकालेत्विदंसर्वं सूतकंपरिकीर्त्तितं। आपद्गतस्यसर्वस्यसूतकेपिनसूतकं। त्रिपुरस्करशान्तिरपिकार्य्यासच्चयो
गः श्रीपतिरत्नमालायां विषमचरणंधिष्ण्यंभद्रातिथिर्यदिजायते दिनकरसनिश्चयापुत्राणां कथंचन वासरे। मुनिभिरुदितः सोयंयोगस्त्रिपुस्करसंज्ञितः। त्रिगुणफलदोह
ष्टौ नष्टेहृतेचमृतेतथा। विषमचरणंधिष्ण्यं एकपादत्रिपादरूपेणोभयराशिप्रविष्टं नक्षत्रं कृत्तिकापुनर्वसुप्रभृतिमरणोव्याप्यादौ नान्तर्जलाचारः तथासतिमृतशरीर
योगेनतस्यदुष्टतास्यात् यथाब्रह्मपुराणं। येषाममभक्ष्यं मांसं चतच्छरीरैर्युतंचयत्। वापीकूपतडागेषुजलंसर्वंचदुष्यति। शरीरैर्मृतशरीरैः उत्तरवचनेकुणपग्रहणात्।
यथासकर्द्दमंसकुणपंतेभ्यस्तोयमपास्यतत्। प्रक्षिपेत् पंचगव्यंचसमंत्रंसर्वशुद्धिकृत्। अपास्यकुणपंतेभ्यः वकृतोयेभ्यएववा। शतंषष्ठ्यथवात्रिंशत्तोयकुंभानसमु
द्धरेत्। पंचगव्यंततस्तेषु प्रक्षिपेन्मंत्रपूर्वकं। वापीसस्तोपानानि सोपानः कूपः तडागःपद्माकरः शतादिजलालपत्वाद्यपेक्षया अत्यल्पजलस्य सर्वोद्धरणाभिधानात्
एवंमरणासमयेगृहान्निःसार्य्यते अन्यथा गृहस्य दुष्टतास्यात् यथा गृह्यमः। स्वशूद्रपतिताश्चान्त्या मृताश्चेद्विजमंदिरे। शौचन्तत्रप्रवक्ष्यामि मनुनाभाषितंयथा।
दशरात्राच्छुनिर्मृते मासाच्छूद्रेभवच्छुचि। द्वाभ्यान्तुपतितेगेह मन्त्येमासचतुष्टयात्। अत्यन्तेवर्जयेद्गेहमित्येवंमनुरब्रवीत्। द्वाभ्यांमासाभ्यांमासंदंशपाठात् अ
न्त्याम्लेच्छः अत्यन्तःश्वपाकइतिवाचस्पतिमिश्रः। यमः। द्विजस्यमरणेवेश्म विशुद्ध्यतिदिनत्रयात्। दिनैकेनवहिर्भूमि रग्निप्रेक्षणलेपनैः। यथोक्तकालानन्तरं कर्त्तव्य

30 माहसंवर्त्तः। गृहशुद्धिं प्रवक्ष्यामि अन्तस्थशवदूषिते। प्रोत्सृज्य मृण्मयं भांडं सिद्धमन्नं तथैव च। गृहाद्‌पास्य तत्सर्वं गोमयेनोपलेपयेत्। गोमयेनोपलिप्याथ छागेनाघ्रापयेद्
बुधः। ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः। सर्वमभ्युक्षयेद्वेश्म ततः शुद्ध्यत्यसंशयः। अत्र मंत्राणादेशा गायत्री देवलः। पंचधा वा चतुर्धा वा भूरमेध्या विशुध्यति। दुष्टा द्विधा त्रिधा
वापि शुध्यते मलिनैकधा। दहनं खननं भूमेरुपलेपनवापने। पर्जन्यवर्षणं चापि शौचं पंचविधं स्मृतं। प्रसूते गर्भिणी यत्र यत्र विन्यस्यते शवः। विण्मूत्रोपहतं यत्र कुणपो यत्र दृ
श्यते। एवं कश्मलभूयिष्ठा भूरमेध्येति कथ्यते। कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी। अप्सया कर्षणैः क्षिप्तावान्तैर्वा दुष्टतां व्रजेत्। नखदन्ततनूजत्वक्तुषपांशुरजोमलैः।
भस्मपंककतृणैर्वापि प्रच्छन्ना मलिना भवेत्। वापनं मृदन्तरेण पूरणं उषितं वासः प्लावनीभूतश्लेष्मादिः। चतुर्थ्यादौ पंचानां मध्ये यथासंभवं ग्रहणं। अंगिराः॥ शौचं सहस्र
रोमाणां वाय्वग्नीन्द्वर्करश्मिभिः। रेतःस्पृष्टं शवस्पृष्टं माविकं नैव दुष्यति। सहस्ररोमाणां कम्बलानां। विष्णुः। लाभेरधस्तात् प्रवाहशुचिकापि कैर्मले शुरामिम धेर्वोपहतो मृत्तो ३·२३
यैस्तदंगं प्रक्षाल्याचान्तः। शुद्धेदन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य स्नानेन। चक्षुष्युपहत उपोष्य स्नात्वा पंचगव्येन। दशनच्छदोपहतश्चेति प्रवाहुः। कफोनेरधोभागः पंचगव्येन
प्राशिते न शुद्धेदिति शेषः। मलानाह मनुः। वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः। श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः। वौधायनः। आददीत मृदोपश्च षट्सु पूर्वेषु +
शुद्धये। उत्तरेषु च षट्स्वद्भिः + केवलाभिर्विशुध्यति। विशेषयति मनुः। देहाच्चैव च्युता मलाः। देवलः। मानुषास्थि वसां विष्ठा मार्त्तवं मूत्ररेतसी। मज्जानं शोणितं वापि परस्य यदि
संस्पृशेत्। स्नात्वोपमृज्य लेपादीनाचम्य स शुचिर्भवेत्। तान्येव स्वानि संस्पृश्य पूतः स्यात्परिमार्जनात्। अत्र स्पर्शं विना मार्जनासंभवात् तदनन्तरमेव स्नानाचमने कर्त्तव्ये पाठक्र

मार्दार्थक्रमस्यबलवत्त्वात्ततश्च परमलविशेषस्पर्शे स्नानं आत्ममलस्पर्शे क्षालनाचमनमात्रं । विष्णुः । मृतं द्विजं न शूद्रेण निर्हारयेन्न शूद्रं द्विजेन । यमः । यस्यानयति शूद्रोग्निं तृण
काष्ठहवींषि च । मन्यते ह्येष धर्म्मोस्ति स चाधर्म्मेण लिप्यते । अशक्तावपि चिताग्निं ब्राह्मणैरेव तृणादिकं देयं । तृतीयस्कंधे कापिलेये यथा पापीयसा नीतस्तमसा यमसादनं । योजना
नां सहस्राणि नवतिं नवचाध्वनः । त्रिभिर्मुहूर्तैर्द्वाभ्यां वा नीतः प्राप्नोति यातनां । द्वाभ्यामतिपापस्य तेन गमनमात्रं गमनानुरोधात् द्वादशदंडवहिर्द्वौ हृ इति । मरणानन्तरकर्म्मणि प्राची
नावीतित्वादिकमाह मनुः । प्राचीनावीतिना कार्य्यमपसव्यमतंद्रिणा । पित्र्यमानिधनात्कार्य्यं विधिवद्दर्भपाणिना इति । याज्ञवल्क्यः । ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकं ततः । छंदो
ग परिशिष्टं दुर्बलस्नापयित्वा तं शुद्धचेलाभिसंवृतं । दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् । घृतेनाभ्यक्तमाप्लाव्य सुवस्त्रं सूपवीतिनं । चन्दनोक्षितसर्वांगं सुमनोभि
र्विभूषयेत् । हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु । मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः । आमपात्रेन्नमादाय प्रेतमग्निपुरःसरं । एकोनुगच्छेत्तस्यार्द्धमर्द्धं पथ्यु
त्सृजेत् भुवि । अर्द्धमादहनं प्राप्त आसीनो दक्षिणामुखः । सव्यं जान्वाच्य शनकैः सतिलं पिंडदानवत् । अथ पुत्रादिराप्लुत्य कुर्य्याद्दारुचयं महत् । भूप्रदेशे शुचौ देशे प
श्चाच्चित्यादिलक्षणं । अत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे । आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रं नसि स्रुवं । घृताभ्यक्तस्याप्लवने विशेषमाह वराहपुराणं । दक्षिणाशिरसं
कृत्वा सचेलन्तु शवन्तथा । तीर्थस्यावाहनं कृत्वा स्नपनं तत्र कारयेत् । गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः । कुरुक्षेत्रं च गंगां च यमुनां च सरिद्वरां । कौशिकीं चन्द्रभा
गां च सर्वपापप्रणाशिनीं । भद्रावकाशां गंडक्यां सरयूं पनसां तथा । वैणवं च वराहं च तीर्थं पिंडारकं तथा । पृथिव्यां यानि तीर्थानि सरितः सागरांस्तथा । ध्यात्वा तु मनसा सर्वे-

31 कृमश्मानेगमापुंसं देवाश्चाग्निमुखाः सर्वे गृहीत्वा तु हुताशनं । गृहीत्वा पाणिना चैव मंत्रमेतमुदीरयेत् । कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता । मृत्युँवशं प्राप्य नरं पंचत्वमागतं ।
धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतं । दहेयं सर्वगात्राणि दिव्यान्लोकान्स गच्छतु । एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणां । ज्वलमानं ततो वह्निं शिरःस्थाने प्रदापयेत् । ततो घृतेना
भ्यज्य गयादीनीत्यादिसागरान्तं यथेत्यन्तान् सर्वां श्छिन्नयित्वा पुनः स्नापयेत् । अत्र सुपांशुरित्यनेन सर्व इति द्वितीयार्थे प्रथमावस्थान्तरं परिधाप्य उपवीतमुत्तरीयं च दत्वा चंदनेनोप
लिप्य मुखेषु मुखसंबंधिषु कर्णनासिकानेत्रघप मुखात्मकेषु सप्तसु सप्त सुवर्णखंडिकास्तदभावे कांश्यादिखंडिकाः मुखे निधाय कांश्यसुवर्णमविद्रुममित्यादि पुराणात् व
स्त्रान्तरेणाच्छाद्य निर्हरेयुः । अग्निपुरःसरमिति । साग्निकपरं तस्यानस्याग्ने मर्द्धपथित्यजेत् । अदह्यतेऽस्मिन्निति आदहनं श्मशानं तत्रापि पुत्रादिरग्निदाता आप्लवनं कृ २१
त्वा वासं जान्वाप्य भूमीं नीत्वा दक्षिणामुख उपविश्य तिलसहितमपर मन्त्राच्छ· पिंडदानेतिकर्त्तव्यतापात्रं सृजेदित्यनुप्रसंगः पिंडदानेतिकर्त्तव्यता च प्राचीनावीतित्वमुप
वीतवदुत्तरीयधारणं च । तथा च विद्याकरधृतं । यथा यज्ञोपवीतं च धार्य्यते च द्विजोत्तमैः । तथा सन्धार्य्यते यत्नादुत्तराच्छादनं शुभं । अत्र यथा द्विजोत्तमैः सव्यापसव्यत्वादि
ना उपवीतं धार्य्यते । तथोत्तराच्छादनमपि अत्र यथा यज्ञोपवीतधारणे उत्तमत्वमविवक्षितं क्षत्रियविशोरपि तत्संभवात् तथोत्तरीयधारणे द्विजत्वमपि स्त्रीशूद्रयोरपि द्विजोपवी
तधारणवदुत्तरीयधारणाचारात् । द्विकच्छः कच्छशेषश्च मुक्तकच्छस्तथैव च । एकवासा अवासाश्च नग्नः पंचविधः स्मृत इति । हरिशर्म्मधृतगोभिलश्लोकादेकवस्त्रस्य सा
मान्यतो नग्नत्वाभिधानात् तत्परिहाराय द्विवस्त्रयोगित्वाच्च । स्त्रियास्तु अथ पत्याचारमनुकामिष्या मृत्युपक्रमे स्नात्वा वाससी परिधायेति हारीतेनोपदेशाच्च । अतएववि

वाहप्रकरणीयगोभिलसूत्रस्य प्राहृतां यज्ञोपवीति निमित्य त्र स्त्रियायज्ञोपवीताभावे यज्ञोपवीतवत् कृतोत्तरीयमिति भट्टभाष्यव्याख्यानदर्शनाद् त्राप्यपसव्यतायायुक्तत्वात् अपस
व्यं ततः कृत्वा वस्त्रयज्ञोपवीतकमिति ब्रह्मपुराणेपि वस्त्रस्यापसव्यदर्शनाच्च। एतेन स्त्रियास्तु द्विवस्त्रत्वमात्रं न त्वपसव्यकरणं मपि तथैव छन्दोगदारकृत्ये प्रतिहस्तकलिखना
दिति श्राद्धचिन्तामण्युक्तं निरस्तं मत्स्यपुराणं। धारयेदथ रक्तानि कुमारी शुक्लवाससी। परिधानप्रकारमाहतुः शंखलिखितौ। नग्नामिंदर्शयेत्कुलवधूः गुल्फाभ्यां वासः प
रिदध्यात् न स्तनौ विवृतौ कुर्य्यादिति। वासोविन्यासविशेषस्तु देशाचाराद्वगन्तव्यः रत्नाकरोप्येवं शिरोवगुंठनमाह। अथ पश्चात् गृहमेध्याभवेन्नित्यं भूषणानि प्रपूजयेत्
नित्यस्नानकृतां वेणीमर्चयेत्पुष्पवाससा। गृहमेध्या गृहकृत्यपरा पूजयेत् मार्जनादिभिः। संस्कुर्य्यात् नित्यस्नानकृतां। नित्यस्नानानन्तरकृतामिति रत्नाकरः। ततः पुत्रादिः
स्नानं कृत्वा दारुचयं कुर्य्यात् शुचिभूप्रदेशे चितायोग्यलक्षणं पंचधा भूसंस्काररूपं कर्य्यात्। तत्र प्रथमम् आकरशोधनं ततो गोमयेनोपलेपनं ततः स्वगस्योत्तरेखाकरणं
रेखामार्जनं रेखाभ्युक्षणं च एतच्च निरग्नावपि यच्चुप्येतो भूमिजोषणादि समानमिति पारस्करसूत्रात्। उपेतः उपनीतः जोषणं जुषी प्रीति सेवनयोधात्वर्थानुसारात्। सेवनं
भूमिजोषणं भूसंस्कार इति हारलतातेनोपनीतमात्रस्य दाहे भूसंस्कार इति चितायां दक्षिणाशिरसमधोमुखं सामगं पुमांसं न्यसेत्। छन्दोगपरिशिष्टेन दक्षिणाशिरस्त्वाभि
धानात् ननु यदि छन्दोगपरिशिष्टात् सामगमात्राणां दक्षिणाशिरस्त्वं तर्ह्युत्तानदेहत्वं कथं नाद्रियते। उच्यते। उत्तानदेहत्वस्य श्रुवादित्रपात्रन्यासानुरोधित्वेन तन्निहृतौ तन्नि
वृत्तिरुक्तेति दक्षिणाशिरस्त्वस्य तु वाचनिकत्वात् निरग्निविषयकत्वमपि नाप्यस्तु उत्तानदेहत्वं यथादिपुराणं। सगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः। अधोमुखो दक्षिणादि

32 कृचरणास्तु पुमानपि । उन्नानदेहा नारी तु सपिंडैरपि बंधुभिः । दक्षिणादिक चरणादित्यनेनैव उत्तरशिरस्त्वं यत्र सामगेतरपरं । हारलतायेवं । ततो देवश्चाग्निमुखाः सर्वे इति हुता
शनं गृहीत्वा एनं वहन्त्विति मनसा ध्यात्वा चांडालाग्नेरमेध्याग्नेः सूतकाग्नेश्च कर्हिचित् । पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतमिति देवलः । पर्य्युदस्तेतरमग्निं गृही
त्वा ॐ कृत्वा तु दुष्करं कर्म्म इति मंत्रं पठित्वा प्रदक्षिणं कृत्वा दक्षिणामुखः शिरः स्थाने दद्यात् स्त्रीदाहेनरमित्येव पाठ इत्युक्तमेकादशीतत्त्वे विष्णुपुराणे । न कुर्य्याद्धवं
चैव सवर्गान्धो हि सोमजः । आदिपुराणे । निःशेषस्तु न दग्धव्यः शेषं किंचित्त्यजेत्ततः । गच्छेत्प्रदक्षिणाः सप्तसमिद्भिः सप्तभिः सह । देयाः प्रहाराः सप्तैव कुठारेणोन्मुकोपरि ।
क्रव्यादयेन नमस्तुभ्यमितिजप्यं समाहितैः । नावेक्षितव्यः क्रव्यादागन्तव्या च ततो नदी । प्रदक्षिणागतिरितिशेषः । समिधां प्रक्षेपमाह प्रचेताः । दग्धाशवं ततस्तेवं प्रा
दशाः काष्ठिकास्तथा । सप्त प्रदक्षिणाः कृत्वा एकैकां तु विनिःक्षिपेत् । तेन प्रादेशप्रमाणाः सप्तकाष्ठिका गृहीत्वा चिताग्निं सप्तप्रदक्षिणीकृत्य सप्तकाष्ठिका एकैकक्रमेण ३२ शु
चिताग्नौ प्रक्षिपेत् । ततः कुठारेण क्रव्यादाय नमस्तुभ्यमिति मंत्रजपं कुर्वद्भिश्चितास्य जलद्धारूपरि सप्तप्रहारा देयाः । मंत्रपाठस्तु सकृदेव एकद्रव्ये कर्म्मावृत्तौ सकृदेव मं
त्रवाचनं कृत्वेति भट्टभाष्यधृतवचनात् । दर्भजुटिका होमे तु तत एव वर्हिषः । कुशमुष्टिमादाय आज्येन हविषि वा विरादध्यादग्राणि मध्यानि मूलानीत्युक्तं रिहणा
वल्लुरय इति गोभिलन स्थानभेदकथनादेकद्रव्येपि मंत्रावृत्तिरिति भट्टभाष्यं । ततः कोष्ठे तु जठरोऽग्निस्तु क्रव्यादो मृतभक्षणे इति गोभिलीयपरिभाषितं क्रव्यादमपश्य
द्भिर्वक्ष्यमाना अश्वलायना । वचनाद्वामावर्तेन स्नातुं नदीं गंतव्या । प्रचेताः । नग्नदेहं दहन्नैव किंचिद्देयं परित्यजेत् । देयं शवस्तं वस्त्रवस्त्रादिकं श्मशानवासि चांडालादि-

म्बोदद्यात्। मिताक्षरायां स्मृतिकायां मृतायान्तु कथं कुर्वन्ति याज्ञिकाः कुंभे सति लभ्यादाप पंचगव्यं तथैव च। पुण्यर्भिरभिमन्त्र्यापो वाचां शुद्धिं लभेत्ततः। तेनैव स्नापयित्वा तु द
हं कुर्य्याद्यथाविधिः। पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां॥ वस्त्रान्तरहृतां कृत्वा दाहयद्विधिपूर्वकं। पुण्यर्भिरापो हिष्ठीयवामदेव्यादिभिरिति स्मृत्यर्थसारः। एवं गर्भव
त्यां मृतायां तु उदरभेदेन गर्भं निःसार्य्यस्यान्तोन्तरे निःक्षिप्य तस्या दाहः कार्य्यः। गर्भवत्यां मृतायां तु गर्भं जीवनशंकया। विमुच्य गर्भं दग्धव्या एवं धर्मो न हीयते। स्त्रीणान्तु पति
तो गर्भ इत्यादि ब्रह्मपुराणे न सामान्यतो गर्भप्रतिपत्त्यभिधानात् स्मृतिः नागदंष्ट्रो नरो राजन् प्राप्य मृत्युं व्रजत्यधः। अधो गत्वा भवेत्सर्पो निर्विषो नात्र संशयः। एतन्मोक्षायतद्ब
न्धुः पुत्रादिर्मासि भाद्रके। नक्तं कुर्वीत सततं पंचम्यां शुक्लपक्षे प्रयततः। यतः दशाहाभ्यन्तरे यस्य गंगातोये स्थि मज्जति। गंगायां मरणे याहृक ताहृक फलमवाप्नुयात्। स्मृतिः। आ
त्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया। तेषामपि तथा गंगातोये संस्थापनं हितं। कौर्मे यावदस्थीनि गंगायां तिष्ठन्ति पुरुषस्य च। तावद्वर्षसहस्राणि स्वर्गलोके महीयते।
आदिपुराणे। मातुः कुलं पितृकुलं वर्जयित्वा नराधमः। अस्थीन्यन्यकुलोत्थानि नीत्वा चांद्रायणाच्छुचि। एतत्तु धनग्रहणादिना। अस्थीनि मातापितृपूर्वजानां नयन्ति गंगामपि ये
कदाचित्। सद्भावकस्यापि दयाभिभूता स्तेयान्तु तीर्थानि फलप्रदानि। अत्र तद्भावकस्य भावशुद्धस्यान्यकुलजस्यापि कृपातिशयादस्थीन्युद्धा। स्थिप्रक्षेपे पुण्याभिधानात्। अत्रैव
विधिमाह भागीरथी यत्र यत्रास्ति तीर्थे कुलद्वये चापि यदा विपन्नः। तदा तदा तत्र तस्याथ भक्त्याभावे नास्थीनि विनिःक्षिपेच्च। स्नात्वा ततः पंचगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलै
श्चयोज्य। ततश्च मृत पिंडपुटे निधाय पश्यं दिशं प्रेतगणोपगूढां। नमोस्तु धर्माय वदन् प्रविश्य जलं स मे प्रीत इति क्षिपेच्च। उत्थाय भास्वन्तमवेक्ष्य सूर्यं सदक्षिणां विप्रमुखाय दद्यात्।

33 अत्रार्द्धेऽस्थिप्रक्षेपानन्तरं स्नानविधायक मैथिलपाठो युक्तः। स यथा स्नात्वा तथा तीर्थ्यं च भास्करं च। दृष्ट्वा प्रदद्यादथ दक्षिणां च। एवं कृते प्रेतपुरस्थितस्य स्वर्गेगतिः स्याच्च महेन्द्रतु
ल्या। प्रेतगणोपगूढां दक्षिणां दिशं ॐ नमोऽस्तु धर्माय इति गंगाजलप्रवेशमंत्रः। स मे प्रीतो भवेत्विति अस्थिप्रक्षेपमंत्र इत्यनिरुद्धभट्टाः। अथास्थ्यलाभे पर्णनरदाहः॥ आश्व
लायनगृह्यपरिशिष्टं अस्थ्यलाभे पलाशवृन्तानां त्रीणि षष्टि शतानि पुरुषप्रतिनिधिं कृत्वा अशीत्यर्द्धं च शिरसि ग्रीवायां दशयोजयेत्। उरसि त्रिंशतं दद्यात् विंशतिं जठरे तथा। बा
हुभ्यां च शतं दद्यात् अंगुलीषु तथा दश द्वादशार्द्धं वृषलायां षष्टांगं शिश्न एव च। ऊरुभ्यां च शतं दद्यात् विंशतं जानुजंघयोः। पादांगुलीषु च दश एतत्प्रेतस्य लक्षणं। ऊर्णा-
सूत्रेण संवेष्ट्य यवपिंडेन लेपयेत्। आदिपुराणं। तदलाभे पलाशोत्थैः पत्रैः कार्यः पुमानपि। शतैस्त्रिभिस्तथा षष्ट्या शरपत्रैर्विधानतः। तदलाभेऽस्थ्यलाभे अत्र पलाशपत्र
शरपत्रयोस्तुल्यत्वेनोपादानात्। आश्वलायनसूत्रेपि प्रकृतौ शरपत्रस्य लाभः अत्राचारात् योग्यत्वाच्च शरपत्रैः उत्तलकं कृत्वा शिरः प्रभृतिषु पलाशपत्राणि देयानि ततो वेष्टन ३३ शु
मूलासूत्रेण लेपनं यवपिष्टेन अत्राशौचाभ्यन्तरदाहे तु शेषाहेन शुद्धिः तदुत्तरदाहे तु त्रिरात्रं एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदित्यादिपुराणात्। पर्णनरदाहश्चैव वि
नादर्शं कथंचन अस्थ्नामलाभे दर्शेऽह्नि ततः पर्णनरं दहेदिति दीपकलिकायां। सुमन्तुवचनात्। दशाहत्यत्राष्टम्यामिति क्वचित्पाठः अत्राष्टमी च कृष्णा सन्देहे पितृक
र्मणि कृष्णपक्षप्राशस्त्योक्तेः। यमः। त्रिपक्षाभ्यन्तरेणैव ततः पर्णनरं दहेत्। तदूर्द्ध्वमष्टमीं प्राप्य दर्शं वापि विचक्षणः दहेदिति शेषः। अशौचमध्ये पतने न दाहयेद्दु
त्पावस्था। कृष्णपक्षे पंचदश्यामष्टम्यां वा समाप्तितः। एकादश्यां विशेषेण ततः प्रभृति सूतकं। त्रिरात्रं सर्ववर्णानामेष धर्मो व्यवस्थितः इति शुद्धिरत्नाकरे यमः। वायुपुराणे

पर्णनरं दहेन्नैव प्राक् त्रिपक्षात्कथंचन। मातृत्पितृव्रतमस्यात् नैव दर्शाद्दहेद्यदि। त्रिपक्षे तु गते दद्याद्दर्शे प्राप्ते त्वनग्निकः। विष्णुः। त्रिपक्षाभ्यन्तरे राजन् नैव पर्णनरं दहेत्।
तदूर्ध्वमष्टमीं प्राप्य दर्शं वापि विचक्षणः। दहेदिति शेषः। यत्र पार्श्वः। पुत्राश्चेदुपलभ्येरन् तदस्थीनि कदाचन। तदलाभे पलाशस्य संभवे हि पुनः क्रिया। हि यस्मात्तदलाभेऽ
स्थ्यलाभे पलाशस्य तत्कृतपुत्तलकस्य दाहक्रिया पुनरपि संभवे लाभे पुनरस्थिदाहक्रिया विहिता तस्माद्यदि पुनरस्थीनि प्राप्यन्ते पुनर्दाहः कर्त्तव्यः। अशौचं च त्रिरात्रं नपु
नः पिंडादिदानं वक्ष्यमाणं युक्तं। अशौचानन्तरं चेत्स्याद्दाहः पर्णनरः स्यात्। त्र्यहात् शुध्यन्ति च तथा सन्निकृष्टाः सगोत्रजा इति अथोदकादिदानं॥ पारस्करः। संप्रयुक्ते मैथुनं
च याचेरन्नुदकं करिष्यामह इति कुरुध्वमाचैवं पुनरित्यशतवर्षे प्रेते कुरुध्वमेवेतरस्मिन्निति पार्थिते सर्वे ज्ञातायो भावयन्ति। आसप्तमात्पुरुषाद्दशमाद्वा एकग्रामवासे या
वत्संबन्धमनुस्मरेयुरेकवस्त्राः प्राचीनावीतिनः सव्यस्यानामिकयाऽपच्चोत्सोऽप्रपनः शोभ्यञ्च दधमिति दक्षिणाभिमुखामज्जन्ति प्रेतायोदकं सकृत्प्रसिंचन्त्यंजलिनाऽसावे
तत्ते इति। मिथुनं स्त्रीपुरुषौ तत्सम्बन्धि मैथुनं श्यालकादि संप्रयुक्तं सम्यक् प्रयोगकुशल उत्तरदानाभिज्ञमिति यावत्। उदकं करिष्यामह इति याचेरन् अथोत्तरमाह कुरुध्वमाचैवं-
शत पुनरित्यशतवर्षे प्रेते कुरुध्वमेवेतरस्मिन्निति ततः सर्वे स्नानादिक्रियां भावयन्ति यावत्सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति यावत्। संबन्धस्मरणं भवति तावदपीयं स्नानादि
क्रिया यथा स्नानादिकर्त्तव्यं तदाह एकवस्त्रा इत्यादिना अत्रैकवस्त्रत्वविधानादन्यच्चाधिवस्त्रत्वं प्रतीयते तथा च समुद्रकरकृत गोभिलीयसन्ध्यास्नानसूत्रादिभाष्ये गौतमः।
एकवस्त्रेणायतस्नानं सूच्याविध्येन चैव हि। स्नानं च न भजेच्छुद्धिं श्रियाच परिहीयते। कात्यायनीयस्नानसूत्रविवरणेऽपि नैकवस्त्रः स्नायादिति। वचनं हरिहरादीपे। देवार्चां च म

न स्नानव्रतश्राद्धक्रियादिषु । न भवेन्मुक्तकेशश्च नैकवस्त्रधरस्तथा । विधाकरवाजपेयिनापि यज्ञोपवीतस्य वस्त्रकार्य्यकारित्वेपि अवस्त्रत्वात् स्नानकालेऽस्थितेपि तस्मिन्वस्त्रेपि गृ
34 हीते न वासोभिरिति निषेधानवकाशः नग्नः कौपीनवासाश्चाधिवासाः स्नाति यो नरः । वृथा स्नानं भवेत्तस्य निरशौचं पितृदेवता इति वाक्यं च दृश्यत इत्युक्तं । अत एव सारव्यायन गृ
ह्ये । सवस्त्रोऽहरहराप्लुत्यानुदकोऽन्यद्वस्त्रमाच्छादयेदिति सवस्त्र इति द्वितीयवस्त्रप्राप्त्यर्थं एकवस्त्रत्वस्य नग्नत्वप्रतिषेधेन प्राप्तत्वादिति ब्रह्मदत्तभाष्यमिति कल्पतरुः । अत्रातु
दकश्रुत्वा स्नातः शिरो नावधुनुयाद्गात्रेभ्यस्तोयमुद्धरेदिति विष्णुवचनं स्नानशाटीपाणिभ्यामिति विशेषणीयं स्नातो नांगानि मार्जीत स्नानशाट्या न पाणिना इति विष्णुपुराणीयैकै
कवाक्यत्वात् प्रेतस्नाने प्रथमं परिहितवस्त्रं प्रक्षाल्य तदेव परिधाय स्नातव्यं यथादिपुराणं । आदौ वस्त्रं च प्रक्षाल्य तेनैवाच्छाद्य तैस्ततः कर्त्तव्यं तैः स्वे स्वे तु स्नानं सर्वमलापहं २४
ततः प्राचीनावीतिनो दक्षिणामुखाः । ॐ अपनः शोशुचदघमित्यनेन वामहस्तानामिकयाऽपअवालाद्य स्नानं कुर्य्युरिति हारलता याज्ञवल्क्यदीपकलिका हरिशर्म्म स्मृति
सोपानप्रभृतयः । असावेतत्तेइति असाविति संबोधनान्तनाम्नोपलक्षणं । असाविति नाम गृह्णीयादिति कात्यायनदर्शनात् अत्रासावित्युपादानाददःपदप्राप्ता गण एव नाम्नो हः
न तु विरूपाक्षजपादाविदमित्यादौ माद्यादिभिरित्यत्रोक्तं तोनेदमित्यत्र तेनाऽमुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्ते तिलोदकं तृप्यस्वेति यजुर्वेदीनां प्रयोगः । यदि पितृप्यस्वे
ति न वाचनिकं तथापममुकामुकामुक गोत्रस्तु प्रेतस्तृप्यत्विदं पठन्निति ब्रह्मपुराणे गोत्रनामानुवादादितर्पयामीति चोत्तरमिति छन्दोगपरिशिष्टे च तन्नि प्रयोगात् संबो
धनविवक्षायोग्यत्वाच्च अत्रापि तथा कल्प्यते । यद्यप्यसावित्यसंबुद्धि प्रथमान्तमपि संभवति तथापि ते इति युष्मत्प्रयोगात् सम्बुद्ध्यन्तता प्रतीयते तस्य संबोधमाना-

नामवाचित्वात् अन्यथाऽनन्वयापत्तेः छंदोगपरिशिष्टं यथानवेक्ष्मेत्याप: सर्वस्वशावस्पृशः। स्नात्वा सचेलमाचम्य दद्युरस्योदकं जले। गोत्रनामानुवादादितर्पयामीति चोत्तरं
दक्षिणाग्रान् कुशान् कृत्वा सतिलांस्तु पृथक् सकृत्। अनवेक्ष्यं चिताग्न्यवेक्षणं यथा न स्यात् तथा अपआगत्य पारस्करोक्तविधिना स्नात्वा तर्पयेयुः। विशेषमाह गोत्रेति अनु
वादपदेन स्मरणादनुपश्चाद्वादो वदनं यस्य तत्तथेतन्न्यायात्। प्रेतान्तनामगोत्राभ्यामिति शातातपीयदर्शनाच्च प्रेतपदमभिधीयते तेन गोत्रादिपूर्वं प्रतीकं तर्पयामीतिपरं। एते
न संबंधार्थकपदनिवृत्तिरवसीयते प्रेतत्वेन देवतात्वात् प्रेतश्राद्धेपि संबंधवाचकमनभिधायैव विष्णुना प्रेतान्तनामगोत्राभ्यां दत्ताक्षय्योदकेष्विति आश्वलायनगृह्यप
रिशिष्टेनापि पितृपदं न युंजीत पितृहा चोपजायते इत्युक्तं एतत् प्रेतश्राद्धमिति गोभिलवचनात् प्रेतपदवत्तेन देवतात्वात् पितृपदस्थाने प्रेतपदविधानात् उत्सर्गवा
क्येमंत्रे च पितृपदनिवृत्तिरितिन्यायमूलमिदं वचनं अतो नसांवत्सरिके तत्प्रसंगः अत एव प्रेतपिंडोपयस्य विषय इति श्राद्धविवेकः। गोत्रनामानुवादादीत्यत्र पाठि
ककमान्नाम्नः परं न प्रेतपदं किंतु नागृहीतविशेषणा बुद्धिर्विशेष्यउपजायते इति न्यायान्नाम्नः पूर्वं तन्न्यायस्य कथं बलवत्त्वमिति श्रुत्यर्थपठनमुख्यप्रावृत्तिकाः क्रमा
इति जैमिनिसूत्रे पाठक्रमादर्थक्रमस्य बलवत्वात्सम्बन्धवाचकस्यानाभिधित्सितत्वाच्च तथायुक्तमिश्राचार्य्यपृथिवीधरधृतं विष्णुसूत्रं अपः सर्वेशावस्पर्शिनो गत्वा
पितृपदस्थाने प्रेतपदोहेन द्वितीयान्तं तर्पयेयुः। पितृपदोच्चारणो पितृहा भवतीति शातातपः। प्रेतान्तनामगोत्राभ्यामुत्सृजेदुपतिष्ठतामिति प्रेतान्तेति तत्पुरुषो न बहुव्री
हिः तस्य जघन्यत्वात् तेन प्रेतान्तनाम च गोत्रं चेति समासः एतद्वचनात् चितापिंडदाने उपतिष्ठतामिति पितृदयितायामप्युक्तं एतेन प्रेतकार्य्ये सम्बन्धापकपदप्रयोगो भ्रे

३५ थिलोक्तो हेयः एतेनामुकगोत्रं प्रेतममुकदेवशर्म्माणं तर्पयामीति सामगानां प्रयोगः। अत्र प्रेततर्पणे सति तिलास्त्विति विशेषोपादानात् तिलान्संमिश्रयेज्जले इति तिलाधि
करणमुपक्रम्याभिधानाच्च सूर्यादिवारेऽपि तिलैनैव तर्पणं प्रतीयते व्यक्तमाह मदनपारिजातधृतास्मृतिः। अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च। उपाकर्म्मणि
चोत्सर्गे युगादौ मृतवासरे। सूर्यशुक्रादिनेवापि न दोषस्तिलतर्पणे। तीर्थे तिथिविशेषे च कार्यं प्रेते च सर्वदा। तिथिविशेषे मावास्यादशहरादौ अत्र दक्षिणांगुष्ठस
हितमध्यमादिभिरेव वामहस्ते तिलदानं वामहस्ते तिलान्दत्वा जलमध्येत तर्पयेत्। मुक्तहस्तेन कर्त्तव्यं नमुद्रां तत्र दर्शयेदिति विद्याकरधृतात् वामहस्त इति सम्प्र
म्यन्त श्रवणात् तिलान्संमिश्रयेज्जले इति तिलाधिकरणमुपक्रम्याभिधानाच्च सव्येन तिला ग्राह्या इत्य त्रापि वामहस्ते स्थाप्या इत्यर्थः। सव्येनेति स्थाल्यां पच-
तीतिवदधिकरणस्य करणत्वं विवक्षातः कारकाणि भवन्तीति श्रुतेः मुद्रां अंगुष्ठतर्जनीसंयोगात्मकमुद्रां तिलग्रहणायेति शेषः। अथ यथा छन्दोगानां द्वितीया ३५ श्रु
न्तवाक्यं प्रेतप्रकरणात् प्रेततर्पणपरं। यथा यजुर्वेदीनामपि संबोधनान्तवाक्यं तत्परमस्तु मैवं छन्दोगानां गोभिलेन शर्म्मान्तपरणकर्म्मणीति सामान्यतोऽभिधा
नात् तथास्तु यजुर्वेदिनां तु शाखायां प्रात्यहिकतर्पणे प्रकृतावनुक्तमपि संबोधनान्तवाक्यं तद्विकृतीभूतप्रेततर्पणे येनासावेतत्त इत्यनेन निर्णीयते यथा ज्योति -
ष्टोमे द्वादशगोशतदक्षिणाविभागोऽनुक्तो विकृतीभूतसत्रयागे सति नार्द्धिनो दीक्षयन्तीत्यादिना निर्णीयत इति तद्विभागं मनुरप्याह सर्वेषामर्द्धिनो मुख्यास्तदर्द्धे
नार्द्धिनोऽपरे। तृतीयेन तृतीयांशाश्चतुर्थांशास्तु पादिनः। श्रौतकात्यायनेऽपि अथ द्वादशाद्वादशाधेभ्यः षट् षट् द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्यस्तिस्रस्तिस्र इत

रेभ्य इति षोडशानामित्विजां चतुरश्चतुरः कृत्वा चत्वारो वर्गा इति अतो न गोभिलोक्ता अयशां तदाश्रयेणाश्वशाखास्वयमुत्सृज्य परशाखाश्रयन्तु यः । कर्त्तुमिच्छति दुर्मेधा मो
घं तस्य तु यत्कृतमिति कात्यायनेन दोषाभिधानात् तदाकांक्षया सामान्यतः स्वशाखोक्तसंबोधनान्तस्य युक्तत्वात् व्यक्तमाह ब्राह्मणसर्वस्वे जातूकर्णः प्रमीतपितृकस्तु उ
शान्तस्त्वेत्यावाह्य नाम गोत्रमुच्चार्य यावतां पितृकार्यं मसौ वितन्नेऽदकमिति पितृन् पितामहान् प्रपितामहानेकैकं त्रीं स्त्रीन् अंजलीं दद्यादिति । ततश्च प्रात्याहिकतर्पणो
ऽमुकगोत्र पितरमुकदेवशर्म्मन् स्तृप्यस्वैष ते तिलोदकं स्वधेति यजुर्वेदिनां प्रयोगः । अंजलित्रयदाने त्वहुतस्योपदानिकस्वत्वाभावेन त्यागायोगादेतन्नो तिलोद
कमिति निर्देशासंभवादहुतस्यैव त्यागनिर्देशयोः संभवादेकमंत्रकरणानेकहोमे मंत्रावृत्तिवत् करणत्वात् प्रत्यंजल्येव वाक्यं न तु वाचस्पतिमिश्रोक्तं सकृद्वाक्यं
क्वचिदगत्यैव स्वत्वसंभावनायां भविष्यद्द्रव्यत्यागेन तु गतिसंभवेपि । अथात्र देवपदप्रयोगे किं मानं उच्यते ततश्च नाम कुर्वीत पितैव दशमे हनि । देवपूर्वं नराख्यं
हि शर्म्मवर्म्मादिसंयुतमिति विष्णुपुराणात् दशमेऽनीतिसंकरेणाशौचह्रासे तदानीं नामकरणे बोध्यमिति प्रागुक्तं नरमात्र इत्यस्ति नरो रख्यं नरनामस्व्याख्य वन्मू
लविभुजादित्वात् कः देवपूर्वं दवात्पूर्वं तत्र विशिष्टं शर्म्मयुतं तच्चान्ते । शर्म्मण्यर्घादिके कार्यं शर्म्मन् तर्पणकर्म्मणि । शर्म्मणोक्षय्यकाले तु पितॄणां दत्तमक्षय
मिति । गोभिलदर्शनात् शर्म्मान्तं ब्राह्मणस्याहुर्वर्म्मान्तं क्षत्रियस्य च । धनान्तं चैव वैश्यस्य दासान्तं चान्त्यजन्मन इति शातातपीयाच्च श्रेणोति हि नास्ति अश्रुम
मिति मनङ् प्रत्ययात् सिद्धं देवपदं विप्रनाममात्रपरं शर्म्मा देवश्च विप्रस्य वर्म्मा त्राताचापि भूभुजः । भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेदिति कस्य तरु कुसुक म

36 दृष्टत्वयमवचनात्। अत्रापि चकारात् समुच्चयः। यत्तु शर्म्मेति ब्राह्मणस्योक्तं वर्म्मेति संश्रये। गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोरिति। तत्रेति पदस्वरसात् यद्यपि शर्म्मपदा
त्मकमेव नाम वगम्यते इति द्वैतनिर्णये पूर्वपक्षवर्णनं तद्विष्णुपुराणीयैतद्वचन प्रागवस्थितस्य ततश्च नाम कुर्वीत इत्याद्युक्तवचनस्यानभिज्ञानात्। किन्तु शर्म्मेतिवचनं शर्म्मव
र्म्मादिसंयुतमित्यस्यैव विशेषकमिति एतेनामुकशर्म्मप्रेतेत्यादि मैथिलानां वाक्यरचना हेया नागृहीतेत्यादि विरोधात् एतत् विष्णुपुराणोक्तदेवपदरहितत्वाद्गोभिलोक्तशर्म्म-
न्नित्यादिनिर्देशरहितत्वाच्च गोत्रनामानुवादद्दीत्याद्येकवचने गोत्रशब्ददर्शनाद्गोत्रपदमेवोच्चार्य्यं न तु पितृदयिता। कल्पतरुश्राद्धविवेकोक्तं गोत्रपर्य्यायकसगोत्रपदं एवं
श्राद्धेपि तथा च गोभिलः। गोत्रं स्वरान्तं सर्वत्र गोत्रस्याक्षय्यकर्म्मणि। गोत्रस्तु तर्पणे नोक्तः कर्त्ता एवं न मुह्यतीति एवमेव श्रीदत्तादयः आश्वलायन सव्याहृतो ब्रजन्त्यनवेक्ष
माणा यत्रोदकमवहं तत् प्राप्य सकृदुन्मज्ज्य एकं जलाञ्जलिमुत्सृज्य तस्य नाम गोत्रे गृहीत्वा उत्तीर्य्यान्यानि वासांसि परिधाय सकृदेवानापीड्य उदग्दशानि विसृज्यासतइति स* २६ २७
व्यमावर्त्तन्त इति सव्याहृतः अग्निमितिशेषः अवक्रमितियच्चदेशे न द्याः स्रोतो नास्ति तच्च स्नानव्यतिहारसतादयः। तेनाशौचिनोपि नदीरजो योगोपि नदीमज्जनं न निषिद्धं
सकृदुन्मज्जनसामर्थ्याच्च। सकृन्निमज्जनमयेति अनापीड्य आसमन्तात्कारेणापीडनमकृत्वाईश्व पीडयित्वा इत्यर्थः उदग्दशानि तथा त्याज्यानि वस्त्राणि यथा उदिव्यां दशाः प
तन्ति। शंखलिखितौ प्रेतस्य बांधवा यथा वृद्धपुरःसरमुदकमवतीर्य्य नोद्घर्षयेरन्नपः प्रसिंचेरन्निति जलयथा वृद्धपुरःसरमवतरणं जलादुत्थानं च बालपुरःसरं वै धावने न
तथोक्तत्वात्। नोद्घर्षयेरन्नस्मिन्स्नाने मलापकर्षणं न कुर्य्युरित्यर्थः। एवं च मरणो यथा वालं पुरस्कृत्य यज्ञोपवीतान्यपसव्यानि कृत्वा तीर्थमवतीर्य्य सकृन्निमज्ज्योन्मज्ज्य प्रे

तार्थमुदकमुत्सृज्य अत एव उत्तीर्याचमन्तीति बौधायनवचनेन यथावालं पुरस्कृत्य इत्यस्योत्तीर्य इत्यनेन सम्बन्धो न त्ववतीर्येत्यनेन तत्र गृह्यपुरःसरत्वस्योक्तत्वात् ततश्च जला
दुत्थानं वालपुरःसरमेवेति हारलता अपसव्यानि अपसव्यानीत्यर्थः अत एवास्मादेवोदकात् आतुरे विशेषमाह यमः। आतुरे स्नानसंप्राप्ते दशकृत्वस्त्वनातुरः स्नात्वा स्नात्वा
स्पृशेदेनं ततः शुद्ध्येत स आतुरः। पैठीनसिः। मृतं मनसा ध्यायन् दक्षिणामुखस्त्रीनञ्जलीन् त्रिन्नयेच्छावप्रभृत्येकादशाहे विरमेदेति। त्रीनिति प्रेतोपकारार्थं एकादशाहइ
त्याशौचापगमपरं। एतद्विरमणं पुत्रातिरिक्तपरं। स्नानं शौचमहादानं स्वाध्यायं चान्यतर्पणं। प्रथमेऽब्दे न कुर्वीत महागुरुनिपातने इति स्कन्दपुराणीयनिषेधे अन्येति
विशेषणात् पितृतर्पणमिति पाठे पितृपदं प्राप्तपितृलोकपरं। तेन तथैवार्थः पितृयज्ञमनुनिर्वर्त्य मासिकेश्राद्धएव तु। श्राद्धं प्रतिरुचश्चैवमातापित्रोर्मृताहनि। अ
सपिंडीकृतं प्रेतमेकोद्दिष्टेन तर्पयेदिति। जावालोक्तेः पितृयज्ञे पितृतर्पणं निर्वर्त्याहरहः क्रियमाणे। एषु घटश्राद्ध इति श्राद्धविवेककृतादिभिर्व्याख्यातत्वाच्च ॥०॥
अथ शौचापनोदनानि ॥०॥ याज्ञवल्क्यः। इतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान्। स्नातानिति वदेयुस्तान् इतिहासैः पुरातनैः। मनुष्यकदलीस्तम्भे निःसा
रे सारमार्गणं। यः करोति स संमूढो जलबुद्बुदसन्निभे। पंचधा संभृतः कायो यदि पंचत्वमागतः। कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना। गंत्रीवसुमती नाशमुदधि
र्दैवतानि च। फेणप्रख्यः कथं नाशं मर्त्यलोको न यास्यति। श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः। अतो न रोदितव्यं हि क्रियाकार्या विधानतः। इति संचिन्त्य गच्छेयु
र्गृहं वालपुरःसराः वदस्य निम्बपत्राणि नियता द्वारि वेश्मनः। आचम्याथाग्निमुदकं गोमयं गौरसर्षपान्। प्रवेशेयुः समालभ्य कृत्वाश्मनि पदं शनैः। प्रवेशनादिकं कर्म

37 प्रेतसस्पर्शिनामपि। इच्छतां तत्क्षणात् शुद्धिं परेषां स्नानसंयमात्। स्नातानिति तर्पणानन्तरं स्नानविधानात्। यथा छंदोगपरिशिष्टे। एवं कृतोदकान् सम्यक् मृदुशाद्वलसंस्थिता
न। आप्लुत्य पुनराचान्तान् वदेयुस्तेनुयायिनः। तर्पणानन्तरं प्रचेताः। तच्च स्नानं पुनः कार्यं गृहशौचं च कारयेत्। पंचधा संस्थितः कायः पृथिव्यादिपंचभूतात्मकतया निर्मितः।
पंचत्वमागतः पुनः पृथिव्यादिरूपतां प्राप्तः विदश्य दन्तैः खंडयित्वा अग्निस्पर्शो वक्ष्यमाणमंत्रेण कार्यः शिलायां पादन्यासोपि वक्ष्यमाणमंत्रेणेति बोध्यः। उक्तं प्रवेशनादिकं
यत्तत् प्रेतसंस्पर्शिनामेव कार्यं परेषाम् सपिंडानां तत्क्षणात् शुद्धिरिति छन्दोगानां स्नानात् प्राणायामात् शुद्धिरिति दीपकलिका। शंखलिखितौ। उत्तीर्य प्रेतस्पृष्टान्युत्सृज्य वा
सांसि परिधाय इति शाणि गृहद्वारि तस्मै प्रेताय पिंडं दत्वा पश्चात् दूर्वाप्रवालान् गोमयमजमग्निं वृषभं चालभ्य प्रविशंतो घृतगौरसर्षपैर्मूर्द्धनि चांगानि चालभेरन् शाखापाणयो ३७। २३
यथोक्तकालनियमा इति आलभ्य स्पृष्ट्वा। वैजवापः। शमीमालभन्ते शमी पापं शमयत्विति। अश्मानमालभन्ते अश्मेव स्थिरो भूयासमिति अग्निमग्निर्नः शर्म यच्छत्विति ।
स्योगित्यन्तरगोमजमुपस्पृशन्तः। नीत्वा स्कंधावा प्राप्य गृहमेकान्नमलवणमेकरात्रं दिवाभोक्तव्यं त्रिरात्रं कर्म्मोपरमणमिति। वृषभच्छागयोर्मध्ये स्योगिति मंत्रेण दावपि
स्पृष्ट्वा गृहं प्राप्य उपवासात्यन्ताशक्तेन क्रीत्वा लब्ध्वा वा एकान्नमेकरात्रमलवणं लवणरहितमेकरात्रं तदहोरात्रेपि दिवा भोक्तव्यं। कर्म्मोपरमेन संव्रीहनते लाभ्यंगमार्जनादित्या
गः। छंदोगपरिशिष्टे। एवमुक्त्वा व्रजेयुस्ते गृहं बालपुरःसराः। स्नानाग्निस्पर्शनाभ्यासैः शुद्धेयुरितरे कृतैः एवं शोकापनोदनं ते सपिंडसगोत्राद्याः इतरे संबन्धरहिताः स्त्रिर्निम
ज्य वारत्रयमग्निं स्पृष्ट्वा शुद्धा भवंति। हारीतः। न प्रेतस्पर्शिनो ग्रामं प्रविशेयुरानक्षत्रदर्शनात् रात्रौ चेदादित्यस्य ब्राह्मणानुमत्या वेति अशक्तौ ब्राह्मणानुमतिं गृहीत्वा प्रवेष्टव्यं आश्व
लायनः॥

नैतस्याशावन्नं पठेयुस्त्रिरात्रमक्षारलवणान्नाशिनः स्युर्द्वादशरात्रं महागुरुष्विति। नान्नं पठेयुरित्यनेनउपवासः प्रोचितः। अघस्त्वन्तरे अहमनश्नन्त इति वक्ष्यमाणात्। वि
रात्रमिति सपिंडनपरं। अक्षारलवणं क्षारमृत्तिकादिजन्यलवणभिन्नं तच्च सैन्धवं सांभरि च। यथा ब्रह्मपुराणं। सैन्धवं लवणं चैव यच्च सामुद्रकं भवेत् पवित्रे परमे ह्येते प्र
त्यक्षेपि नित्यशः पृथक्कृतयाउपलभ्यमानं लवणं प्रत्यक्षलवणं नतु व्यंजनादिसंस्कारकं। संस्कारप्रत्यक्षयोर्भेददर्शनात्। यथा कालिकापुराणं। मरीचं पिप्पली कोषं
जिरकं तन्तुभं तथा संस्कारे च समक्षे च महादेवैनिवेदपेत्। तन्तुभः सर्षपः वनमन्ते सर्षपे चंद्रैते(?)न्तुभ कदंबकौ इत्यमरकोषात् तन्तुलाभातीति तन्तुभ इति तट्टी
का। पिमहागुरुषु माता पितृपतिषु कर्मोपदेशिन्यां देवलः। अन्यश्राद्धपरान्नं च गन्धं माल्यं च मैथुनं। वर्जयेद्गुरुपाते तु यावत्पूर्णो न वत्सरः। पारस्करभाष्ये बृहस्प
तिः। पितर्युपरते पुत्रो मातुः श्राद्धान्निवर्तते मातर्यपि च वृत्तायां पितृश्राद्धादृते समं। अपृत इति मातुः श्राद्धादित्यत्राप्यन्वेति। अन्यथा पूर्वार्द्धवैयर्थ्यापत्तेः समांसंवत्सरं
यावन्निवर्तते अन्यश्राद्धादिति शेषः। अन्यश्राद्धमपि प्राप्तपितृलोकश्राद्धपरं। प्रमितौ पितरौ यस्य देहस्तस्याशुचिर्भवेत्। नापि दैवं नवा पैत्रं यावत्पूर्णो न वत्सरः।
इति देवीपुराणात्। तेन प्रेतश्राद्धान्न निवृत्तिः। तथा च कालिकापुराणं महागुरुनिपाते तु काम्यं किंचिन्न चाचरेत्। आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं दैवपुतं च यत्। एत
च्च देवपक्षयुतश्राद्धवर्जनं। अमावस्यादिमृताहक्रियमाणसदैविकश्राद्धेतरपरं। सर्वसामंजस्यात् तद्वत्क्रियास्तथा इति देवलीयेपाठः। शक्तविषमेव शिष्टः अघस्त्व
न्तरे अहमनस्त्वन्त आसीरन्निति। अघस्त्वन्तरे उपवेशनादौ पीठादिनिषेधात् अघनिमित्तेन कठादि विधानात् अघस्त्वन्तरः कठादिरिति अशक्तविषये रत्नाकरे विशेषमाहापस्त

३८ न्वः भार्याः परमगुरुसंस्थायां चाकालभोजनानि नकुर्वीरन्निति संस्थामरणं। अप्रकालं यत्र काले मरणं भूतं परदिने तत्कालपर्यन्तं। आदिपुराणे। अशौचमध्ये यत्नेन भोज
येत्तु सगोत्रजान्। विष्णुपुराणे। शय्याशनोपभोग्यश्च सपिंडानामपीष्यते। तस्यास्थिचयनादूर्ध्वं संयोगो न तु योषितां। तथा दातव्योऽनुदिनं पिण्डः प्रेताय भुवि पार्थिव दिवाभ
क्तं भोक्तव्यममांसं मनुजर्षभ। अत्र सपिण्डानां पिण्डदानाहदिनपर्यन्तममांसभक्षणश्रुतेः। मत्स्यमांसानि न भक्षयेत् पुरा प्रदानादिति गौतमसूत्रेपि। आप्रदानपदं एकाद
श्यामयुग्मान् ब्राह्मणान् भोजयेन्मांसवदिति कात्यायनसूत्रोक्ताद्यश्राद्धीयमांसदानाहदिनोपलक्षणं। अथ पिंडोदकादिदानं। पारस्करः। प्रेताय पिण्डं दत्वा अवनेजन
दानेषु प्रत्यवनेजनेषु नामग्राहं प्रेतायेतां रात्रिं विहायसि राज्ञोक्षीरोदके प्रेतास्नाहि पिव चेदं क्षीरमित्युत्त्वार्प्य निदध्युरिति। अत्रदानशब्देन पिण्डदानमुक्तं वहुवचनात् २८ ३३
तेनावनेजनपिंडदानप्रत्यवनेजनदानेषु नामग्राहं नाम गृहीत्वा पिण्डानुष्ठानं समाप्य विहायसि राज्ञोक्षीरोदके प्रेतात्रस्नाहि पिव चेदं क्षीरमित्युत्त्वार्प्य निदध्युरिति। आ
दिपुराणे। प्रथमेह्नि नियोदद्यात् प्रेतायान्नं समाहितः। यत्नान्नवस्तु चान्येषु स एव प्रददात्यपि। मृण्मयं भाण्डमादाय नरं स्नातः सुसंयतः। लगुडं सर्वदोषघ्नं गृहीत्वा तोय
मानयेत्। ततश्चान्तरपूर्वस्यामग्निं प्रज्वालयेद्दिशि। तंडुलप्रसृतीन्त्र प्रक्षाल्याद्भिः पचेत्स्वयं। सपवित्रैस्तिलैर्मिश्रां केशकीटविवर्जितां। वारदेशेन ततः क्षिप्ताशुद्धां वा
गौरमृत्तिकां। तत्पृष्ठे आस्तरेद्दर्भान याम्याग्रान्देशसंभवान्। ततो वनेजनं दद्यात् संस्मरन् गोत्रनामनी। तिलसर्पिर्मधुक्षीरैः संचितं तत्प्रमेव हि। दद्यात्प्रेताय पि
ण्डन्तु दक्षिणाभिमुखस्थितः। फलमूलगुडक्षीरतिलमिश्रन्तु कुत्रचित्। अर्घैः पुष्पैस्तथा दीपैर्धूपैस्तोयैः सुशीतलैः। ऊर्णातन्तुमयैः सूत्रैर्वासोभिः पिंडमर्चयेत्। प्रया

तिपावदाकाशं पिण्डाघ्रास्यमयी शिखा। तावन्नत्संमुखस्तिष्ठेत् सर्वं तोये ततः क्षिपेत्। दिवसे दिवसे देयः पिंड एवं क्रमेण तु। सद्यःशौचे पि दातव्याः सर्वेपि युगपत्तथा। त्र्यहाशौ
चे प्रदातव्याः प्रथमे त्वेक एव हि। द्वितीये ह्नि चत्वारस्तृतीये पंच एव हि। एकस्तोयांजलिस्त्वेवं पात्रमेकं च दीयते। द्वितीये द्वौ तृतीये त्रीं श्चतुर्थे चतुरस्तथा। पंचमे पंच षष्ठे षट् स
प्तमे सप्त एव च। अष्टमेष्टौ च नवमे नवैव दशमे दश। येन स्युः पंचपंचाशत्तोयस्यांजलयः क्रमात्। तोयपात्राणि तावन्ति संयुतानि तिलादिभिः। अत्राहः पदमहोरात्रप
रं। राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्य्यान्निशि काम्यव्रतेषु च। इति देवलवचने अत्यये मरणे रात्रावपि स्नानादिविधानात्। एवमेव श्राद्धविवे
कः। अत एव प्रागुक्तविष्णुपुराणे। अनुदिनमिति देवाचेति पृथगुक्तं। पिंडदाने अनुदिनमित्यत्र दिनपदमहोरात्रपरं। भोजने दिवा चेति दिवापदं सूर्य्यक्रियावच्छिन्न-
कालपरं। अन्यथा पूर्वत्रापि तथात्वे दिवा चेति पौनरुक्त्यापत्तेः। एतेन दिवशपदश्रवणाद्रात्रौ पिण्डो न देय इति मैथिलमतमपास्तं। अत्र दशमदिनपर्य्यन्तं प्रतिदिनं पि
ण्डदानाभिधानात्। पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयमिति याज्ञवल्क्योयं दिनत्रयं पिंडदानमावश्यकं अंगास्पृश्यत्वे पि तद्दानार्थं चेति हारलतादयः। स एवेत्येवकारा
त् प्रथमपिंडदातैव दशपिंडदानेधिकारीति दर्शयति तेन यदि पुत्रादेरसन्निधाने अन्येन प्रथमः पिण्डो दत्तः तदा दशाहमध्ये पुत्रादेरागमने पि दाशाहिकपिंडदानं पुत्रा
दिना न कर्त्तव्यं पुत्रादिस्तु दाशाहिके पिंडदानव्यतिरिक्तं सर्वं कुर्य्यादिति हारलता। आश्वलायनगृह्यपरिशिष्टं। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेह
नि यो दद्यात्स दशाहं समापयेदिति न च भरतदत्तपिण्डदानानंतरं। इंगुदं बदरोन्मिश्रं पिण्याकं दर्भसंस्तरे। न्युप्य पिंडांस्ततो राम इदं वचनमब्रवीत्। इदं भुंक्ष्व महाराज प्रीतो

२९ पदशनावयं। यदन्नः पुरुषोराजंस्तदन्नाः पितृदेवता। इत्ययोध्याकांडे पिंडदानश्रवणात् प्रधानाधिकारिणा पिंडशपिंडादेयाइतिवाच्यं। तत्रभरतश्चैवप्रतीतिः स्याद्राज्यं प्रा
पोत्सुत्तमं। प्रेतार्थं यत्समेदद्यान्मार्गो ततरसमुपागमदित्ययोध्याकांडे दशरथशापात्तत्कृतमपि विकृतमिति हेतिपुनस्तत्करणं न च प्रतीत्यभावात् कथं तस्य दानमितिवा
च्यं कुरुप्रसादं धर्मज्ञ कैकय्याभरतस्य च। सपुत्रांत्वांत्यजामीतियदुक्ताकैकयीत्वया। इतिसीतापरीक्षानन्तरं रघुनाथप्रार्थनानुपपत्तेः। अन्यत्र तु सएव इत्यनेनान्याधि
कारनिवृत्तिः प्रदद्यात्पीत्यत्रापि: अवधारणेऽव्ययानांनानार्थत्वात् अतएवापिशब्दो बहुतराश्चैवादिपुराणेषु निश्चयार्थः इतिहारलतातेनसएवदद्यादेवेत्यर्थः पुत्रा
द्यसन्निधाने येनसगोत्रादिना दाहसंस्कारः कृतस्तेनैव दशाहात्प्रेतकर्मकर्त्तव्यं प्रागुक्तासगोत्रः सगोत्रोवेति वचनादिति प्रथमाध्याये मिताक्षरा अतएव कर्मोपदे २८ ख
शिन्यां वायुपुराणे। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। यश्चाग्निदाताप्रेतस्य पिंडं दद्यात्सएवहि। अत्रेदं वीजं आरब्धपूर्वक्रियस्य तत्समापनमावश्यक
मिति वक्ष्यमाणाधिकारिप्रकरणस्थविष्णुपुराणवचनात् एवंचहारलतायांयेन प्रथमः पिंडो दत्त इति तत्प्रतिपादकवचनं च पूर्वक्रियारम्भप्रदर्शनपरं। किंचस
पिंडीकरणान्तानि यानिश्राद्धानिषोडश। पृथङ्नैवसुताः कुर्युः पृथग्द्रव्या अपिक्वचिदिति लघुहारीतेन मध्यमक्रियायाः पृथक्करणनिषेधात् सुतरांपूर्वक्रि
यासुतथैवयुक्तत्वात्। अन्यथासर्वपुत्राणां प्रत्येकं पिंडदानापत्तेः। अत्रेदं वीजं पूर्वक्रियाहेयातिवाहिकदेहत्यागोत्तरदेहान्तरजननं मध्यमक्रियाया अपिप्रेत
त्वपरीहारोत्तरदेहान्तरजननं ततश्चैकयैवक्रियया तत्सिद्धेः पुनस्तत्करणं वचनाभावादनर्थकं तथाच विष्णुधर्मोत्तरे। तत्क्षणादेव गृह्णाति शरीरमातिवाहिकं

ऊर्ध्वं व्रजन्ति भूतानि शीर्यस्मात्तस्य विग्रहात् । चीरीतेजोवाय्वाकाशानि तत्स्वरूपात् म्तत्पुरुषात् तथा आतिवाहिकसंज्ञोऽसौ देहो भवति भार्गव । केवलं तन्मनुष्याणां नान्येषां
प्राणिनां क्वचित् । तथा । प्रेतपिण्डैस्तथा दत्तैर्देहमाप्नोति भार्गव । भोगदेहमिति प्रोक्तं क्रमादेव न संशयः । प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणं । श्मशानिकेभ्यो देवेभ्य आ
कल्पं नैव विद्यते । तत्रास्य यातना घोरा शीतवातातपोद्भवा । अतः सपिण्डीकरणे बान्धवैः स कृते नरः । पूर्णे संवत्सरे देह मतोऽन्यं प्रतिपद्यते । ततः स नरके याति स्वर्गे वा स्वेन
कर्म्मणा । तथा च वायुपुराणं । पूरकेन तु पिण्डेन देहो निष्पाद्यते यतः । कृतस्य करणायोगात् पुनर्नावर्त्तयेत् क्रियां । अत एवातिवाहिकदेहादि परित्यागाय ततः कलीन
कर्म्मासमर्थे पुत्रसत्त्वेऽप्यन्येन दाहादि क्रियते । पितृमातृसपिण्डैश्च समानसलिलैर्नृप । संघातान्तर्गतैर्वापि राज्ञा वा धनहारिणा । पूर्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चो
त्तराः । इति विष्णुपुराणवचनेन मित्रबन्धुसपिण्डेभ्यः स्त्रीकुमारीभ्य एव च दद्याद्वैमासिकं श्राद्धं संवत्सरमतोऽन्यथा इत्यापस्तम्बवेन च सामान्यतोऽधिकारप्रतिपादनात् अ
तस्व पित्रादेरौर्द्ध्वदेहिकस्य असंस्कृतस्य करणे प्राशस्त्यमाहापस्तम्बः । असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः इति । अत एव बृहस्पतिः । सवर्णाजेप्यगुणवान् नार्हः
स्यात् पैतृके धने । तत्पिण्डदाः श्रोत्रिया ये तेषां तदभिधीयते । अगुणवानगुणाविरुद्धदोषवान् । अत्र नञ्विरोधार्थः । तस्मादश्यमभावश्च तदन्यत्वं तदल्पता । अ
प्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः । इति न्यायात् । शंखवापस्तम्बौ अप्रपात्रितस्य सकृत्पिण्डोदकानि निवर्त्तन्ते इति अप्रपात्रितो अत्युत्कटदोषेण ज्ञातिभि
र्मित्रोदकीकृतः । पितृधनाद्यनधिकारीत्यर्थः । एवं च पुत्रेषु विद्यमानेषु नान्यं वै कारयेत् स्वधामिति ऋष्यश्रृंगवचनं समर्थपुत्रपरं । एवं विदेशस्थत्वादिना वर्षाभ्यन्तर

कर्मासमर्थज्येष्ठपुत्रसत्त्वेपि प्रेतत्वपरिहारायकनिष्ठपुत्रेण षोडशश्राद्धं कर्त्तुमुचितं। मृतेपितरिपुत्रेण क्रियाकार्य्याविधानतः। बहवः स्युर्यदा पुत्राः पितुरेकत्रवासि
नः। सर्वेषामनुमतं कृत्वा ज्येष्ठेनैव तु तत्कृतं। द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्। इतिमरीचिवचनमपि समर्थज्येष्ठपरं अन्यथा तत्प्रेतत्वप्रतिबध्यकालान्तरापत्ति
स्युद्धि कर्म्मेन स्यात् ज्यष्ठत्वं चात्र ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणामनृणं चैव स तस्मात्सर्वमर्हति इति मनूक्तसर्वाग्रोत्पन्नमात्रत्वं न ग्राह्यं तस्य विभाग-
प्रकरणीयत्वात् किन्त्वापेक्षिकज्येष्ठपरं। यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृतेति मनुवचनात्। ज्येष्ठं गुणवयःकृतमिति मिताक्षराधृतदक्षवचनाच्च अत एव नवश्रा
द्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि सविभक्तधनेष्वपि। इति मिताक्षराधृतदक्षवचने अविशेषादेकेनैवेत्युक्तं सपिण्डत्वं पिंडमिश्रणमिति ४० ध्रु
अतो न षोडशश्राद्धान्तर्गतसपिंडीकरणश्राद्धे न पौनरुक्त्यमिति एतेन श्राद्धानि षोडशापाद्य विदधीत सपिण्डतामित्यपि व्याख्यातं अत एव श्रीरामप्राप्तिशंकया भ
रतेनाद्यादिश्राद्धं कृतं तथाचायोध्याकाण्डे समतीते दशाहे तु कृतशौचो विधानतः। चक्रे द्वादशकं श्राद्धं त्रयोदशिकमेव च। ददौ चोद्दिश्य पितरं ब्राह्मणेभ्यो धनं
तदा। महान्ति च रत्नानि गाश्च वाहनमेव च। यानानि दासीर्दासांश्च वेश्मानि सुमहान्ति च। भूषणानि च मुख्यानि राजन्तस्त्यौर्ध्वदेहिके। त्रयोदशाहे तीते तु कृते चा
नन्तरे विधौ। समेता मंत्रिणः सर्वे भरतं वाक्यमब्रुवन्। गतः स नृपतिः स्वर्गं भर्त्तासीद्यो गुरुश्च नः। प्रव्राज्य दयितं पुत्रं रामं लक्ष्मणमेव च। त्वमद्य भव नो राजा धर्म्मा
त्मा नृपरात्मजः। दशाहग्रहणमशौचकालोपलक्षणं। द्वादशिकं द्वादशाहेन निर्वृत्तं त्रयोदशाहविधेयमित्यर्थः। त्रयोदशिकं चतुर्दशाहविधेयमित्यर्थः।

त्रयोदशिकं च तद्दशाहविधेयमित्यर्थः। इति श्राद्धविवेकः॥ न च यत्र देशान्तरादावनुमितिद्रव्यसंश्लेषयोरभावस्तत्र तत्र पृथगेव श्राद्धं अन्यथा प्रत्यवायपरीहारो न स्या
त् इति श्राद्धविवेकोक्तं युक्तमिति वाच्यं। पृथक्कुर्युरेव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् इत्युपादानात् पृथक्करणनिषेधेन सर्वेषां तु मतं कृत्वेति द्रव्येणाचाविभक्ते
नेति विशेषणद्वयस्वारस्यलभ्यपृथक्करणविध्यन्तरकल्पनापत्तेः तदुक्तं शुद्धिप्रकाशे निवर्त्तयति यो मोहात् क्रियामन्यनिवर्त्तितां। विधिघ्नस्तेन भवति पितृहा वो
पजायते। तस्मात्प्रेतक्रियायेन केनापि च कृता यदि। नतां निवर्त्तयेत्प्राज्ञः सतां वाक्यमनुस्मरन्। इति वायुपुराणाच्च। सर्वेषां तु मतं कृत्वेति द्रव्येणाचाविभक्तेनेत्यनेन
तेषामेतदेव कर्त्तव्यमिति प्रतिपादितं। न तु तदभावे पृथक्करणविधायकं विध्यन्तरकल्पनापत्तेः। अत एव संवत्सरप्रदीपे हलायुधेनोक्तं यदि वै भ्रातृयः कनि-
ष्ठोऽग्निमान् ज्येष्ठो निरग्निस्तदा कनिष्ठेन दर्शादर्वाक् सपिण्डने कृते सपिण्डनं ज्येष्ठेन पुनर्न वर्त्तनीयं पृथक्करणनिषेधात् एवं कनिष्ठस्य दृष्टत्वपनिपाते पि वोद्ध
व्यं। एतच्च विदेशस्थज्येष्ठे वोध्यं। स्वदेशस्थे तु तद्द्वारैवाप्यस्य कनिष्ठेन कर्त्तव्यमिति श्राद्धचिन्तामणौ तु। यद्यपि अकृत्वा प्रेतकार्याणि प्रेतस्य धनहारकः। वर्णा
नां यद्वधे प्रोक्तं तद्व्रतं नियतश्चरेत्। इति शंखवचनेन। सर्वेषामेव पुत्राणां प्रेतश्राद्धकर्तृत्वमायाति तथापि। स्वीयस्वीयधनदानद्वारा कारयितव्यं सर्वेषां तु म
तं कृत्वेति लघुहारीतवचनादित्युक्तं प्रत्याब्दिकमेव पृथक्करणमाह लघुहारीतः। प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुताः पृथक्। यावन्त एव पुत्रास्युः पिण्डास्ता
वन्त एव हि इतरे प्रेतकार्याधिकार्यन्ये। कन्यो वैवाहिकं चैव प्रेतकार्यं च यत्कृतं। एतत्सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोरिति कात्यायनवचने प्रभोरिति कर्त्तरि ष

५।

क्रीतेनप्रभुनादातव्यमित्यर्थः इतिरत्नाकरात् नह्ययितद्रव्यदाना दपिप्रत्यवायानुदयः। किंचाप्रतिषिद्धमनुमतंभवतीतिन्यायेनप्रतिषेधाभावात्तद्द्रव्यदाना
दपि प्रत्यवायानुदयः। किंचपृथङ्नैवसुताः कुर्युरितिश्रवणात् सर्वेषांतु मतंकृत्वेत्यत्र सर्वेषांपुत्राणांफलायेदंश्राद्धंभवत्विति मतेज्ञानंकृत्वेतिव्याख्यानाच्च
अतएवव्यासेनोक्तं अर्वाक्संवत्सरात् श्राद्धं ततःकुर्यात्समेत्यच। ऊर्ध्वं सपिंडीकरणात्सर्वेकुर्युःपृथक्पृथक्। ततःयेनषोडशश्राद्धंक्रियतेतेनावश्यंस
र्वसुतार्थाभिसन्धानेनतत्क्रियतइतिप्रतिनिधिनापितत्करणंसिद्धं। नचयस्यप्रतिनिधिस्तेनतदकरणेकथंप्रतिनिधित्ववाच्यं। ऋत्विक्चत्रिविधोदृष्टःपूर्वैर्यु
ष्टःस्वयंकृतः। यदृच्छयातुयःकुर्यादार्त्विज्यंप्रीतिपूर्वकं इतिविवादकल्पतरुरत्नाकरचिन्तामणिदीपिकाधृतयज्ञपार्श्ववचने यजमानेनप्रतिनिधित्वाकरणे-
पित्नीपार्त्विजः। स्वेच्छयातद्दर्शनात्पूर्वैःपूर्वपुरुषैः भेदप्रयोजनंचतत्रैव ऋत्विग्याज्यमदुष्टंयस्त्यजेदनपकारिणां। अदुष्टमृत्विजंयाज्योविनेयौतावुभावपि ४१ ख
अन्यागतेष्वेषधर्मोहृतेकृत्विक्षुचस्वयं। यादृच्छिकतुसंयोज्येतत्त्यागेनास्तिकिल्बिषं। विनेयौदंडनीयौ संयोज्यप्रेषणार्हे ऋत्विजि अतएवाकृतवरणार्त्विजःप
रित्यागशंकायामेव यज्ञपार्श्वः। अहृतऋत्विक्कर्मणि नैवकुर्यान्नकारयेत्। अन्यथायदृच्छया ऋत्विगनुपपत्तेः। परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्यु-
क्ष्याग्निमुपसमाधायदक्षिणतोब्रह्मासनमास्तीर्य्य प्रणीयपरिस्तीर्य्यार्थवदासाद्यपवित्रेकृत्वाप्रोक्षणीःसंस्कृत्यार्थवत् प्रोक्षणीरुपवज्यमधिश्रित्यपर्य्यग्निंकु
र्यात्। एवंप्रतप्यदर्भैःसंमृज्याभ्युक्ष्यपुनःप्रतप्यनिदध्यात् आज्यमुद्वास्योत्पूयावेक्ष्यप्रोक्षणीःपूर्ववदुपयमनकुशानादायसमिधोभ्याधायपर्युक्ष्यजुहुयादिति

कात्यायनेन परिसमूह्योपक्रमे पूर्णाहोमपर्य्यन्तव्यापारकलापस्यैककर्तृत्वप्राप्तावप्यारब्धकर्म्मर्त्विजि विनष्टे अन्यत्विगन्तरेण तत्कर्म्मसमापनोक्तेः ॥ तथाच याज्ञव
ल्क्यः । जिह्मं त्यजेयुः निर्दोषमशक्तोऽन्येन कारयेत् । अनेन विधिना व्याख्यात आर्त्विककर्षक कर्म्मिणां । व्यक्तमाहतुः शंखलिखितौ अन्वावदनुप्राप्ते सवने अर्त्विङ्
म्रियते तत्र किं कार्य्यमिति जिज्ञासायां तस्य सगोत्रः शिष्यो वा तत्कार्य्यमनुपूरयेत् । अथचेदबान्धवस्ततोऽन्यमृत्विजं वृणुयादिति । अनुप्राप्ते आरब्धे सवने यज्ञे एवं प्रेत
कार्ये प्रथमाधिकारिविनाशेऽन्येनापि शेषः समाप्यते । तदाह बृहस्पतिः । एवं क्रिया प्रवृत्तानां यदि कश्चिद्विपद्यते । तदन्यूना क्रिया कार्य्या सर्वैर्वा सहकारिभिः । नच
यत्र सत्रे यथैकापाये कर्म्ममध्य एव सर्वेषामुत्थानं कर्म्मसमापनेऽभुक्तं । तद्वदत्रापि इति वाच्यं । तत्र फलस्य स्वगतत्वेन तथा सिद्धान्तितं अत्र तु परगतत्वे नान्येनापि तत्समा
पनमिति अथ द्वितीयाधिप्रतत्वपरिहाराय कालविहितसंकल्पं विना कथं क्रियते इति चेत् न षोडश श्राद्धानां नित्यत्वात् प्रथमाधिकारिणापि तत्संकल्पो न क्रियते ।
तन्नित्यत्वमाह छन्दोगपरिशिष्टं । ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा । द्वादशप्रतिमास्यानि आद्यं षाण्मासिके तथा । सपिण्डीकरणं चैव इत्येतत् श्राद्धषोडशं ।
ध्रुवाणि आवश्यकानि । तथाच मनुः । तत्र ब्राह्मणानामेकपिण्डस्वधानामादशमात् धर्म्मो विछित्तिर्भवति आसप्तमात् अस्य च विछित्तिर्भवति । आतृतीयात्स्वधा
विछित्तिर्भवति । अन्यथा शौचक्रियाविच्छेदात् ब्रह्महत्याभवतीति श्रुतेः । कर्तुरकरणे तन्निष्ठप्रत्यवायश्रवणात् कर्तुरावश्यकानि बोद्धव्यानि । एवंचाशौचादिशंक
या भविष्यद्दुर्गोत्सवादौ यद्वरणादिकं तत्कर्म्म कालेप्रवर्त्तनीयं न तु तत एव । तत्र प्रतिनिधिर्भवति किन्तु कर्म्मकाले स्वयमेव तदर्थं कर्म्म क्रियते अन्यथा अनुचितत् कालजो

42 विलेनाधिकाराज्ञदानीमधिकाराभावात् कथं प्रतिनिधिविधानमिति । अत एव शंखलिखितौ राज्ञां पुरोहितोमात्यः शुद्धिस्तस्य तदाश्रया । नृपतीनामात्मप्रतिनिधीभूतः
पुरोहितः । तेन नृपतेरशौचे पुरोहितस्याशौचाभावात् नृपतेः शान्तिकं पौष्टिकं कर्म्म पुरोहितेन स्वीयशुद्ध्या कर्त्तव्यमिति हारलतादयः । एवं चेदशौचि द्रव्येण कथं क्रियते इ
ति चेन्न शुचितत्कालीनतदर्थोपकल्पितत्वात् तथा च यमः । दैवे भये समुत्पन्ने प्रधानांगे विनाशिते । पूर्वसंकल्पिते र्थे वा तस्मिन्नाशौचमिष्यते । सप्तांगराज्यस्य प्रधानांगे
राजनि किंचित्कर्म्मकार्य्यं पुष्करिण्यादि कर्त्तुं पूर्वं शौचकाले धनं संकल्पितं पृथक्कृते तस्मिन् कार्य्ये शौचं नास्ति इति हारलताकृतचिन्तामणौ । विवाहोत्सवयज्ञेषु अन्तरा मृतसू
तके पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति । प्रथमकर्तृनियमवत् प्रथमपिण्डद्रव्यनियममप्याह शुनःपुच्छः । प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाहिके । विष्णुः । यावदशौ ४२ शु
चं तावत्प्रेतस्योदकं पिंडमेकं च दद्युरिति यावत्तावदित्यभिधानात् अशौचाभ्यन्तर एव पिंडदानं मुख्यं दैवान्तराकरणे मध्यमक्रियायाः पूर्वकालकर्त्तव्यता अग्रगामि
क्रियामुख्यकालस्याप्यन्तरालवत् । गौणकालात्वभिक्रान्तिके चिन्ता कानकर्म्माणि इति वचनेन प्राप्तपूर्वक्रियस्यैव मध्यमक्रियाभागित्वावगमात् अन्तरालवन्मध्यकाल
स्यैव अग्रगामिक्रियामुख्यकालस्य गौणत्वमिति पक्षान्तरं । जलसमीपे पिण्डदानमुक्तं स्वल्पमत्स्यपुराणे । प्रेतीभूतस्य सततं भुवि पिण्डं जलं तथा । सतिलं सकु
शं दद्यात् वहिर्जलसमीपतः । ऋष्यशृंगः । न स्वधां च प्रयुंजीत प्रेतपिंडे दशाहिके । भाषेते तत्र वे पिण्डं यत्तदन्नस्य पूरकं । यस्य न ज्ञायते गोत्रं तन्नाम्ना तु निर्वपेत्
दशाहिकग्रहणादेकदेशाहिकश्राद्धे स्वधाप्रयोगोस्तीति हारलता । न च स्वधा पितृहविर्द्दानमंत्र इति प्रेतस्य पितृत्वाभावात् कथं तत् प्रयोग इति वाच्यं पित्र्ये तु

द्विगुणादर्भा इतिवत् पितृपदस्य प्रमीत वचनत्वात् । दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च । प्रेतपिण्ड क्रियावर्जं सूतके विनिवर्त्तते । इति शंखवचने पितृपदस्य प्रमीतमा-
त्र वचनत्वे न प्रेतपिण्डस्य पितृकर्म्मत्वात् तद्वर्जनमुपपद्यते अन्यथा प्रसक्त्यभावात् प्रतिप्रसववैफल्यापत्तेः । पितृयज्ञन्तु निर्वर्त्य मासिकश्राद्धमेव चेति पूर्वोक्तेन प्रेततर्पणोवि-
हितयज्ञपदप्रयोगाच्च । एवं च प्रेतश्राद्धेपि भूस्वामिपितृभ्योग्र दानं संगच्छते अत्र भाषणाविधौ पिण्डयज्ञदत्तस्य पूर्वकमित्येतन्मात्र श्रवणात् शिरःपूरकमित्याद्युक्ते स्वप्रमाणं
नास्ति । न च शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा । द्वितीयेन तु कर्णाक्षि नासिकाश्च समासतः । गण्डांसं भुजवक्षांसि तृतीयेन तथा क्रमात् चतुर्थेन तु पिण्डेन नाभिलिंगगु-
दानि च । जानुजंघे तथा पादौ पंचमेन तु सर्वदा । सर्वकर्म्माणि षष्ठेन सप्तमेन तु नाडयः । दन्तलोमाद्यष्टमेन वीर्य्यं च नवमेन च । दशमेन तु पूर्णत्वं तृप्तताक्षुद्विपर्ययः ।
इति ब्रह्मकूर्म्मपुराणवाक्यं प्रमाणमिति वाच्यं । तद्वाक्येन तत्तत्पिण्डस्य तत्तदंगकरणं विधीयते । भावेनेति वदुक्तेस्तदनभिधानात् । पूर्णत्वं तृप्तताक्षुद्विपर्ययश्च पूर्ण-
त्वपूरणानुपपत्तेः पूर्णत्वपूरणयोरेकार्थत्वात् । प्रेतपिण्डैस्ततो देहमाप्नोति भार्गवेति विष्णुधर्म्मोत्तरे । देहश्रुते देहपूरकमिति प्रयोगापत्तेश्च । तस्मादनिरुद्ध-
भट्टाद्युक्तः । केवलपूरक इति प्रयोग एव युक्त इति । तोयैः सुशीतलैरित्यस्य विधानमाह एकस्तोयांजलिस्त्वेवं पात्रमेकं च दीयते इत्यादिना लाघवान्न पृथग्दानं
तथा तोयांजलेरुपस्थितत्वात् लाघवात् पात्रमपि तदाधाररूपं न तु भिन्नं अत एव तोयपात्राणि तावन्तीत्युपसंहृतं तदप्याममृण्मयं अशुच्यशुचिना दत्तमाममृद्घटक-
लादिनेति वक्ष्यमाणात् आममृद्घटकलादिना अशुचिद्रव्यमित्यर्थः । तद्दानं च तूष्णीमाह । शुनः पुष्पफलमूलैश्च पयसा शाकेन च गुडेन च । तिलमिश्रन्तु दर्भेषु

42 पिंडं दक्षिणातो हरेत्। द्वारे पिंडः प्रदातव्यो देवतायतनेषु वा॥ तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च। तूष्णीं प्रसेकमिति स्नानपानपात्रस्थजलांजलिमिति हारलता। तेन प्रसक
पदं कर्म्मणि व्युत्पन्नं। अतो नैमैथिलानां वाक्यरचना हेयैव। यदप्युक्तं इदं च पाद्यांजल्योर्दानं। पिण्डोपर्य्येव द्वितीयेद्वाविंशादिना तस्यैवाधारकथनात् न च द्वितीयदिनादिकं
तदर्थः सद्यस्त्र्यहाशौच पिंडदानस्याप्युपक्रमादिति वाचस्पतिमिश्रेण तदप्युक्तं द्वितीय इत्यादावपि द्वितीये ऽप्रहनि चत्वार इति पूर्ववचने ऽहश्शुते रत्नाविविशेष्यत्वेन त
देवान्वेति न तु पिण्ड इति अतएव मिताक्षरायां प्रचेताः। दिने दिनें ऽजलीन पूर्णान् प्रदद्यात् प्रेतकारणात्। तावद्वृद्धिश्च कर्त्तव्या यावत्पिंडः समाप्यते। प्रतिदिनमंजली
नां वृद्धिः कार्य्या यावद्दशमः पिण्डः समाप्यत इति। अतएव भुवि पिण्डं जलं तथेति मात्स्यं प्रागुक्तमिति तथा च प्रचेताः। गृहद्वारे तस्मै प्रेताय पिंडं निर्वपेत् भूमौ मात्स्यं
पाणीयं दीपं चोपलिप्तायामिति। सद्यस्त्र्यहाशौचयोस्त्वगत्या पिण्डदानसंकलनवत् स्नानपानपात्रदानसंकलनमिति यदप्युक्तं पुष्पादिदानसाहचर्य्याद्दूषणं द्व ४२ श्रा
त वस्त्रदानं तूष्णीमिति तन्न पिण्डयज्ञाकृता देयं प्रेतायान्नं दिनत्रयमिति याज्ञवल्क्येन पिण्डपितृयज्ञेति कर्त्तव्यतातिदेशात् पिण्डपितृयज्ञे च गोभिलेन सव्ये
नैव पाणिना सूत्रतन्तुं गृहीत्वा अपसव्येन विपूर्वस्यां कर्ष्वां पिण्डे निदध्यात् पितुर्नाम गृहीत्वा अत्र मावेतत्तेवासो ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति सू
त्रेतन्तुषु वासः प्रयोगात्। वाक्यरचनाभिधानाच्च। न वस्त्रदानं न वा तूष्णीमिति अपसव्य पितृतीर्थेन तथा च मदनभाष्ये गृह्यान्तरं। तर्जन्यंगुष्ठ
योरन्तरा अपसव्य अपसव्यं वा तेन पितृभ्यो निदधातीति। अतएव मनुना पितृतीर्थे ऽपसव्यपदं ऽउक्तं यथा प्राचीनावीतीना कार्य्यमपसव्यमतंद्रिणा इति मरीचिः।

प्रेतपिंडं बहिर्दद्यान्मंत्रदर्भविवर्जितं । प्रागुदीच्यां चरुं कृत्वा स्नातः सुसमाहितः । अत्र दर्भवर्जनं चूडाकालेप्यकृतचूडानां उपनयनकालेप्यकृतोपनयनानां कन्या
नामनूढानां च अन्यथा हारीतवचने तत्र कुशोपादाने व्यर्थं स्यात् असंस्कारा इत्यनेनैव सर्वेषां प्राप्तत्वात् यथा हारीतः । अकृतचूडाये बालाये च गर्भाद्विनिःसृताः । मृता
ये चाप्यसंस्कारास्तेषां भूमौ प्रदीयते । ये च गर्भाद्विनिःसृता इति स्वे हाहाकृपक्षे तथा यमः । अनूढा याम्मृता कन्या तस्या भूमौ प्रदीयते पिण्ड इति शेषः । अन्येषामन्वादिपु
राणोक्तत्वाद्दर्भेष्वेव । अत्रापि वेदीकरणमाह ब्रह्मपुराणं ततो दक्षिणपूर्वस्यां कार्या वेदी तथा दिशि । हस्तमात्रा तथा भूमेश्चतुरंगुलमुच्छ्रिता । पिण्डनिर्वापणार्थाय रम
णीया विशेषतः प्रागुदीच्यामैशान्यां चरुं कृत्वेत्यनेन छंदोगपरिशिष्टोक्तचरुपाकविधिर्लभ्यते । यथा स्वशाखोक्तश्चरुः स्विन्नोऽदग्धो कठिनः शुभः । नैवातिशि
थिलपाक्योनचवीतरसोऽभवेदिति । नवीतरसोऽगालितमण्ड इति नारायणोपाध्यायः । स्वगृह्योक्तश्चरुस्तु स्विन्न इति पाठान्तरं सुस्नातः सशिरस्कस्नातः । त्र्यहपिंडदाने आ
दिपुराणोक्तात् । पक्षान्तरमाह पारस्करः । प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः । द्वितीये चतुरो दद्यादस्थिसंचयनं तथा । त्रींस्तु दद्यात्तृतीये ह्नि वस्त्रादि क्षालये
त्तथा । एकोद्दिष्टं तु कर्त्तव्यं श्राद्धकर्म ततः परं । आदिपदं प्रागुक्तक्षौरादि समस्ताशौचान्तकृत्यपरं । त्र्यहपिण्डदाने सामगादिभिः स्वशाखिककर्मविशेषाभा
वे पौराणिकवत् पारशाखिकमपि गृह्यते । यत्राम्नातं स्वशाखायां परोक्तमविरोधि च । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिवत्सदा इति छंदोगपरिशिष्टोक्तेः । ऋग्वेदि
नां तु । अनुदकमधूपं च गंधमाल्यविवर्जितं । निनयेदश्मनि पूर्वं ततः श्राद्धं प्रकल्पयेदित्याश्वलायनगृह्यपरिशिष्टवचनात् । मृन्मयपात्रस्योदकांजलिगंधादिरहि

५५ तं प्रस्तरोपरि पिण्डदानमिति शेषः। मत्स्यपुराणे। तस्माद्विधेयमाकाशे दशरात्रं पयस्तथा। सर्वतापोपशान्त्यर्थमध्वश्रमविनाशनं। पयः शब्दाज्जलं दुग्धं प्रतीयते पार
स्करीये तथादर्शनात्। पारस्करीयेनांरात्रिमित्यभिधानात्तत्प्रकारा चे आवश्यकं दशरात्रे जलदुग्धदानं फलातिशयार्थं अशौचे दिवाभोजननियमात्तदनंतरमपि एत
द्वावेव प्रतीयते सद्यः शौचे तु द्वे सन्ध्ये सद्य इत्याहुरित्युक्तकालयुगपद्दश पिण्डा देयाः स्वाशौचकाले पिण्डानुरोधात् अत एव पिंडः शूद्राय दातव्यो दिनान्यष्टौ नवा
थवा संपूर्णे तु ततो मासे पिण्डशेषं समापयेदिति प्रचेतोवचने संपूर्णो मास इति पदं लक्षणया मासान्तिमदिनमिति सर्वैर्निबन्धृभिर्व्याख्यातं। कालादर्शकर्मोपदेशि-
नीप्रभृतिग्रंथेषु शातातपः। भर्तुः पिंडः प्रदाने तु साध्वी स्त्री चेद्रजस्वला। वस्त्रं त्यक्त्वा पुनः स्नात्वा सैव दद्यादनुपूर्वकं। भवेन्नारी रजस्वलेति पाठो व्यासवचने। श्रा
द्धमेव पंचाहे गौतमेनोक्तः यथा अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराह्निके। रजस्वला भवेत्सा तु कुर्यात्तत्पंचमेऽहनि। अत एव छंदोगपरिशिष्टे। अशुच्यशुचिना ४४ श्रु
दत्तमासमुद्धकलादिना। अनिर्गतदशाहास्तु प्रेता पक्षांसि भुंजते। इति सामान्यतोऽशुचिदत्तमभिहितं अशुचिनदीरजोयोगेन दुष्टमपि जनं। यथा उपाकर्माणि-
चोत्सर्गे प्रेतस्नाने तथैव च। चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते। अत एव रजस्वलाशुद्ध्युत्तराशौचाहासत्वएवाशौचकालानुरोधात्तन्मध्ये तया पिंडस्य दान
मिति व्यवहारः। एवमेवाग्दत्तायाः कन्यायाः एकाहे दशानां पिण्डानां दानानुरोधादेकाहाशौचं निबन्धृभिः कल्प्यते। तथा च ऋष्यशृंगः अपुत्रस्य च या पुत्री से
वपिंडप्रदा भवेत्। तस्य पिण्डान्दशैतान्वा एकाहेनैव निर्वपेत्। दशैतान्वा इति वाकारो दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता। चतुर्थेऽहनि तास्तेषां कुर्वीरन्सु

समाहिता इत्यादिपुराणोक्तत्रिरात्रापेक्षायाव्यवस्थितविकल्पार्थः। अदत्तामित्यत्र तत्र सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकी
र्त्तिता इति अनुन्यासानुसारेणाऽऽशब्दार्थे नञ् अप्यश्रृंगवचनानुरोधात् तेन वाग्दत्ता इति गम्यते अतएव कृतचूडाकन्या वाग्दानपर्यन्तमेकाहेन दशपिराडान् दद्या
त् वाग्दानोत्तरकाले तु त्रिरात्रेणेति हारलताकृतः तद्व्यवस्थायां वासनाचेयं पूर्वोक्तादिपुराणवचनात् कन्यापामरणो पितुर्वाग्दानपूर्वापरयोरेकाहत्र्यहविधाना
त्तस्या अपि पितृमरणे तथैवेति एवं च यन्मरणे यस्य यदशौचं तन्मरणे तस्य तदशौचं वाधकाभावात् कल्प्यते तथादिपुराणे मातामहानां दौहित्राः कुर्वन्त्यहनि
चापरे। ते पितेषां प्रकुर्वन्ति द्वितीयेऽहनि सर्वदा। जामातुः श्वशुरश्च कुलस्तेषां तेपि च संयताः। मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा। भागिनेयसुतानां च स
र्वेषान्त्वपरेऽहनि। श्राद्धं कार्यं च प्रथमं स्नात्वा हत्वा जलक्रियां। अपरेन्यशौचकालादित्यर्थः। एवं द्वितीयेऽहनीति देवलः। भर्तुर्गुरोरशौचं स्यात् कृत्स्नप्रसवका
रणं। कारणान् गच्छति प्रेष्यं तदाशौच्यं न तत्र न व्रजेत्। मतसंवन्धशौच प्रोष्याणां गुरुसम्वन्धशौचं शिष्याणां योग्यत्वात् भर्तृसम्वन्धसौचे विशेषमाह कारणा
दिति कारणादेकत्रवासात्। यथा बृहस्पतिः। दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः। स्वामितुल्येनशौचेन शुद्ध्यन्ति मृतसूतके। अन्तेवासिनमाहना
रदः। स्वं स्वं शिल्पमिच्छन्नाहर्तुं वान्धवानामनुज्ञया। आचार्यस्य वसेदन्ते कालं कृत्वा तु निश्चितं। विप्रस्य दास्यं निषेधयति कात्यायनः। त्रिषु वर्णेषु विज्ञेयं दास्यं
विप्रस्य न क्वचित्। समवर्णेषु विप्रस्य दासत्वं नैव कारयेत्। तदाशौचं प्रेष्यसंवंधाशौचं भर्तृगामिनं भवतीत्यनेनापि तथा कल्प्यते अन्यथा तन्निषेधो न स्यात् प्रशक्तय

45 भावादिति रत्नाकरभट्टाचार्यचरणाः। न च प्रेते राजनि सज्योतिरिति राजमरणे प्रजानां सज्योतिर्विधानात् प्रजामरणे राज्ञस्तथाशौचापत्तिरिति वाच्यं राज्ञान्तु सूतकं नास्तीति
पराशरेण निषिद्धत्वात् न चैतत् व्यवहारप्रदर्शनमात्रपरं तन्मात्रपरत्वे प्रमाणाभावात् किन्तु राजत्वेनैव यदशौचं। प्रेते राजनि सज्योतिरित्यादिना प्रजानां विहितं तत्प्रजा
मरणेपि तेषां तत्प्राप्तौ राजत्वेनैव राज्ञां तु सूतकं नास्तीति विहितं कारणं ब्रूहीति प्रेष्यं तदाशौच्यं न तान् ब्रूयादिति निवासराजनि प्रेते तदहः शुद्धिकारणं। महीपतीनां ना
शौचं हतानां विद्युता तथा। इति याज्ञवल्क्यवचनेपूर्वार्द्धेन राजमरणे प्रजानामशौचविधानात् प्रागुक्ततेपि तेषां प्रकुर्वन्तीति वत् तन्मरणेपि राज्ञामशौचप्राप्तौ महीपती
नामित्यनेन निषिध्यते एवं च राज्ञः क्षत्रियादिनायदशौचं तस्यनेदं सामान्यतो बाधकं किं तु तत्रापि राजत्वनिमित्तकव्यवहारादिदर्शनेऽशौचाभावपरमपि नशौचं राज्ञां ४५ ग्र
राजकर्म्मणीति विष्णुसूत्रानुरोधात् यत्त दत्तानां भर्तृगृहावस्थानेप्येकाहे दशपिंडदानमुक्तं हारलतायां तन्निस्तत्र प्रमाणं न विद्मः। किन्तु दत्तानां चाप्यदत्तानामित्यत्र
ताशत्यनेन संप्रदत्तानां वाग्दत्तानां च त्र्यहाशौचप्रतीतेः त्र्यहेनैव पिंडदानं प्रयुक्तं। पित्रोरुपरमे स्त्रीणां मूढानां तु कथं भवेत् त्रिरात्रेण विशुद्धिः स्यादित्याह भगवान्म
नुः। इति प्रागुक्तत्वाच्च। दत्तानामित्यनेन पितुर्यत्रिरात्रं विहितं तत्पिंडदातृत्वेनैव अन्यथा दत्तानां भर्तुरेवेत्यनेन विशेषवचनाभावेपि तत्पक्षे अशौचनिवृत्तेरि
त्यनुपपत्तेः अशौचान्तदिनकृत्यमशौचशंकरे प्रसंगादुक्तमिति नेह वितन्यते॥ अथाशौचान्तद्वितीयदिनकृत्यं। देवलः। अपराह्णः स्तनिर्हृत्ते सुसुस्नाताः कृतमंग
लाः। आशुच्यादिप्रमुच्यन्ते ब्राह्मणान स्वस्ति वाच्य च। मंगलं स्वशार्दूलोक्तं शान्त्युदकगोहिरण्यादिस्पर्शः जलादिस्पर्शमाह मनुः। विप्रः शुद्ध्येदपस्पृष्ट्वा क्षत्रियो वा

ह्नायुधं। वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतः क्रियः। कृतक्रियो ह्यशौचकालोत्तरं। कृतस्नान इति मिताक्षरा समाप्ते दशाहे कृत्य इति हारलता अघाहः सुनिवृत्तेषि
त्यनेन एकादशाहादरशौचान्त द्वितीयाहत्वं सूचितं एकादशाहादौ स्यानादेः पूर्वमशौचान्तर निमित्तपाते प्रसंगकार्यं च अत एव तत्रान्तर्दशाह इत्युक्तं अत्र सुस्नात इत्यादि
नाविप्रः शुद्ध्येदपस्पृश्य इत्यादिना च यथाशक्ति समुच्चयार्थ विकल्पाभ्यां न तत्कालीन वैदिककर्माहितेति ततः स्वशिरस्कस्नानं कृत्वाचम्य मंगलं कृत्वा वर्णक्रमेण
जलादि स्पृष्ट्वा विधस्नानादिकं कुर्यात्। अशौचे तु व्यतिक्रान्ते स्नातः प्रयतमानसः। उदङ्मुखान भोजयेत्स्व प्रासीनान सुसमाहितान मंत्रोह्याचान्तकर्त्तव्यस्तथैव कव
चनेनतु इति विष्णुधर्मोत्तरात्। यत्तु संवर्त्त वचनं दशाहात्तु परं सम्यक् विप्रोधीयीत धर्मवित्। दानं च विधिना देयमशुभात्तारकं हि तत् इत्यत्राशुभं नशौचं तस्य तत्का
लनिवृत्तत्वात् किन्त्वशौचकालोत्पन्नपंचसूनादिपापपरं अशौचकाले यत्पापमुत्पन्नं तत्क्षयाय च। अशौचे निवृत्ते यथाशक्ति किंचिद्देयमिति हारलता। पंच
सूनाश्च पंचसूना गृहस्थस्य चुल्ली पेषण्युपस्कर। कुंडनी चोदकुंभश्च वाहयन इत्यनेन मनुनोक्ताः मत्स्यपुराणे। अशौचान्ता द्वितीयेह्नि शय्यां दद्याद्विलक्षणां। कां
चनं पुरुषं तद्वत्फलवस्त्रसमन्वितं। संपूज्य द्विजदम्पत्यं नानाभरणभूषणैः। वृषोत्सर्गश्च कर्त्तव्यो देया च कपिला शुभा। अशौचान्तात्तत्प्रतियोगि निमित्तिकाशौ
चान्तात् तेनाविशेषान्तद्वाहमरणाश्रवणजन्याशौचान्तं गृहणां नानाभरणभूषणैरिति भूषणापदं क्रियापरं अतो नपौनरुक्त्यं द्विजदंपती पूजयित्वा कांचनं प्रेतप्रतिकृ
तिरूपं पुरुषं कृत्वा यालवस्त्रयुतं शय्यायामारोप्य भूषितद्विजदंपतीभ्यां शय्यां दद्यादिति हारलता कृतस्तेषामयमाशयः संभवत्वेकवाक्यत्वे वाक्यभेदो हि नेष्यते। उप+

46 स्थितं द्विजं विहाय पात्रान्तरा कल्पनागौरवमिति च । न च तद्वदित्यनेन कांचनपुरुषदानस्यापि स्वतंत्र्यमिति वाच्यं तद्वत्प्रेतवदित्यर्थात् न च तस्यानुपस्थितिरिति वाच्यं तस्य
प्राकरणिकत्वेन शीघ्रोपस्थितेः । अशौचान्तादित्यत्रापि तथा । अन्यथा नाशौचान्ते अन्यस्यापि कर्म्म स्यात् । अत एवोक्तं प्रेतप्रतिकृतिरूपमिति तेनैव द्विशिष्ट मेके कर्म्म
अश्रुतकर्म्म यो जानाति चेत् श्वः कर्त्तास्मीति निश्चित्य दाता विप्रन्निमन्त्रयेत् । निरामिषं सकृद्भुक्त्वा सर्वसुप्तजने गृहे इति वचनवत्तु स्यच्छमाहपद्मपुराणां । संपूज्य द्विजदाम्पत्ये
नानाभरणभूषणैरिति मत्स्यपुराणे तुल्यमभिधाय उपवेश्य च शय्यायां मधुपर्कं ददेदिति भविष्योत्तरे पि कार्य्यस्तु पुरुषो हैमस्तस्यां संस्थापये च्च तं पूजयित्वा प्रदातव्या
मृतशय्याय थोदिता अत एव कर्म्मभेदाय च कारद्वय मुत्तरार्द्धे ऽभिहितं । ततश्च शय्यादानकांचनपुरुषदान द्विजदम्पती पूजा वृषोत्सर्गकपिलागवीदानरूपकर्म्म ४६ शु
पंचकाभिधानमैथिलानां हेयं एवं च द्विजदम्पती पूजनं विनाप्यशौचान्ते वृषोत्सर्गाचरणं शिष्टानां संगच्छते । तथा च अहन्ये कादशे प्राप्ते यस्य चोत्सृज्यते वृषः ।
प्रेतलोकाद्विमुक्तः स स्वर्गलोकं समश्नुते । इति मैथिलवचनेकेवलवृषोत्सर्गः श्रूयते । कालविवेके प्यग्निपुराणां । एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः ।
प्रेतलोकं परित्यज्य स्वर्गलोकं स गच्छति । आद्यश्राद्धे त्रिपक्षे वा षष्ठे मासि च वत्सरे । वृषोत्सर्गश्च कर्त्तव्यो यावन्नस्यात्सपिंडता । सपिंडीकरणादूर्द्ध्वं कालोन्य
शास्त्रदेशितः ॥ त्रिपक्षश्चान्द्रः । श्राद्धे तथा दर्शनात् यथा श्राद्धप्रदीपे जातूकर्णः । ऊर्द्ध्वं त्रिपक्षाद्यत् श्राद्धं मृताहन्येव तद्भवेत् इति अत्र पूर्वं मृततिथिमादाय पक्षग
णनेति निर्णयामृतेपि मासिकानां मृततिथौ विधानात् त्रिपक्षश्राद्धमपि मासिकानां मृततिथौ विधानात् मृताहे कार्य्यं वत्सरे इत्युपादानात् विष्णुधर्म्मोत्तरीयमृताहइतिप

दं पूर्णासाम्वत्शरीयमृततिथिपरं तथा वृषोत्सर्गमाधिकृत्य विष्णुवद्वितये चैव मृताहे बान्धवस्य च मृताहस्तस्य वा यास्मिं तस्मिन्नहनि कारयेत् तस्य बान्धवपित्रादेर्वास्मिन्नहनि
तिथौ मृताहे कर्त्तव्यमित्यर्थः। अतएव वशिष्ठोक्तछंदोगपरिशिष्टेपि अथ वृषोत्सर्गविधिं व्याख्यास्यामः। कार्त्तिक्यां पौर्णमास्यां रेवत्यां आश्वयुज्यां दशाहे गते संवत
सरोऽतीते वेति। अतएव मृततिथिमादाय संवत्सरगणनादशाहवदित्यविरोधः। शय्यादानं वृषोत्सर्गश्च शातेनाशौचान्ते मलमासेप्यवश्यं कर्त्तव्यं मत्स्यपुराणे। एकादशाह
श्राद्धेन तुल्यत्वाभिधानात् इत्यपि हारलतापरिशेषखंडे हेमाद्रिरपि वृषोत्सर्गस्य एकादशाहिकस्य मलमासेन निषेधः षोडशश्राद्धवत्तस्यापि प्रेतोपकारत्वादित्याह ।
मतद्धर्म्मे भविष्ये। नैर्म्मलानां हितार्थाय जगत्कर्त्तान्तरेणां शुद्धिहेतुकं सद्यःशौचेपि तद्दिनस्य तथा विवक्षया क्रियते। तथाशौचाहः स्वतीतेषु इत्यशौचान्तात् द्वितीयेह्नि इति
स्वोभूते एकोद्दिष्टमित्यादि च संगच्छते अन्यथा तत्र तत्र तत्कर्म्म न स्यात् एवं चाघश्राद्धविधायकविष्णूक्ताशौचव्यपगमे इति सूत्रं ध्वंसानन्तत्वेपि अशौचान्तद्वितीयदिनमा
त्रपरं एतेन सद्यःशौचं तथैकाह इति दक्षवचने पौनरुक्त्यमिया सद्यःशौचं स्नानापनेयाशौचाह मात्रपरमिति व्याख्यानं हेयं एकाहपदस्य अहोरात्रपरत्वेन दिसन्ध्यावच्छिन्न
कालवाचि सद्यःशौचपदादपि भिन्नार्थत्वात्। यत्तु पिंडादिकं नास्ति तत्र सद्यःपदं तत्क्षणमात्रवाचि सद्यः सपदि तत्क्षणाइत्यमरकोषात् यथा बालस्त्वन्तर्दशाहे तु प्रेत
त्वंयदि गच्छति। सद्य एव विशुद्धिः स्यान्नाशौचं नैवसूतकमिति तस्मात् यत्र रात्रौ दिवा वा सद्यःशौचमुत्पन्नं तत्रापि परदिने वृषोत्सर्गादिकमविरुद्धं यदप्यभिहितं विहितशु
द्धिप्रथमदिनं शय्यादानादिनिमित्तं तदपि प्रमाणशून्यं दिवा वियच्च पिण्डदानादिना मध्याह्नोऽतिक्रान्तस्तत्र शय्यादानाद्येको द्दिष्टानास्तेषां कारणासामर्थ्यकानिश्चित पू

अत्रयत्पतितं तत्क्रोड पत्रे लेयं ।६

47 र्वदिने सर्वाणिवापरदिने कार्य्याणि इत्यत्रोक्त विवक्षयापिनगति अतएव अशौचान्तात् द्वितीयेह्नि इतिसर्वैरेव निवन्धृभिः पद्धतिकृद्भिर्निमित्तत्वे नाभिलापवाक्येलिखितमिति अ
शौचान्तद्वितीयेह्नीत्यस्य निमित्तत्वे किंपानमिति चेत्तस्यकालत्वेन निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोरिति कालमाधवीयधृतगार्ग्यवचनं आदायेत्यत्र आश्रि
त्येतिकल्पतरु तिथिविवेकयोः पाठः अनेनवचनेन कालो निमित्तमिति त्यक्तं अशौचान्तद्वितीयदिनस्यापि कालत्वेनस्तुतरां निमित्ततेति अतएवावश्यकत्वेनच पूर्वादिक्रि
यमानस्य नित्यनैमित्तिकत्वमाह मार्कण्डेयपुराणं । नित्यंनैमित्तिकंत्रयं पर्वश्राद्धादिपंडितैः । एवंचवैदिकक्रियानिमित्तस्यकालविशेषस्य तत्कालजीवित्वे नाधिकारि
विशेषणीभूतस्य परतोपात्त सप्तमीसानाधिकरण्येयोजदाभिः समुंक्ते इतिवत् कालस्य विशेषणात्वेन द्योधकतृतीयाप्राप्तेः किन्तुकालभावयोः सप्तमीत्यनेनतद्बाधिकापुनः ४७ शु
सप्तमी विधीयते शरदि पुष्प्यन्ति सप्तच्छदा इतिवत् अतः कर्तृविशेषणीभूतस्यापि कालस्यैवैदिकक्रियानिमित्तत्वेन निमित्तानां चसर्वेश इत्यनेनोक्तेरेव इतिपूर्वोक्तादे
स्तु गुणफलत्वेनानियतनिमित्ततया नोक्तेरेव इति । क्रियैवकालइति वादिमतेतुस्तुतरां नाधिकारणता स्वर्य्यादिक्रियायाः कर्त्तव्यकर्म्मणोऽधिकरणतानुपपत्तेः । देव
व्रतवृषोत्सर्गचूडाकरणमेखलाः । मंगल्यमभिषेकंच मलमासे विवर्जयेत् । वालेवायदिवावृद्धे शुक्रेचास्तमुपागते । मलमास इवैतानि वर्जयेद्देवदर्शनमित्यनेनज्यो
तिःपराशरीयेननिषेधः । सावकाशवृषोत्सर्गविषयः अतएववालादिशुक्रेपिमलमास इवैतानिवर्जयेदित्यादिना सावकाशवृषोत्सर्गस्यनिषेधो ननिरवकाशस्य तस्या
पि तत्रनिषिद्धत्वे सकलशिष्टाचाराविरुद्धोरन सामान्यतोनिषेधेचमलमासातिदेशोव्यर्थः स्यादिनि सचसावकाशवृषोत्सर्गः पित्रादिगतफलोद्देशेनकान्तिवशामयेनचै

(दं पूर्णसाम्वत्सरीयमृततिथि परं। तद्यथा वृषोत्सर्गमधिकृत्य विष्णुवद्वितये चैवमृताहे वाब्दस्य च। मृताहस्तस्य वा यस्मिंस्तस्मिन्नहनि कारयेत्। तस्य वाब्दस्य पित्राद्येकादशि
न्नहनि तिथौ मृताहे कर्त्तव्यमित्यर्थः। अत एव वशिष्ठोक्तं छन्दोगपरिशिष्टस्य परिप्रसुः। निर्म्मममनिलं मासं प्रेतानां च विहाय च। अतः प्रेतः क्रियाः सर्वाः कार्य्या मनि मृतु चेपि च। सम
य प्रकाशेपि ज्योतिषे। संवत्सरान्तर्गतः पापो यज्ञानां फलनाशकृत्। नैर्ऋतैर्यातुधानाद्यैः समाक्रान्तोधिमासकः। मलमासे वृषोत्सर्गनिषेधस्तु काम्यस्य न तु एकादशाहे
क्रियमाणोऽइति। पाश्चात्य निर्णयामृतेपि अत्र केचित् काम्यत्वात्र कर्त्तव्यमेव मननाशेशय्यादानादि नशौचान्तद्वितीयदिनस्यान्यत्राप्राप्ते रिदमपि निरवकाशमिति वाच्यं क्षता
दिनाहानधिकार इव प्रकरणे वस्तुक्षतेरभावात् तदेव व्रतवृषोत्सर्गचूडाकरणमेव खलाः। मंगल्यमभिषेकं च मलमासे विवर्जयेदित्यनेन शृंगग्राहिकतया वृषोत्सर्गस्य नि
षेधादित्याहुः। तच्चिन्त्यं। क्षतादिनामधिकारे तत्प्रति प्रसवाभावात् साम्वत्सरवृषोत्सर्गादि। अत्रत्वधिमासिके विवाहं यात्रां चूडां तथोपनयनादि न कुर्य्यात्। न सावकाशं म
गल्यं न तु विशेषोऽज्यामिति भीमपराक्रमवचने सावकाशस्य निषेधात् पर्य्युदासात्। निरवकाशस्य कर्त्तव्यत्वमापाति। अत्राप्यशौचान्तद्वितीयदिनैस्यान्यत्रानुपलम्भमा
नत्वेन निरवकाशत्वमिति भ्रमो दूरीकार्य्यः। अशौचान्तद्वितीयदिनत्वेनैव विधानात् वस्तुतो विस्मृत्यपावदशौचे पिंडदानानुरोधेन। अर्थात् प्रकरणात् लिंगादेरन्यो
चितादेशकालतः। शब्दार्थास्तु विभज्यान्त नरूपादेव केवलादिति न्यायात्। तत्र सद्यः परमाह्णरात्राद्धैपरं सद्यः परंपरा रीत्यादि सूत्रे समानेऽहनि सद्य इति व्युत्पत्तेः
द्वे सन्ध्ये सद्य इत्याह त्रिसन्ध्ये काहिकः स्मृत। द्वावह्नावेकरात्रिश्च पक्षिणीत्यभिधीयते इति भट्टनारायणधृतवचनात्। द्वे सन्ध्ये सद्य इत्याह त्रिसन्ध्याहेकउच्यते

दिनद्वयेकरात्रन्तु पक्षिणीत्यभिधीयते इति नव्यवच्छिमानद्यतवचनाच्च सद्यएकाहेनाशौचमिति पारिजाते सद्यएकाहेनेति स्मृतिसागरे एकमहः सद्य इति शुद्धिपंज्ञियादर्शी
नाद्येति तद्वाह्यं दिनमात्रं रात्रिमात्रं च एवं कचित्सज्योतिःपदेन व्यपदिश्यते। यथा प्रेते राजनि सज्योतिरित्यादौ ज्योतिषा सह वर्त्तते यदशौचं तत्तथा ज्योपि रपि सौरना
क्षत्रभेदाद्विविधं तेन यावदेकतरस्य तेजसो निवृत्तिस्तावत्कालव्यापकमिति अतएव दिवाभृते दिनमात्रं रात्रिभृते रात्रिमात्रमिति हारलतादयः। एवं च यस्य यस्य
तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः। स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि इत्यादि प्रागुक्तादि पुराणीयाशौचान्तदिनकृत्यं। ४८ ड

क्रोरपत्र

वफाल्गुन्यामष्टकासु च इत्यादिना विहितः देवतोद्देशेनापि। कार्त्तिक्यान्तु वृषोत्सर्गं कृत्वा नक्तं समाचरेत्। शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतमिति समयप्रदीपधृतमत्स्य
पुराणवचनात्। देवव्रतवृषोत्सर्गचूडाकरणमेखलाः। माङ्गल्यमभिषेकं च मलमासे विवर्जयेदिति। व्यासवचनाच्च। देवमुद्दिश्य व्रतरूपो वृषोत्सर्गो देवव्रतवृषोत्सर्गश्च। य
थादेवीपुराणे। देव्याः कन्यारूपपूजायां गवोत्सर्गश्च कर्त्तव्यो नीलं वा वृषमुत्सृजेत् इतिवर्द्धमानप्रभृतयः एवं च विशेषनिषेधेन शेषाभ्यनुज्ञानादपि प्रेतवृषोत्सर्गोऽस्ती
ति प्रतीयते। अनुरपि विशेषाध्यवसायकर इति न्यायात्। न चाशौचान्तद्वितीयदिनेऽपि शय्यादानादीनां मलमासे काम्यत्वान्निषेध इति वाच्यं। नैमित्तिकानि काम्यानि निप
तन्ति यथा यथा। तथा तथैव कार्य्याणि न कालस्तु विधीयत इति दक्षवचनेन। रोगे चालभ्ययोगे च सीमन्ते पुंसवेऽपि च यद्ददाति समुद्दिश्य पूर्वं वा पिनद्ध्यतीति कालमाध
वीये मरीचिना च प्रतिप्रसवात्। अलभ्ययोगे पुनरप्राप्यसंबंधनिमित्ते अशौचान्तद्वितीयदिनादौ पूर्वं च मलमासे कालमाधवीये भविष्यत्। कुर्य्यात् प्रात्याह्निकं कर्म्म प्र
यत्नेन मलिम्लुचे। नैमित्तिकन्तु कुर्वीत सावकाशं न यद्भवेत्। तथा च विशारदप्रभृतिभिः पठन्तीति कृत्वा लिखितं। अशौचान्तेऽपि कर्त्तव्यं वृषोत्सर्गादिकं स्तुतैः। मलिम्लु
चादिदोषैस्तु न ग्राह्यस्तत्र कश्चन। कालमाधवीये कालादर्शवाक्यं मलमासकर्त्तव्यतानिषेधमुपक्रम्य आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रम इति अत्र काम्ये
ति विशेषणमिति। अशौचान्तद्वितीयदिनमुपक्रम्य रामायणे। ततश्चोद्दिश्य पितरं ब्राह्मणेभ्यो धनं ददौ। महार्हाणि च रत्नानि गाश्च वाहनमेव च। यानानि दासी दासांश्च
वेश्मानि सुमहान्ति च। विष्णुपुराणे। सामान्यतः पितृगाथापि रत्नवस्त्रमहीपानसर्वभोगादिकं वसु। विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति। आद्यश्राद्धे निकर्त्तव्यता

५१ णंवराहपुराणे । आसनं चोपकल्पेत मंत्रेण विधिपूर्वकं । मंत्रस्तु अत्रासने देवराजाभ्यनुज्ञातो विश्राम्यतां द्विजवर्याऽनुग्रहात् प्रसादयेत्वासनं गृहपूतं ज्ञानाग्निपूतेन करेण विप्रे
ति तथा आवरणार्थं तच्छत्रं ब्राह्मणेभ्यः प्रदीयते । पश्चादुपानहौ दद्यात् पादस्पर्शी करे शुभे । संतप्तवालुकां भूमिं मसिकंटकितां तथा । सन्तारयति दुर्गाणि प्रेतं दद्दुपानहौ ।
तिलोपचारं कृत्वा तु विप्रस्य नियतात्मनः । नामगोत्र प्रदा कृत्य प्रेताय तदनन्तरं । शीघ्रमावाहयेद्भूमिं दर्भहस्तोऽथ भूतले । तच्छत्रं प्रेताय यत्तच्छत्रं प्रदीयते उत्तरा प्रतिपत्तिः क्रिय
ते प्रेतमित्यस्य दद्यादित्यभिसंबन्धात् । संप्रदानत्वेपि सन्तारयतीत्यभिसन्धाने कर्म्मत्वेव । अपादानं संप्रदानं तथाधिकरणं पुनः । करणं कर्म्म कर्त्ता च द्वयोर्योगे परं भवेदित्यु
क्तेः । भूमिरिति पृथिव्याः संबोधनं अत्र श्राद्धप्रयोगमध्ये तु वाचनिकत्वाद्दानक्रियातथाचनेकस्मिन कर्म्मणि तत्कर्म्मण्यन्तारयेद्यत इत्यनेनाविरोध इति तिलोपचारमि ४८ श्र
त्यनेनार्घदानमुक्तं मन्त्रस्तु इहलोकं परित्यज्य गतोसि परमां गतिं । अयं चर्चा श्राद्धे विकृत एव पठनीयः एवमाहानि ते गंधपुष्पादीनि समर्पयेत् । गंधमंत्रस्तु सर्वेः
सुगंध इति । पुष्पमंत्रस्तु श्रियादेव्या इति । धूपमंत्रस्तु वनस्पतिरस इति इदं च गंधादिसमर्पणं । प्रेताय गन्धादिदानानन्तरं ब्राह्मणे कार्य्यं । लघुहारीतः । सपिंडीकरणं
यावत् प्रेतश्राद्धानि षोडश । पक्वान्नेनैव कार्य्याणि सामिषेण द्विजातिभिः ॥ बृहस्पतिः । वस्त्रालंकारशय्याद्यं पितुर्यद्वाहनादिकं । गंधपुष्पैः समभ्यर्च्य श्राद्धभोक्ते निवे
दयेत् भोजनं चानेकविधं कारयेद्व्यंजनानि च ॥०॥ अथ दानं ॥ ०॥ देवलः ॥ अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनं । दानमित्यभिनिर्दिष्टं व्याख्यानं तस्य वक्ष्यते । अर्थानां
द्रव्याणां उदिते शास्त्रकथिते श्रद्धा देवलोक्ता । सत्कृतिश्चानसूया च सदा श्रद्धेति कीर्तिता । अत एव भगवद्गीतासु ॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्य

ध्यतेपार्थेन चतत्प्रत्यनोऽहं । हरिवंशे बलिंप्रति भगवद्वाक्यं । अश्रोत्रियं श्राद्धमधीतमव्रतं त्वदक्षिणं यज्ञमनृत्विजाहुतं । अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षडेते तव दैत्य
सत्तम इति प्रतिपादनं स्वीकरणं पात्राय त्रीकरणमिति यावत् तेन श्राद्धोक्तसम्प्रदानत्वावच्छिन्नोद्दव्यत्यागो दानं ततश्चोद्दिश्य पात्रविशेषो यदि न स्वीकरोति तदा सोपाधित्याग वि
शेषस्यानिर्वाहान्न दातुः स्वत्वं निवर्त्तते इति रत्नाकरप्रभृतयः वस्तुतस्तु प्रदानं स्वाम्यसत्वकारणमिति मनूक्तेर्दानमात्रात् संप्रदानस्य तद्विषयस्वानाभावदशायामपि स्वत्वमु
त्पद्यते । पितुः स्वत्वोपरमे न तद्धने गर्भस्थस्येव तेन सम्प्रदानस्वत्वापादकोद्दव्यत्यागो दानं । तथा च दत्तस्य प्रतिग्रहो न तु प्रतिग्रहघटितं दानमिति व्यक्तमिति कात्यायनः । पित्रा
प्रत्तमादाय गृहीत्वा निःक्रामति इति आदाय प्रतिरक्ष्यत तो हस्तं गृहीत्वा वक्ष्यमाणमंत्रेण निःक्रामतीत्यर्थः । दत्तान्ते स्वस्ति वाचयेदिति वक्ष्यमाणवचनाच्च । अत एव मरीचिः ।
बहुगोषु यथा नष्टां मातरं लभते सुतः । मनसा पात्रमुद्दिश्य यद्दत्तं तद्धितस्योपतिष्ठते । न चैतत्तर्पणमात्रपरं । बहुगोष्विति दृष्टान्ताभिधानेन यस्य यदिति सामान्याभिधानेन च हा । ४
लाकाधिकरणन्यायात् सामान्यपरं तेन श्राद्धादावपि तथा एकत्र निर्णीतः शास्त्रार्थ इति न्यायाच्च । अत एव दत्तस्योद्दिश्य पात्राभावे इतरधनवत् तद्धनस्वामिकुले तत्प्रतिप
त्तिमाह हेमाद्रिधृतो धौम्यः । परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् । गोत्रजेभ्यस्ततो दद्यात्तदभावेऽस्य बन्धुषु । दानकल्पतरौ नारदः । ब्राह्मणस्य च यद्देयं सान्वयस्य न
चास्ति सः । सकुल्ये तस्य निलयेत् तदभावेऽस्य बंधुषु । यदा तु न सकुल्यः स्यान्न च संबन्धिबान्धवाः । दद्यात्सजातिशिष्येभ्यस्तदभावेऽप्सु निःक्षिपेत् । विद्यते सागरस्यान्तो दा
नस्यान्तो न विद्यते इति नारदोक्तदिनानन्तरमेव स्वीकारात् पूर्वं दक्षिणा क्रियते । यत्तु पात्रविशेषानुद्देश्यकदानं तत्र दातुः प्रतिपत्त्युपदेशात् तदधीनसंप्रदानविशेषनिरू

50 वितस्य त्वं त्यागादेव जायते तत्र प्रतिपादनमाह मत्स्यपुराणे । नचिरं धारयेद्गेहे हेमसंप्रोक्षितं बुधः । तिष्ठद्भयावहं यस्माच्छोकव्याधिकरं नृणां । शीघ्रं परस्वीकरणात् श्रेयः प्राप्नोति
पुष्कलं । संप्रोक्षितं पात्रमुद्दिश्य त्यक्तमिति हेमाद्रिः ॥ अत एव विष्णुपुराणे ॥ तस्मात्सर्वात्मना पात्रे दद्यात्कनकमुत्तमं । अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे । प्रमादतस्तु तत्र
दत्तं तावन्मात्रं नियोजयेत् । अन्यथा स्तेयमुक्तं स्याद्धेम्नि दत्ते विनाशिनि । तद्धेम ब्राह्मणायोत्सृष्टं ब्राह्मणसाद्भवतं । यदि चौरादिना अपह्रियते तदा तावद्देव पुनरुत्सृज्य दे
यमिति दानसागरः ॥ एवं च दाने संप्रदानस्य कारकत्वोद्देश्यत्वात् नत्वनुमतिद्वारा मनोभावात् मनसा पात्रमुद्दिश्य इत्यत्र व्यभिचाराच्च । द्रव्यमर्जयेत् ब्राह्मणः प्रतिगृह्णीयात् पू. २३
याजयेदध्यापयेदिति श्रुतौ याजनाध्यापनसाहचर्यात् प्रतिग्रहस्य स्वत्वमर्जन पतोपि अर्जनरूपता नविरुद्धा । याजनादावपि दक्षिणादानादेव स्वत्वादिति दायभागः ॥
ननु प्रतिग्रहात् स्वत्वं प्रागुक्तमनुधौम्य नारदीयविरोधात् । संप्रदानस्वीकारात् पूर्वं त्यक्तद्रव्यस्यान्येन ग्रहणे ब्रह्मस्वापहारापत्तेश्च । एवं च त्यागान्निवृत्तमपि दातुः स्वयं सं
प्रदानाग्रहणादसम्यक्त्वेन तस्याहृदानत्वश्रुतेः । दातुः पुनः स्वत्वमुत्पद्यते । तथा च नारदः । दत्वा द्रव्यमसम्यग्यः पुनरादातुमिच्छति । दत्ताप्रदानिकं नाम व्यवहारपदं हि
यत् । असम्यक्त्वं च दानस्य अदेयद्रव्यदानाद्वा अन्यथा दानाद्वा संप्रदानभ्रान्त्यादिना वा पित्राद्यसमात्यादिना वा दातुरेवाशुद्ध्याद्यवस्थाभेदादिति वाचस्पतिमिश्राः ।
तथा च देवलः । दाता प्रतिगृहीता च श्रद्धा देयं च धर्मयुक् । देशकालौ च दानानामङ्गान्येतानि षड्विदुः । धर्मयुक्न्यायार्जितं देयं द्रव्यं तथा च विष्णुधर्मोत्तरे । देशे काले
तथा पात्रे धनं न्यायागतं तथा । यद्दत्तं ब्राह्मणश्रेष्ठास्तदनन्तप्रकीर्त्तितं । प्रतिग्रहाभावे गृहीतृरूपाङ्गाभावादसम्यक्त्वं । दत्तस्याप्रदानं पुनर्हरणं यस्मिन्व्यवहारपदे तत्तथा इ

तिविज्ञानेश्वरः। अत एव पत्राद्यर्थं याचकाय धनं दत्त्वा न पितेन तद्ददातिकरणे पुनस्तस्माद्ग्राह्यमाह मनुः। धर्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनं। पश्चाच्च न तथा तत्स्यान्न देयं
तेन तद्भवेत्। अत्र दत्तस्य गृहीतस्य भुक्तस्यापि पुनरादानश्रुतेः। सुतरां पात्रस्योपेक्षायां तथेति। उपेक्षयाप्यत्व हानिमाह बृहस्पतिः। प्राप्तमात्रं येन भुक्तं स्वीकृत्यापरिपन्थितं
तस्य तत्सिद्धिमाप्नोति हानिं चोपेक्षया तथा। अत एव प्रतिगृहीतुस्त्यागात् फलं वक्ष्यते। प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहं। ये लोका दानशीलानां स तानाप्नोति पुष्क
लानिति याज्ञवल्क्यः॥ अन्यत्र हारीतः। प्रतिश्रुताप्रदानेन दत्तस्योच्छेदनेन च। विविधान्नरकान् याति तिर्यग्योनौ च जायते। वाचा यच्च प्रतिज्ञातं कर्मणा नोपपादितं। तद्धनमृ
णं संयुक्तं इह लोके परत्र च। दत्तस्योच्छेदनं स्वयं दत्तस्य द्रव्यस्य प्रतिगृहीतुर्दानविक्रयादिकं विना बलात् स्वीकरणं न तु तद्धिक्रीतागृहणं तथा चाश्वमेधिके पर्वणि व्या
सवाक्यं। दत्त्वैषा भवता मह्यं तां भूमिं प्रददाम्यहं। हिरण्यं दीपतां मेघ आसीत्पूर्वं न्तु ते यतः॥ कात्यायनः॥ स्वस्थेनार्त्तेन वा दत्तं श्रावितं धर्मकारणात्। अदत्त्वा तु मृते
दाप्यस्तत्सुतो नात्र संशयः। आर्त्तेन जन्मप्रभृति महारोगीतरेण रोगिणेत्यर्थः। महारोगिणां दाने। एषां मध्य तु यः कुष्ठी गर्हितः सर्वकर्मस्वितिति। प्रागुक्तभविष्यपुराणो
न निषधात् एवं च मुमुर्षुदत्तस्य यद्दानोपसर्गत्वाभिधानं तद्धर्मार्थेतरदानपरं। स्मृतिः। स्नात्वा शुद्धे समे देशे गोमयेनोपलिप्यते। वसित्वा वसनं शुद्धं दानं दद्यात्सद
क्षिणां। श्राद्धवदत्रापि देशाभिधानात्। यज्ञो दानं तपो जप्यं श्राद्धं नु सुरपूजनं। गंगायां च कृतं सर्वं कोटिकोटिगुणं भवेत्। इति स्कान्दे गंगायामिति गंगातीरपरमिति
गंगावाक्यावली। पाद्मे। शिवस्य विष्णोरग्नेश्च सन्निधौ दत्तमक्षयं। लिंगपुराणे॥ शालग्रामशिला यत्र तत्तीर्थं योजनद्वयं। तत्र दानं च होमश्च कोटिकोटिगुणो भवेद्

51 ति। यच्चभूर्लोके भूर्लोकमाह विष्णुपुराणं। पादगम्यं च यत् किंचित् वस्त्वास्ति पृथिवीमयं। स भूर्लोकः समाख्यातो विस्तारस्य मयोदितः। पृथिवीमयं पार्थिवं। ततश्च शालग्रा
मस्य पाञ्चाधवस्थानेपि तीर्थत्वं अतः केवलभूमौ शालग्रामावस्थानं तीर्थाय मैथिलानां दुराचरणमेव। शंखलिखितौ। आहारं मैथुनं निद्रां सन्ध्याकाले विवर्जयेत्। कर्म्म
चाध्ययनं चैव तथा दानप्रतिग्रहौ। स्मृतिः गत्वा यद्दीयते दानं तदनन्तफलं स्मृतं। सहस्रगुणमाहूय याचिते तु तदर्द्धकं॥ विष्णुधर्म्मोत्तरे॥ सीदते द्विजमुख्याय योऽर्थि
नेन प्रयच्छति। सामर्थ्ये सति दुर्बुद्धि नरकायोपपद्यते। यमः॥ आशां दत्वा ह्यदातारं दानकाले निषेधकं। दत्वा संतप्यते यस्तु तमाहुर्ब्रह्मघातकं॥ मात्स्ये। अनित्यं जी
वितं यस्माद्वस्तु चातीव चंचलं। केशेष्विव गृहीतस्तु मृत्युना धर्म्ममाचरेत्॥ भारते॥ एकां गां दशगुर्द्द्यात् दश दद्याच्च गोशती। शतं सहस्रगुर्द्द्यात् सहस्रं बहुगोधनः। ५१ श्रु
व्यासः। ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते। इच्छानुरूपविभवः कदा कस्य भविष्यति। तथा भुक्त्वा दानं न शस्यते। अत एवादि पुराणं। घासमुष्टिं परगवे स्वान्नं दद्या
च्च यः सदा। अकृत्वा स्वयमाहारं स्वर्गलोकं स गच्छति॥ देवलः। अपापरोपी धर्म्मात्मा दितस्तुरव्यसनः शुचिः। अनिंद्यजीवकर्म्मा च षड्भिर्दाता प्रशस्यते। अनिंद्यजीव-
कर्म्मा अगर्हितजीवनोपायः। अपराबाधमक्लेशं प्रयत्नेनार्जितं धनं। स्वल्पं वा विपुलं वापि देयमित्यभिधीयते। अपराबाधं परपीडारहितं। अक्लेशं पात्रक्लेशाज
नकं। तथा यद्यत्र दुर्ल्लभं द्रव्यं यस्मिन् काले पि वा पुनः। दानार्हौ देशकालौ तौ स्यातां श्रेष्ठौ न चान्यथा॥ देवलः। इष्टं दत्तं मधीतं वा विनश्यत्यनुकीर्त्तनात्। श्लाघानुशो
चनाभ्यां च भग्नतेजो विभिद्यते। तस्मादात्मकृतं पुण्यं वृथा न परिकीर्त्तयेत्। इष्टं यजनं अनुकीर्त्तनं कथनं श्लाघा प्रशंसा अनुशोचनं धनव्ययेन पश्चात्तापः भग्नतेजः

फलजननशक्तिहीनं दृष्टारक्षादिप्रयोजनं विना॥देवलः॥पात्रेभ्यो दीयते नित्यमनपेक्ष्य प्रयोजनं। केवलं धर्म्मबुद्ध्या यद्धर्म्मदानं प्रचक्ष्यते। प्रयोजनमिह लौकिकमभि
प्रेतं।याज्ञवल्क्य।न विद्यया केवलया तपसा वापि पात्रता।यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्ष्यते।वृत्तमाचारः।विवादकल्पचिन्तामणौ वशिष्ठः।शुक्रशोणितसंभवः पु
रुषो मातापितृनिमित्तकः।तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः।नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषामिति।कात्यायन।विक्रयं चैव दा
नं च न नेयाः स्युरनिच्छवः।दाराः पुत्राश्च सर्वस्वमात्मनेन तु योजयेत्। आपत्काले तु कर्त्तव्यं दानं विक्रय एव च। अन्यथा न प्रवर्त्तेत इति शास्त्रार्थनिश्चय।एवं भरणा
सामर्थ्ये स्वपरित्यागः मनुः।सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च।दायोऽन्वयागतं लाभो निध्यादेः जयः संग्रामे प्रयोगः।
कुशीदं कर्म्मयोगः कृषिवाणिज्य पुत्रकन्यादिः॥विष्णुधर्म्मोत्तरे।पतन्तं त्रायते यस्मात् पात्रं तेन प्रचक्ष्यते।महाभारते॥पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे।अत्र
साक्षात्तद्दत्त तंडुलाद्यनुपयोगीति दानसागरः शूद्रस्वत्वाश्रयान्नाभोजीति रत्नाकरः।वस्तुतस्तु मुमुक्षुप्रकरणाभिहितशूद्रान्नानुपयोगीत्यर्थः।याज्ञवल्क्यः॥दा
तव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः निमित्तेषु गंगातीरादिसंक्रान्त्यादिषु बृहन्मनुः।सहस्रगुणितं दानं भवेद्दत्तं युगादिषु। कर्म्मश्राद्धादिकं चैव तथा मन्वन्तरादिषु
बृहस्पतिः।कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते।मध्वास्वादो विषं पश्चाद्दातुर्धर्म्मोऽन्यथा भवेत्। कीर्त्तिनरकाभ्यामिति शेषः। तस्यापवादमाह स एव कुटुंबं पीड-
यित्वापि ब्राह्मणाय महात्मने।दातव्यं भिक्षवे चान्नमात्मनो गतिमिच्छता अत एव भविष्ये।अल्पे महति वा तुल्यफलमाढ्यदरिद्रयोः।विष्णुधर्म्मोत्तरे यस्योपयोगि यद्द्रव्यं

52 देयं तस्यैव तद्भवेत्। हारीतः। तामसेन तु द्रव्येण आर्त्विग्भिस्तामसैस्तथा। तामसं भावमास्थाय तामसो यज्ञ उच्यते। तामसेन तु यज्ञेन दानेन तपसाथवा। निरये जन्म च द्-
दुर्दृष्टिं विधाश्च तामसीं ॥ तामसी दृष्टिर्न्नैश्वाधिपत्यरूपा इति रत्नाकरः। राजसेन तु द्रव्येण आर्त्विग्भी राजसैस्तथा। राजसं भावमास्थाय राजसो यज्ञ उच्यते। राजसेन तु यज्ञेन
दानेन तपसाथवा। निरयस्वर्गयाजीन्म क्रूरराज्यं श्रियायुतं। सात्विकेन तु द्रव्येण आर्त्विग्भिः सात्विकैस्तथा। सात्विकं भावमास्थाय सात्विको यज्ञ उच्यते। सात्विकेन तु
यज्ञेन दानेन तपसाथवा। देवलोके ध्रुवं वासो देवसायुज्यमेव च॥ मत्स्यपुराणाच्च॥ येषां पूर्वकृतं कर्म्म सात्विकं मनुजोत्तम। पौरुषेण विना तेषां केषांचित् दृश्यते फलं
कर्म्मणा प्राप्यते लोके राजसस्य यथाफलं। कृच्छ्रेण कर्म्मणा वृद्धिं तामसस्य यथाफलं। द्रव्याणामपि तद्भेदमाह नारदः॥ पार्श्विकद्यूतचौर्य्यार्ति प्रतिरूपकसाहसैः। ५२ श्रु
व्याजेनोपार्जितं यत्तत्तत् कृष्णं समुदाहृतं। पार्श्विकः पाचनयायोऽर्जयति इति। प्रायश्चित्तविवेकः। आर्त्तापरपीडया प्रतिरूपकेण कृत्रिमरत्नादिना साहसेन समुद्रया
नगीर्य्या रोहणादिना व्याजेन ब्राह्मणादिवेषेण शूद्रादिना कृष्णं तामसमिति रत्नाकरः। कुशीदकृषिवाणिज्यशुल्कशालानुवृत्तिभिः। कृतोपकारादाप्तं च राजसं समु-
दाहृतं। अनुवृत्त्या सेवया। श्रुतशौर्य्यतपःकन्याशिष्यसाज्यान्वयागतं। धनं सप्तविधं शुक्लं मुनिभिः समुदाहृतं। श्रुतेनाध्यायनेन शौर्य्येण जयादिना तपसा जपहो-
मार्चनादिना कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धं शिष्यागतं गुरुदक्षिणादिना याज्यागतं आर्त्विज्यलब्धं अन्वयागतं दायलब्धं शुक्लं सात्विकं। अत्र स्वत्व
हेतुभूतव्यापाररूपार्जनगणने चौर्य्यस्यापि निर्देशात्। चौर्य्योपात्तद्रव्येपि यथेष्टविनियोज्यत्वेन शास्त्रगम्यत्वरूपं स्वत्वमस्तीति प्रतीयते भवदेवभट्टसम्मतोप्ययं पक्षः।

यत्तद्द्रव्यमस्वामिविक्रीतं पूर्वं स्वामी समाप्नुयात्। इति याज्ञवल्क्यीये चौरविक्रीतस्यास्वामिविक्रीतत्वमुक्तं तत्रास्वामिपदं अप्रशस्तस्वामिपरं अप्राशस्त्यं विरोधश्चानर्थोः व
दप्रकीर्त्तिताः इति प्रागुक्तत्वान्नतु स्वामित्वाभावपरं। प्रागुक्तपार्श्विकद्यूतचौर्यार्त्तित्यादिनारदवचनविरोधात्। ब्राह्मणास्वं न हर्त्तव्यं क्षत्रियेण कदाचन। दस्युनिःक्रिययो
स्तु स्वमजीवन् हर्त्तुमर्हतीत्यनेन चौरस्वत्वाभिधानाच्च। अत एव याज्ञवल्क्य। बुभुक्षितं त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्। मनुरपि तथैव सप्तमे भक्ते भक्तानि षडनश्नता
अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः। इत्येताभ्यां त्र्यहोपवासानन्तरं धान्यचौर्य्येण जीवनाभिधानात् तदन्नस्य बलिवैश्वदेवाहताप्रतीयते इति व्यक्तं हरिवंशीयसप्त
व्याधोपाख्याने ते नियोगाद्गुरोस्तस्य गां दोग्ध्रीं समकालयन्। क्रूरा बुद्धिः समभवत् तां गां वै हिंसितुं तदा पितृभ्यः कल्पयित्वैनामुपायुञ्जत भारत। स्मृतिप्रत्यवमर्षश्च तेषां
जात्यन्तरे भवत्। अत्र गुरोर्गां हत्वाश्राद्धेन चौर्य्येणापि जातित्वदर्शनात् चौर्य्येण स्वत्वं प्रतीयते इति एतदत्यन्ताशक्तानां शक्तानां तु मत्स्यपुराणं। गामग्निं ब्राह्मणं शास्त्रं
काञ्चनं सलिलं स्त्रियं। मातरं पितरं चैव ये निंदन्ति नराधमाः नतेषामूर्ध्वगमनमेवमाह प्रजापतिः। परस्वं हरते यस्तु पश्चाद्दानं प्रयच्छति। स गच्छति वै स्वर्गं दातारो यत्र भा
गिनः। एतत्तु सात्विकराजसिकरूपदानफलाभावपरं॥ अन्यथा। प्रागुक्तहारीतादिवचनविरोधात्। शातातपपराशरौ। सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत्।
भोजने चैव दाने च दहत्यासप्तमं कुलं। वशिष्ठव्यासपराशराः। यस्य चापि गृहे मूर्खो दूरे चापि बहुश्रुतः। बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः॥ शातातपः। मंत्रपूर्वं
तु यद्दानं अपात्राय प्रदीयते। दातुर्निहत्य हस्तं तु भोक्तुर्जिह्वां निहन्तति। न दद्यस्वेति यो ब्रूयाद्गवाग्नौ ब्राह्मणेषु च। तिर्यग्योनिं शतं गत्वा चांडालेष्वभिजायते। वशिष्ठः। परि

53 भुक्तमविज्ञातमपर्य्याप्तमसंस्कृतं। यः प्रयच्छति विप्रेभ्यस्तद्भस्मन्यवतिष्ठते। अपर्य्याप्तं स्वकार्य्याक्षमं। यमः। सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति। न स तत्फलमाप्नोति
तच्चैव परिवर्त्तते। तच्चैव दृष्टफलमेव परिवर्त्तते न स्वर्गादिफलमाप्नोतीत्यर्थः॥ महाभारते॥ प ङ्ग्वन्धबधिरा मूका व्याधिनोपहताश्च ये। भर्त्तव्यास्ते महाराज न तु देयः प्रति-
ग्रहः। व्याधिना यक्ष्मादिना। व्यासः। मातापितृषु यद्दत्तं भ्रातृश्वसृसुतादिषु। आत्मजेषु च यद्दत्तं सर्वं भवति पुष्कलं। तथा पितुः शतगुणं दानं सहस्रं मातुरेव च। अनन्तं दु
हितृदानं सोदर्य्ये दत्तमक्षयं। विशेषयति नारदः। साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च। विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परं। अविभक्तदशायामपि विद्याद्युपा
र्जितासाधारणं यद्दत्तं तदुक्तफलकं। योऽसद्भ्यः प्रतिगृह्यापि पुनः सद्भ्यः प्रयच्छति। आत्मानं संक्रमं कृत्वा परांस्तारयते हि सः। धनस्वामिनमात्मानं सन्तारयति दुस्तरं। ५३ ध
इति शेषार्द्धं स्कान्दे विशेषः। गौतमः। अन्तर्यानु कृत्वा सकुशं तु तिलोदकं। फलं समभिसंधाय प्रदद्यात् श्रद्धयान्वितः। उदकस्तुतिमभिधाय हारीतः। तस्माद्भिरवो
क्ष्य दद्यादालभ्य चेति। अवोक्ष्य प्रोक्ष्य इति रत्नाकरादयः एतद्यद्यपि उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतं। न्यंचता अभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतं इति वर्द्धमान
धृतेन विरुद्धं अत एव कुसुमांजलौ। प्रोक्षणाभ्युक्षणादिभिरिति भेदेनोक्तं। तथापि यस्य यद्दीयते वस्त्रमलंकारादिकं च न। तेषां दैवतमुच्चार्य्य कृत्वा प्रोक्षणपूजने।
उत्सृज्य मूलमंत्रेण प्रतिनाम्ना तदर्पयेत्। इति कालिकापुराणानुव्याख्याने शास्त्राविरोधः। वस्तुतस्तूभयदर्शनात् वैकल्पिकं। आलभ्य सोदकपाणिना स्पृष्ट्वा। संप्रदा
नार्चनमाह बृहन्मनुः। योर्चितः प्रतिगृह्णाति दद्यादर्चितमेव वा। तावुभौ गच्छतः स्वर्गं नरकं तु विपर्य्यये। अत एव देवब्राह्मणौ संपूज्य दद्यादिति मैथिलै रत्नमिति ब्राह्म

शाकेरे जलदानपूर्वकं दानमाहापस्तम्बः। सर्वाण्युदकपूर्वाणि दानानि यथाश्रुति वीहारे इति वीहारे यज्ञे। अन्नाहार्य्यदानादौ यथाश्रुति यावदेव श्रूयते तावदेव कुर्य्यात्। नो
दकपूर्वादि नियमः इति कल्पतरुरत्नाकरौ। अन्नाहार्य्य ममावस्याश्राद्धं एवं चापस्तम्बसूत्रैकवाक्यत्वात् यथाश्रुति वीहारे इति जैमिनिसूत्रे पि श्रुतिः। शाब्दीप्रतिपत्तिते
नोत्पत्तिवाक्ये यो ऽर्थः श्रुतः स एव विनियोगवाक्ये ग्राह्य इति सूत्रार्थः। ननु श्रुतिरवश्यैर्वाक्यवचनात्कार्य्या इति मूलभूतश्रुत्यन्तरकल्पनापत्ते। अदृष्टार्थकतापत्तेश्च।
ततश्च संकल्पवाक्ये संकल्पविषयीभूतार्थस्याभिलप्यमानत्वादभिलापेच तथात्वकशब्दानां सामर्थ्यात् श्रुतशब्दनियमो नास्ति अन्यथा विश्वजिता यजेत इत्यादौ स्वर्ग
काम इत्याद्यभिलापो न स्यात् अश्रुतत्वात्। तथा कपिलाकोटिदानात् तु गंगास्नानं विशिष्यते इति ब्रह्माण्डपुराणात् कपिलाकोटिदानजन्यफलाधिकफलप्राप्तिकाम इति
शिष्टाभिमताभिलापो न स्यात् अत एव ग्रहादीनां नानामुनिभिर्नानानामान्युक्तानि तेषां यत्किंचिन्नाम्नैवोल्लेखः। तथा च मत्स्यपुराणे। सूर्य्यः सोमस्तथा भौमबुधजीवाशि
तार्कजाः। राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः। याज्ञवल्क्यः। सूर्य्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः। यत्र त्वेकदे
वस्य पूजादौ विशेषनानानामोपादानं तत्र तत एव तान्येव नामानि अभिलाप्यानि न नामान्तराणि। एवं यत्र बहुभिर्मुनिभिर्यन्नामाभिधीयते तत्र तदेव वक्तव्यं तथाभि
धाने न श्रुतेस्तत्रैव तात्पर्य्यप्रतीतेः। एवं च विधिशब्दस्य मंत्रत्वेभावः स्यादिति न्याये पि विधिशब्दस्य विधिवाक्यस्य देवताप्रतिपादकमात्रस्य मंत्रत्वसंपादकत्वं बोध्यं।
व्यक्तं याज्ञवल्क्ये॥ मित्रो धाता भगस्त्वष्टा पूषार्य्यमांशुरेव च। पर्य्यायनामभिश्चैव एक एव निगद्यते। तथा वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः। वाचके पि च विज्ञाते

54 वाच्यस्य वप्रसीदति । अतस्य वमनुः । वाग्दैवत्यैश्च चरुभिर्यजेवेत्तोसरस्वतीं । अन्तस्त्येनमस्तस्य कुर्वीरणानिष्कृतिं परां । अत्र वाग्दैवत्येति सरस्वतीति श्रुतेः । वाक्सरस्वत्यो
रेकार्थत्वात् वाग्दैवत्य चरुणा सरस्वती यजनं संगच्छते । अन्यथा नाम भेदाद्देवता भेदविरुद्धं स्यात् तेऽसत्य वचनेन संभाव्यमानश्च शूद्र विट्क्षत्र विप्रवध विषयान्तवादिसाक्षिणः
स्मृतिः । नामगोत्रेसमुच्चार्य प्रांमुखोदेवकीर्त्तनात् । उदंमुखाय विप्राय दत्वा नेत्स्वस्तिवाचयेत् । देवकीर्त्तनादितिन्यपल्लोपे पंचमी देवकीर्त्तनं कृत्वेत्यर्थः । ततश्च दाता अमुकदैव
तं विष्णुदैवतं वा वक्तव्यं । विष्णुधर्म्मोत्तरे । अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता । कन्यादासस्तथादासी प्राजापत्याः प्रकीर्त्तिताः । प्राजापत्यो गजः प्रोक्तस्तुरगो यमदैवतः । तथाचै
कसफं सर्वं कथितं यमदैवतं । महिषश्च तथा योम्य उष्ट्रो वै नैर्ऋतोभवेत् । रौद्री धेनुर्विनिर्द्दिष्टा छाग आग्नेय उच्यते । मेषस्तु वारुणो विद्याद्धरोहो वैष्णवः स्मृतः । आरुण्याः पशवः स
र्वे कथिता वायुदेवताः । जलाशयानि सर्वाणि वारिधानी कमण्डलुः । कुंभं च करकाश्चैव वारुणानि विनिर्दिशेत् । समुद्रजानि रत्नानि साधुद्राणि तथैव च । आग्नेयं कनकं प्रोक्तं सर्व
लौहानि वाप्यथ । प्राजापत्यानि सस्यानि पक्वान्नमपि च द्विजाः । ज्ञेयानि सर्वगन्धानि गन्धर्वाणि विचक्षणैः । बार्हस्पत्यं स्मृतं वासः सौम्यानि रजतानि च । पक्षिणश्च तथा सर्वे वायव्याः
परिकीर्त्तिताः विद्या ब्राह्मी विनिर्द्दिष्टा विद्योपकरणानि च । सारस्वतानि ज्ञेयानि पुस्तकाद्यानि पंडितैः । सर्वेषां शिल्पभांडानां विश्वकर्म्मा तु दैवतं । द्रुमाणामथ पुष्पाणां शाकानां हरि
तैः सह । फलानामपि सर्वेषां तथा ज्ञेयो वनस्पतिः । मत्स्यमांसे विनिर्द्दिष्टे प्राजापत्यं तथैव च । छत्रं कृष्णाजिनं शय्या रथमासनमेव च । उपानहौ तथा यानं तथा यत् प्राणवर्जितं । उत्ता
नांगिरसं त्वेतत् प्रतिगृह्णीत मानवः । पर्जन्यं च तथा छीबं सर्वधर्म्मध्वजादिकं । व्रतोपकरणं सर्वं कथितं सर्वदैवतं । गृहं तु सर्वदैवत्यं यदनुक्तं द्विजोत्तमाः । तज्ज्ञेयं सर्वदैवत्यं स ५४ श्रु

वैं वा विष्णुदैवतं । दैवकीर्त्तनादिति । अत्र दैवकीर्त्तनादिति षष्ठ्यन्तं भ्रान्तेः पाठो व्याख्यातश्च । हेमाद्रिणा देयकीर्त्तनोत्तरकालं दत्वा इत्यर्थः विष्णुधर्म्मोत्तरेऽपि । इदमस्य नाम गृह्णीया
द्ददानीति ततो वदेत् । तोयं दद्यात्तथा दाता दाने विधिरयं स्मृतः । व्यासः । नामगोत्रसमुच्चार्य्य प्रदद्याच्छ्रद्धयान्वितः । परितुष्टेन भावेन तुभ्यं संप्रददे इति ॥ सम्प्रदानवाक्ये अहप
दप्रयोगमाह कात्यायनः । अहमस्मै ददानीति एवमाभाष्य दीयते एवं च संप्रददे ददानी त्येतयोर्विकल्पः स च व्यवस्थितः । आत्मगामिफले संप्रददे परगामिफले ददानीति उ
भयपदीत्वाद्दाधातोः फलवति कर्त्तर्य्यात्मनेपदं अफलवति कर्त्तरि परस्मैपदमिति । पाणिनिसम्मतेः । आत्मनेपदपरस्मैपदयोरात्मनेपरस्मैइत्येताभ्यां समाख्यासंगच्छते ।
ददानीत्यस्य ददे वत् इति वर्त्तमानार्थतेति । अत एव सहृद्दाह ददानीति मनुनाप्युक्तं संगच्छते अनुमतिग्रहणप्रार्थनाद्यर्थं तु सहत्त्वाभिधानस्य प्रयोजकमिति श्राद्धादौ फलभा
गिनां गोत्राद्युल्लेख दर्शनात्तदितरत्रापि तथोल्लेख आचारः । हारीतः । अथाहस्स द्रव्यदानमस्वर्ग्यं यच्च दत्वा प्रतप्यते । तच्चैव दानमफलं यच्चोपकारिणो ददाति । तन्मात्रं परिक्लि
ष्टं यच्च सोपधं ददाति । अन्यथाश्रावितमल्पफलं । यच्चापात्राय ददाति अनिष्टदानं भवति यच्च दत्वा परिकीर्त्त्यते स्वयं दानमासुरं यच्चाश्रद्धया ददाति क्रोधाद्राक्षसं यच्चा
क्रुश्य ददाति । दत्वा वा क्रोशति असत्कृतं पैशाचं । यच्चावज्ञातं ददाति दत्वा वावजानाति मुमूर्षुस्तामसं यच्चाप्रहृतो ददाति एते दानोपसर्गाः । यैरुपसृष्टं दानमप्रसिद्धं अस्वर्ग्य
मयशस्यमध्रुवफलं वेति । भवत्यल्पफलं वेति । तर्हि त्यागानन्तरकाले हस्तार्पणां संभवेऽप्यदानमसमर्पणां । उपकारिणो व्यसनोपकारिणो तदितरोपकारिणो तु दक्षः । मातापि
त्रोर्गुरौ मित्रे विनीते चोपकारिणो । दीननाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत् । तन्मात्रं यथोक्तोपकारणारहितं सोपसद्भग । अन्यथाश्रावितं लोकसंभावनार्थं प्रकाशितं । अनिष्टदा

55 नष्टमेवेदानं। स्यायोमानभेदः अप्रकृतोभयादिमान। तथाचनारदः। अदत्तन्तुभयक्रोधकामशोकरुगन्वितैः। वालमूढास्वतंत्रार्तमत्तोन्मत्तापवर्जितैः। कर्त्तामभेदं कर्म्मेतिपति
नाभेच्छयाचयत्। प्रतिलाभेच्छयासोपाधिदत्तमुपाध्यसिद्धाविति विवादचिन्तामणिः। एतत्परमेव हारीतेनसोपरमित्युक्तमिति ब्रह्माण्डपुराणे। शुचिःपवित्रपाणिश्च गृह्णीयादुत्तरा
मुखः। अभीष्टदेवतांध्यायन मनसाविजितेन्द्रियः। कृतोत्तरीयकोनित्यमन्त्रपानुकरस्तथा। दातारिष्टमभिध्यायन प्रतिगृह्णात्यलोलुपः। पवित्रमाह कात्यायनः। अनन्तर्गर्भिनं
साग्रंकौशंद्विदलमेवच। प्रादेशमात्रंविज्ञेयं पवित्रंयत्रकुत्रचित्। अनन्तर्गर्भिणं अन्तर्गर्भस्यभेदरूपोभावोऽनन्तर्गर्भं तद्यस्यास्तीतितत्तथाइति अन्तर्गर्भभिन्नमित्यर्थः। तथा
चशौनकः। अनन्तस्तरुणौयौतुकुशौप्रादेशसम्मितौ। अनखच्छेदिनौसाग्रौतौपवित्राभिधायकौ। प्रचेताः। दक्षिणहस्तमध्ये ब्राह्मणस्याग्नेयंतीर्थं। आग्नेयेनप्रतिगृह्णीयात्। आ ५५ ३
दित्यपुराणे। ॐकारमुच्चरन् प्राज्ञो द्रविणंशक्तमोदनं। गृह्णीयाद्दक्षिणेहस्ते तदन्तस्वस्तिकीर्त्तयेत्। ॐकारस्यास्वीकारार्थत्वात् तेनैवाचग्रहणमुक्तंतथाच। ॐइत्यभ्युपगमेइ
तिशाब्दिकाः। स्वस्तीतिक्षेमार्थं तथाचामरः। स्वस्त्याशीःक्षेमपुण्यादाविति व्यासः। दक्षिणाभिरुपेतंहि कर्म्मसिध्यतीतिमानवे। सुवर्णमेवसर्वासुदक्षिणासुविधीयते। क
र्म्मोपदेशिन्यांजैमिनिः। सुवर्णदीयमानेतुरजतंदक्षिणोच्यते। गृह्यपरिशिष्टे। अलाभेफलमूलानांभक्ष्याणांदक्षिणां ददाति इति। अलाभेविहितदक्षिणालाभे बृहस्पतिः॥
हतमश्रोत्रियंश्राद्धं हतोयज्ञस्त्वदक्षिणः। तस्मात्पणंकाकिनींवाफलंपुष्पमथापिवा। प्रदद्याद्दक्षिणां यज्ञेतथाफलस्तमेभवेत्। नारदः। काकिनीचचतुर्भागोमाषकस्यपणस्य
च। दक्षिणाचसंप्रदानब्राह्मणायैवदेया। सन्तानिकादीनुपक्रम्य एतेभ्योपिद्विजातिभ्योदेयमन्नंसदक्षिणमिति मनुवचनात्। रोगप्रतिमादाने व्यक्तमाह शातातपः। पूर्वाभि

गुरवमाचार्य्यमभ्यर्च्यप्रतिमान्स्तुतां। प्रदद्याद्दक्षिणां तस्मैमध्याह्नेसमुपस्थिते। भूमिप्रतिग्रहविधानमाह विष्णुधर्म्मोत्तरे। भूमेः प्रतिग्रहं कुर्य्यात् भूमेः कृत्वाप्रदक्षिणां। प्रदक्षिणां न सर्व
स्याभूमेः किन्तु तत्रस्थायाः प्रदक्षिणामात्रं भूमेरसन्निधानेतामुद्दिश्य प्रदक्षिणां। करं गृह्य तथा कन्यां दासदास्यौ द्विजोत्तमाः। करन्तु हृदयेन्यस्य धर्म्मोसीयः प्रतिग्रहः। धर्म्मः धर्म्म
विवपानपेतः। आरुह्य च गजस्योक्तः कर्णौ चास्य चास्य कीर्त्तितः। तथा चैकशफानान्तु सर्वेषामविशेषतः। प्रतिगृह्णीत गाः पुच्छे पुच्छेहृष्मा जिनं तथा आरण्याः पशवः सर्वे ग्राह्याः
पुच्छे विचक्षणैः। प्रतिग्रहमथाश्वस्य आरुह्य च तथा चरेत्। वीजानां मुष्टिमादाय रत्नान्यादाय सर्वतः। वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः। आरुह्योपानहौ चैव यानमा
रुह्य पादुके। छत्रायां चरथं गृह्य छत्रं दंडे च धारयेत्। द्रुमानामथ सर्वेषां मूले न्यस्तकरो द्विजः। आयुधानि समादाय तथा भूष्य विभूषणां। वर्म्म ध्वजौ तथा स्पृष्ट्वा प्रविश्य च त
था गृहं। अवतीर्य्य च सर्वाणि जलस्थानानि वै द्विजाः। द्रव्याण्यन्यान्यथादाय स्पृष्ट्वा वा ब्राह्मणः पठेत्। प्रतिगृहीता सावित्रीं सर्वत्रैव प्रकीर्त्तयेत्। ततस्तु साङ्गं द्रव्याणां तस्य द्र
व्यस्य दैवतं। भूमिर्विष्णुदेवताकेत्यादि कीर्त्तयेदित्यर्थः। समापयेत्ततः पश्चात् कामस्तुत्या प्रतिग्रहं। विधिं धर्म्म्यमथोक्त्वा त्वा यस्तु कुर्य्यात् प्रतिग्रहं। दाता स इतरत्येव नानादु
गिराय सो द्विजः। ब्रह्मपुराणे। ब्राह्मणः प्रतिगृह्णीयाद्वृत्यर्थं साधुतस्तथा। अव्यस्व मणिमान्यं ग तिललोहांश्च वर्जयेत्। कृष्णाजीन हयग्राही न भूयः पुरुषो भवेत्। शय्यालं
कारवस्त्रादिप्रतिगृह्य मृतस्य च। नरकान्न निवर्त्तन्ते धेनुं तिलमयीं तथा। ब्रह्महत्या सुरापानमपि स्तेयं भविष्यति। आतुरायत् गृहीतन्तु तत् कथं वै तरिष्यति। एतदादि द्रव्य
दानं प्रतिगृहीतुर्दोषजनकं तदनिष्टवे विद्यादिरहितत्वेनासमर्थाय च दातुरपि च दोष एपि च दोषजनकमाह दक्षः। न केवलं हि तद्यातिशेषमस्य च नश्यति। तद्दत्तं द्रव्यं।

56

अतएव याज्ञवल्क्यः । विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः । गृह्णन् प्रदातारमधो नयत्यात्मानमेव च । अधो नरकं एतद्दानग्रहणोत्तरं उक्ततपोजपादिभिरात्मतारणाक्षमस्य स्वेच्छ
याप्रतिगृह्णते तु दानं न दोषायेत्याह विष्णुः । एतानि यदि गृह्णाति स्वेच्छयाभ्यर्थितो न तु । तस्मै दाने न दोषोऽस्ति यस्त्वात्मानं तु तारयेत् । तारणप्रकारमाह हारीतः । मणिवासोगवादीनां
प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् । पंचमध्यमे दशोत्तमे द्वादशरात्रं पयोव्रतः । शतसहस्रमसत्प्रतिग्रहेषु अष्टसहस्रं अष्टाधिकंसहस्रं असत् प्रतिग्रहेषु उभयतोमुख्यादिप्र
तिग्रहेषु तथा चादिपर्वणि । किं करिष्यत्यसौ मूढो गृहीत्वोभयतोमुखीं । सहस्रं वा करिणः पाशाः क्षुरधाराग्निसन्निभाः । पूर्णे वर्षसहस्रेषु पाशएकः प्रमुच्यते ॥ अतएव देव
लः ॥ प्रतिग्रहसमर्थो हि ज्ञात्वा विप्रो यथाविधि । निस्तारयति दातारमात्मानं च स्वतेजसा ॥ स्कांदे । वेदांगपारगो विप्रो यदि कुर्यात् प्रतिग्रहं । न स सापेन लिप्येत पद्मपत्रमिवाम्भ पृ० ५३
सा । एवं तीर्थे न प्रतिगृह्णीयात् पुण्येष्वायतनेषु च । निमित्तेषु च सर्वेषु न प्रमत्तो भवेन्नरः । इति महाभारतवचनात् प्रतिग्रहीतृदोषजनक गंगातीरादिदेश ग्रहणादिकाले दा
नेऽपि बोध्यं । किन्तु इदानीं तथाविधपात्राभावात् मनसा पात्रमुद्दिश्येत्यादिप्रागुक्तवचनाच्च । तद्देशकालयोरुत्सृज्य देशान्तरे कालान्तरे च प्रतिपादनाचारः सर्वथा समी
चीनः गंगावाक्यावस्याप्येवं । याज्ञवल्क्यः ॥ प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहं । ये लोका दानशीलानां स तानाप्नोति पुष्कलान् । अपवादमाह स एव । कुशाः शाकं
पयो मत्स्या गंधाः पुष्पं दधि क्षितिः । मांसं शय्यासनं धानाः प्रत्याख्येयं न वारि च । वकाराद् गृहादि शय्या गृहान् कुशान् गंधान् अपः पुष्पं मणीन्दधि । मत्स्यान् धानाः पयोमां
सं शाकं चैव न निर्णुदेत् । मणीन् विषादिनिवारकान् । तथा च वोदकं फलं मूलं अन्नमभ्युद्यतं च यत् । सर्वतः प्रतिगृह्णीयात् मध्वथाभयदक्षिणां । अभयदक्षिणामभयदानं

अभ्युद्धृतं अभ्यर्थिदत्तं। किमितिन प्रत्याख्येयमित्याह। अयाचिताहृतं ग्राह्यमपिदुष्कृतकर्मणां। अन्यत्र कुलटाषंडपतितेभ्यस्तथाद्विषः। एतद्वचनं याज्ञवल्क्यस्येति। मि
ताक्षरा कुल्लूकभट्ट माधवाचार्य्याः। मनोरितिशूलपाणिः। भरद्वाजः। अयाचितोपपन्ने तु नास्तिदोषः प्रतिग्रहे। अमृतं तं विदुर्देवास्तस्मात्तं नैव निर्णुदेत्। अपवादमाहसएवदे
व्यातीर्थेचनहृतेगुरुभृत्यार्थमेव च। सर्वतः प्रतिगृह्णीयादात्मवृत्त्यर्थमेवच। भृत्याभरणीयाभार्य्यादयः तथाचमनुः। वृद्धौचमातापितरौ साध्वीभार्य्यासुतः शिशुः। अप्यकार्य्यशतं
कृत्वाभर्त्तव्यामनुरब्रवीत्। आत्मवृत्त्यर्थं जीवनमात्रार्थं नतत्प्येतस्वयंततइति मनुस्मृतेः। प्रयोगसागरे। प्रतिग्रहं नगृह्णीयादात्मभोगविधित्सया। देवतातिथिपूजार्थं यत्ना
द्धनमुपार्जयेत्। अंगिराः। कुटुम्बार्थे द्विजः शूद्रात् प्रतिगृह्णीतयाचितं। क्रत्वर्थमात्मने चैव नहि याचेत कर्हिचित्। अतएव यज्ञार्थयाचने निन्दामाह याज्ञवल्क्यः॥
चांडालोजायतेयज्ञ कारणाच्छूद्रभिक्षितात्। शूद्रस्याप्ययाचितदातृत्वमाह नरसिंहपुराणे। अयाचितप्रदातास्यात् कृषिंवृत्त्यर्थमाचरेत्। पुराणांश्रृणुयान्नित्यं नरसिंह
स्यपूजनं॥ मनुः। वैश्यवृत्तिं मनातिष्ठन् ब्राह्मणः स्वेपथिस्थितः। स्ववृत्तिकर्षितः सीदन्निमं धर्मं समाचरेत्। सर्वतः प्रतिगृह्णीयात् ब्राह्मणास्त्वनयंगतः। पवित्रं दुष्यति
त्येतत् धर्मतोनोपपद्यते। नाध्यापनाद्याजनाद्वागर्हिताद्वाप्रतिग्रहात्। दोषोभवति विप्राणां ज्वलनाम्बुसमाहिते। ज्वलनाम्बुसमाअग्निजलसमाइति कुल्लूकभट्टः। प्रा
चीन प्रायश्चित्त विवेकेपितथापाठः। व्यासः। अक्षत्रियाश्च राजानो विप्राः शूद्रोपजीविनः। शूद्राश्चब्राह्मणाचारा भविष्यन्तियुगक्षये। याजयिष्यन्त्ययाज्यांश्च तथाभक्ष
स्यभक्षिणः। ब्राह्मणाधनतृष्णार्त्ता युगान्ते समुपस्थिते। पाद्मे। परान्नं परवासश्च नित्यधर्मरतस्त्यजेत्। सर्वतः प्रतिगृह्णीयाद्भोजनंनसमाचरेत्॥ स्कांदे। दुर्भिक्षेदारुणोप्राप्तेकुटु

57 न्वे सीदति स्वधा। प्रसतः प्रतिगृह्णीयात् प्रतिग्रहमतं वितः॥ मनुः। यद्यदिष्टतमं लोके यच्चापि दयितं गृहे। तत्तद्गुणवते देयं तदेवाक्षयमिच्छता। तेनेदं वाक्यं ग्रन्थस्य धान्यप्रान्तिका
स्तो ब्राह्मणाय महं संप्रददे। सर्वं सर्वत्र। नन्दिपुराणे। आत्मविद्या च पौराणा धर्मशास्त्रात्मिका तथा। एता विद्यास्त्रयो मुख्याः सर्वदानक्रियाफलैः। आत्मविद्या उपनिषत् च यत्निस्वः।
तथा पुराणविद्यादातारस्त्वनन्तफलभागिनः। हरिवंशे शताश्वमेधस्य यद्वत्पुराणे चतुःसहस्रस्य शतक्रतोश्च। सवेदनन्ते हरिवंशदानात् प्रकीर्त्तितं व्यासमहर्षिणा च। यद्वाजपे
येन च राजसूयादृष्टं फलं हस्तिरथेन चान्यत। तद्वाप्यते व्यासवचःप्रमाणं गीतं च वाल्मीकिमहर्षिणा च। तेनाश्वमेधचतुःसहस्रशतक्रतुजन्यपुण्यसमपुण्यवाजपेय
राजसूयहस्तिरथदानजन्यफलसमफलप्राप्तिफलं। मत्स्यपुराणे। यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः। वृत्रासुरवधोपेतं तद्भागवतमुच्यते। लिखित्वा तच्च यो दद्यात्
हेमसिंहसमन्वितं। पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदं । अष्टादशसहस्राणि पुराणं तत्प्रकीर्त्तितं। लिखित्वा लेखयित्वेति दानसागरः पद्मपुराणे। शालग्रामशि- ५७ श्र
लाचक्रं यो दद्याद्दानमुत्तमं। भूचक्रं तेन दत्तं स्यात् सशैलवनकाननं। सर्वदानं विष्णुप्रीत्यर्थमाह नन्दिपुराणे। देयानि विप्रमुख्येभ्यो मधुसूदनतुष्टये। इत्युपक्रम्य। यद्यदि-
ष्टतमं लोके यच्चाप्यस्ति गृहे शुचि। तत्तद्धि देयं प्रीत्यर्थं देवदेवस्य चक्रिणः। देवसंप्रदानकदानमाह विष्णुपुराणे। पात्रेभ्यो ह्यध्यात्मिकामुख्या विशुद्धा श्वाग्निहोत्रिणः। देव
ताश्च तथा मुख्या गोदानं स्यात दुत्तमं। यश्चोभयमुखीं दद्यात् प्रविप्रे वेदपारगे। देवाय व्याप्यमीष्टाय सकुलान्येकविंशतिं। समुद्धृत्य नरस्तिष्ठेन्नरकात् ब्रह्मणो निके।युगा
नि रोमतुल्यानि यदि श्रद्धापरो नरः। तत्प्रतिपत्तिमाह दानरत्नाकरे स्कन्दपुराणे। यत् किंचिद्देयमीशानमुद्दिश्य ब्राह्मणाय शुचे। दीयते विष्णवे वाथ तदनन्तफलं स्मृतं। यत् किंचि

देयमीशानमुद्दिश्य ब्राह्मणे शुचौ। दीयते विष्णवे वाथ तदनन्तफलं स्मृतं। यत् किंचिद्देयं दानार्हं वस्तु ईशानमुद्दिश्य त्यक्तं विष्णवे वा त्यक्तं पश्चात् ब्राह्मणे दीयते प्रतिपाद्यते तदनन्तफलं। तथा च मत्स्यसूक्ते। देवे दत्वान्नदानानि देवे देयश्च दक्षिणा। तत्सर्वं ब्राह्मणे दद्यादन्यथा निष्फलं भवेत्। दत्वेत्यत्र देयानीति वाराहीतं चे पाठः। बृहस्पतिः। षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः। उच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्। तथा। भूमिं दत्वा तु यः पत्रं कुर्याच्चन्द्रार्ककालिकं। अनाच्छेद्यमनाहार्यं दानलेख्यं तु तत् विदुः। महाभारते। अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः। पृथिवीं नान्यदिच्छन्ति पावनीं जननीं तथा। नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनं। दाने वाप्यथवादाने नामास्याः परमं प्रियं। दानादानकाले यत् प्रियदत्ता नामास्याः परमं प्रियमित्युक्तं तेन प्रियदत्तामित्युच्चार्य्य दातव्या ग्रहीतव्या। विष्णुः। तैजसानां पात्राणां प्रदानेन पात्रीभवति कामानामिति। मनुः। वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः। तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमं। भूमिदः सर्वमाप्नोति दीर्घमायुर्हिरण्यदः। गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमं। वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः। अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपं। यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः। धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टितां। सर्वमिति यस्य यदपेक्षितं ब्रध्नस्य विष्टपं सूर्य्यलोकं। अभयदः शरणागतरक्षकः तथा च रामायणे। पर्य्याप्तदक्षिणस्यापि नाश्वमेधस्य तत्फलं। यत्फलं याति संप्राप्ते रक्षिते शरणागते। अकरणे निंदामाह भारते। प्राणिनं वध्यमानं हि यः शक्तः समुपेक्षते। स याति नरकं घोरमेव माहुर्मनीषिणः। ब्रह्मणो वेदाध्यापयिता। ब्रह्मसार्ष्टितां ब्रह्मसमानगतितां। अत्र जलादिमात्रदाने तत्तत्फलं तैजसादि। पात्रमात्रदानेन तु वहुकामपात्रीभवनं फलं। न तु जलादियुक्तपात्रदाने विशेष्य

58 फलमुक्तं। नतश्च नानाविधानि द्रव्याणि धनानि विविधानि च। आयुष्कामेन देयानि स्वर्गमक्षयमिच्छता। इति देवलवचनात्। अक्षयस्वर्गकामनयैव पात्रयुक्तद्रव्यदानमुक्तं।
तथैवम्भूतदाने विष्णुर्देवतैव क्वचिदुक्तं। स्कान्दे। आसनं यः प्रयच्छेत्तु संवितं ब्राह्मणाय वै। राज्यस्थानमवाप्नोति स्वर्गं प्राप्नोत्यनुत्तमं। संवितं वस्त्राच्छादितं। अत्रासनस्य कन्यागो
दानेषु सवस्त्रत्वश्रुतेः। अन्यत्रापि तथा व्यवहरन्ति। संवर्त्तः। ताम्बूलं चैव यो दद्यात् ब्राह्मणेभ्यो विचक्षणः। मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते। वशिष्ठः। सुपूगं च सु
पर्णं च सचूर्णेन समन्वितं। अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद्बुधः। आग्नेये। घर्मवाततपसहं छत्रं दद्यात् द्विजातये। सर्वव्याधिविनिर्मुक्तः श्रियं पुत्रांश्च विन्दति। विष्णुध
र्मोत्तरे। छत्रोपानहदातारस्ते नराः स्वर्गभागिनः॥ नारदीये। गंधदः पुण्यफलदः प्रयाति ब्रह्मणः पदं। याज्ञवल्क्य। गृहधान्याभयोपानच्छत्रमाल्यानुलेपनं। यानं वृक्षं प्रियं
शय्यां दत्त्वात्यन्तं सुखी भवेत्। प्रियं यद्यस्य तत् तत्तु हर्म्यादि सम्वर्त्तः। फलमूलानि यानि निशाकानि विविधानि च। दानानि दत्त्वा विप्रेभ्यो मुदायुक्तः सदा भवेत्। ब्रह्मपुरा ५८ ३३
णे। काष्ठस्य पादुकादीनि पीठकाद्यासनानि च। यैर्दत्तानि द्विजातिभ्यः स्वर्गं यान्ति यथासुखं। याज्ञवल्क्यः। हेमशृंगी सफैरूप्यैः सुशीला वस्त्रशोभिता। सकांस्यपात्रा दातव्या
क्षीरिणी गौः सदक्षिणा। दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसम्मितान्। कपिला चेत्तारयति भूयश्चासप्तमं कुलं। सवत्सारोमतुल्यानि युगान्युभयतोमुखी। दातास्याः
स्वर्गमाप्नोति पूर्वेण विधिना ददत्। उभयतोमुखीमाह याज्ञवल्क्यः। यावद्वत्सस्य पादौ द्वौ मुखं योनौ प्रदृश्यते। तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति। यथाकथंचि
द्दत्त्वा गां धेनुं वाऽधेनुमेव वा। अरोगामपि विक्लिष्टां दाता स्वर्गे महीयते॥ अंगिराः। वरुणेभ्योन प्रदेयानि गोर्गेहं शयनं स्त्रियं। विभक्तदक्षिणा ह्येता दातारं तारयन्ति वै। एका स्ये

कस्यदातव्यानवक्रव्यः कथंचन। सातुविक्रयमापन्नादहत्यासप्तमं कुलं। अन्यत्तुस्वकमपि वक्तव्यादेयं तथाच ब्रह्मपुराणं। राजतं यः प्रयच्छेत्तु द्विजेभ्यो भाजनं शुभं। स
गन्धर्वपदं प्राप्य उर्वश्यासहमोदते। विष्णुधर्मोत्तरे। तथौषधप्रदानेनविरोगस्त्वभिजायते। नन्दिपुराणं। यश्चवेश्मशुभंदद्यात्सर्वोपकरणान्वितं। विप्रायनियमस्थाय
सपूतः सर्वपातकात्। उपकरणं धान्यादि नियमस्थायउपवासादिव्रतशीलायइतिदानसागरः। योऽश्वंरथं गजंवापि ब्राह्मणे प्रतिपादयेत्। सशक्रस्यवशे ह्येकेशक्रतु =
ल्यो युगानदश। प्राप्यन्ते चैवमानुष्यं राजाभवतिबुद्धिमान्। उपानहौ चयो दद्यात्ब्राह्मणाय प्रवासिने। सगजेन्द्रुरगैर्याति यान्येपथि यथासुखं। याज्ञवल्क्यः। भूमिंदीपांश्चा
न्नवस्त्राम्भस्तिलसर्पिः प्रतिश्रयान्। नैवेशिकंस्वर्णधूर्य्यान्दत्वास्वर्गे महीयते। प्रतिश्रयोगृहाश्रयः नैवेशिकं विवाहोचितद्रव्यं धूर्य्यावलीवर्द्दादयः। महाभारते।
अग्निर्वै सकलादेवाः सुवर्णंचप्रदत्मकं। तस्मात्सुवर्णं ददतादत्तास्युःसर्वदेवता। यमः। इन्धनानां प्रदानेनदीप्ताग्निर्जायतेभुवि। तथागन्धौषधमथाभ्यंगमाक्षिकंल
वणंतथा। यः प्रयच्छति विप्राय सौभाग्यंसतुविन्दति मत्स्यपुराणं। पायसंमधुसंमिश्रं भक्ष्याणिविविधानिच। यथाशक्त्याचराजेन्द्र भोजयेद्ससदक्षिणं। ततश्च प्रायुक्ततत
श्चोद्दिश्य पितरमित्यादिना रामायणवचनादशौचान्त्यद्वितीयदिनेपिदानानिकार्य्याणि। तत्रस्मृतिः। प्रेतमुद्दिश्ययोदद्याद्धेमगर्भं तिलान्नृप। यावन्तस्ते तिलाः स्वर्गे
तावत्कालंसमोदते। महाभारते। कल्यमुत्थाययोविप्रःस्नातःशुक्लेनवाससा। तिलपात्रंप्रयच्छन्वैसर्वपापैःप्रमुच्यते। एताभ्यांवचनाभ्यांमिलितदानंप्रत्येकवचनापा
तुदानंवाप्रतीयते। यदिमरणात्प्राकवैतरणीनदत्तातदेदानीं तद्दानं। कृष्णांवैतरणींधेनुं यःप्रयच्छेद्द्विजातये। सर्वपापविनिर्मुक्तोवैतरणींतरतेसुखं॥ इतिस्मृतेः। वैदि

अ ककर्म्ममात्रे। ॐतत्सदित्युच्चारणमाह भगवद्गीतायां॥ ॐतत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा। तस्मादोमित्युदाहृत्य य
ज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां। तदित्यनभिसंधाय यज्ञदानतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः। सद्भावे साधु
भावे च सदित्येवं प्रयुज्यते। प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ युज्यते। ॐतत्सदिति त्रिः प्रकारो ब्रह्मणो जगदीश्वरस्याभिधानं मुनिभिश्चिन्तितं। यस्यायं त्रिविधो नि
र्द्देशस्तेन परमात्मना ब्राह्मणादयो निर्म्मिताः। यस्माद्वेदब्रह्मणो निर्द्देशस्तस्मादोमित्युदाहृत्य उच्चार्य्य हुता यज्ञाद्याः शततमं गवैकुस्त्येपि प्रकर्षेणावर्त्तन्ते सांगा भवन्ति।
वक्तं योगिपास्तवस्यः। वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः। वाचकेपि च विज्ञाते वाच्य एव प्रसीदति। तथा यन्न्यूनं चातिरिक्तं च यच्छिद्रं यदयज्ञियं। यदमेध्यम
शुद्धं च यातयामं च यद्भवेत्। तदोंकारप्रयुक्तेन सर्वं चाविकलं भवेत्। तदित्युदाहृत्येत्यनुषंगः। अनभिः संगसंधाय यज्ञादिकर्म्मणः फलमिति शेषः। फलाभिसं पृ॰ २३
धानं विनामुमुक्षूणां कर्म्मकर्त्तव्यमित्यर्थः। यतः सदो विद्यमानस्य भावे जन्मनि साधुभावे उत्कृष्टचरिते च सदिति प्रयुज्यते। अतो यज्ञादौ कर्म्मणि प्रथमतः सच्छब्दः प्र
युज्यते इति दानक्रमाय संप्रदायिकाः। भूम्यासनं जलं वस्त्रं प्रदीपोन्नं ततः परं। ताम्बूलं छत्रं गंधाश्च माल्यं फलमतः परं। शय्या च पादुका गौश्च कांचनं रजतं तथा। दानमे
तत्षोडशकं प्रेतमुद्दिश्य दीयते॥ अथ प्रयोगः॥ अशौचान्ते द्वितीयदिने सूर्योदयानन्तरं सशिरस्कमात्रं स्नात्वा मंगल्यघृतादिभिः स्पृष्ट्वा शान्तिं हुत्वा ब्राह्मणान्स्व
स्ति वाच्य विप्रो जलं क्षत्रियो वाहनायुधं वैश्यः प्रतोदं शूद्रो यष्टिं स्पृष्ट्वा शुद्धः सन् वैधस्नानादि नित्यक्रियां कुर्य्यात्॥ अत्रैवांगप्रायश्चित्तं। तत्रादौ हेमगर्भ तिलदानं

ततः क्रमः। प्राङ्मुख उदङ्मुखं ब्राह्मणं गंधपुष्पाभ्यां संपूज्य ॐ सवस्त्रतैजसाधार हेमगर्भ तिलेभ्यो नम इति गंधपुष्पाभ्यां तान्पूजयित्वा ब्राह्मणहस्ते जलं दत्वा सवस्त्रतैजसा
धार हेमगर्भ तिलांश्च सं प्रोक्ष्य वामहस्तेन स्पृष्ट्वा तिलकुशत्रयजलमादाय। ॐ तत्सदित्युच्चार्य अद्यामुके मास्यमुके पक्षे ऽमुकतिथौ अमुकगोत्रस्य प्रेतस्यामुकदेवशर्म्मणो
ऽक्षौ चान्ताद्वितीयेह्नि अमुकगोत्रस्य प्रेतस्यामुकदेवशर्मणः स्वर्गकाम एतान्सवस्त्रतैजसाधार हेमगर्भतिलान् विष्णुदैवतान् अमुकगोत्रायामुकदेवशर्म्मणे ब्राह्मणाय तुभ्य
महं ददानीति संप्रदानहस्ते जलं दद्यात्। एवमेव पितृदयिता दानसागरयोः स्वर्गादिफले तु संप्रददस्वति। तिलानां मुष्टिमादाय हेमतैजसपात्रयोः। करमध्यात्मका ग्रेयेन तीर्थेन
अग्रेमित्युक्त्वा प्रतिगृह्य वस्त्रस्य दशान्तग्रहणं परिधानाभ्यां तानि स्वस्तीत्युक्त्वा सावित्रीं पठेत्। ततश्च एते सवस्त्र तैजसाधारो हेमगर्भतिला विष्णुदेवताका इति वदेत् ततो यथाशा
खां कामस्तुतिं च पठेत्। यथा ऋग्वेदे वा इदं कस्मा अदात्कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा
परिददातु पृथिवीत्वा प्रतिगृह्णातु। यजुर्वेदे। ॐ द्यौस्त्वा परिददातु पृथिवीत्वा प्रतिगृह्णातु कोऽदात्कस्मा अदात्कामः कामायादात् कामो दाता कामः प्रतिगृहीता का
मैतत्ते तव कामेन शतामुनजमहे॥ सामवेदे। ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते
अथर्ववेदे॥ ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णात्वन्तरीक्षमीदं महत्साहस प्राणानेति। ततोद
ता ॐ अद्येत्यादि कृतैतदमुकदानकर्म्म प्रतिष्ठार्थं दक्षिणां कांचनमग्निदैवतं मूल्यं वा विष्णुदेवतं तुभ्यमहं ददानीति द्विजाय दद्यात्। ब्राह्मणसन्निधाने यथासंभव गोत्र

६० नाग्नेरिति विशेषः। तुभ्यमिति न देयं भूमौ त्यागजलविक्षेपश्च एवमन्यत्रापि यथायोग्यमूहनीयं। सुवर्णं परमं दानं सुवर्णं दक्षिणा परा। सर्वेषामेव दानानां सुवर्णं दक्षिणोच्यते
इति वचनात्। दक्षिणां कांचनं देयमिति। तत्तत्फलकामनायां तु हेमगर्भ तिलानां तत्तिलसमसंख्यस्वर्गमोदनं फलं। वैतरण्या रुद्रो देवता सर्वपापविनिर्मुक्तिपूर्वकं वैत
रणीसुखसन्तरणं फलं। अत्र। ॐ यमद्वारे महाघोरे तप्ता वैतरणी नदी। तां ततुं हि ददाम्येनां कृष्णां वैतरणीं च गां। इत्युच्चार्योत्सृजेत्। प्रतिग्रहे पुच्छधारणं। भूमेः पूजा
यां दानवाक्ये च प्रियदत्तेति विशेषणं भूमेर्विष्णुर्देवता षष्टिवर्षसहस्राविच्छिन्नस्वर्गवासः फलं प्रतिग्रहे तद्भूमेः प्रदक्षिणा वर्त्मनां भूमेरसन्निधाने तामुद्दिश्य प्रदक्षि
णं ॥१॥ आसनस्य उत्तानांगिरो देवता राज्यस्थानानुत्तमस्वर्गप्राप्तिः फलं। अत्र विशेषानभिधानात् करमध्यात्मकाग्नेयेन प्रतिग्रहः एवमन्यत्र ॥२॥ जलस्य वरुणो देवता ६० शु
तृप्तिप्राप्तिः फलं ॥३॥ वस्त्रस्य बृहस्पतिर्देवता चंद्रमालोक्यप्राप्तिः फलं प्रतिग्रहे दशान्तग्रहणं परिधाने ॥४॥ दीपस्याग्निर्देवता उत्तमचक्षुः प्राप्तिः फलं ॥५॥ अन्नस्य
प्रजापतिर्देवता अक्षयस्वर्गप्राप्तिः फलं प्रतिग्रहे मुष्टिग्रहणं ॥६॥ तांबूलस्य वनस्पतिर्देवता मेधावित्व सुभगत्व प्राज्ञत्व दर्शनीयत्वप्राप्तिः फलं ॥७॥ छत्रस्य उत्ता
नांगिरो देवता सर्वव्याधिविनिर्मुक्तत्व श्रीमत्त्व बहुपुत्रित्वप्राप्तिः फलं प्रतिग्रहे दण्डधारणं ॥८॥ गन्धर्वस्य गन्धर्वो देवता ब्रह्मपदप्रयाणं फलं ॥९॥ फलस्य वनस्पति
र्देवता सदा मुदा युक्तत्वं फलं ॥१०॥ माल्यस्य वनस्पतिर्देवता अत्यन्तसुखित्वभवनं फलं ॥११॥ शय्याया उत्तानांगिरो देवता अत्यन्तसुखित्वभवनं फलं। तत्प्रति
ग्रहे आरोहणं ॥१२॥ पादुकायुगलस्य उत्तानांगिरो देवता स्वर्गलोकसुखगमनं फलं प्रतिग्रहे आरोहणं ॥१३॥ धेनो रुद्रो देवता सूर्यलोकप्राप्तिः फलं। अत्र धेनुप्रमु

विप्राक्समीपमानीय ॐ यालक्ष्मीः सर्वभूतानां याचदेवेष्ववस्थिता । धेनुरूपेण सादेवी ममशान्तिंप्रयच्छतु ॐ देहस्थायाचरुद्राणी शंकरस्यचया प्रिया । धेनुरूपेण सादेवी
ममशान्तिं प्रयच्छतु । ॐ विष्णोर्वक्षसि यालक्ष्मीर्या लक्ष्मीर्धनदस्यच । यालक्ष्मीः सर्वभूतानां साधेनुर्वीयदास्तुमे । ॐ चतुर्मुखवस्य या लक्ष्मी स्वाहायाच विभावसोः । च
न्द्रार्केशक्रशक्ति र्याधेनुरूपास्तुसाश्रिये । ॐ स्वधात्वं पितृसंघानां स्वाहायज्ञभुजां यतः । सर्वपापहरा धेनुस्तस्मा च्छान्तिंप्रयच्छमे । ॐ सर्वदेवमयीं देवीं सर्ववेदमयीन्तथा ।
सर्वलोकहितार्थाय सर्वलोकसुखायच । प्रयच्छामि महाभागा मक्षमाय शुभायतां । इत्युच्चार्य्योत्सृजेत् । प्रतिग्रहेपुच्छधारणं ॥१४॥ किरणस्याग्निर्देवता दीर्घायुः प्राप्तिः
फलं । दक्षिणात्तु रजतं ॥१५॥ रजतस्य चन्द्रोदेवता उत्तमरूप प्राप्तिः फलं ॥१६॥ एवमन्यान्यपितत्कामनया देयानि । अन्नजलादिमात्रदाने उक्तफलं तैजसपात्रदा
नेतु वरुणकामपात्रीभवनं फलं । ननु जलादिपुक्तौ तैजसपात्रदाने विशेष्य फलमुक्तं । ततश्चनाना विधानि द्रव्याणि धनानि विविधानिच । आयुष्कामेन देयानि स्वर्गमक्षय
मिच्छता इतिदेवलवचनात् । स्वर्गकामनयैव पात्रयुक्तं तथाविध द्रव्यदानं युक्तं । तथैवं भूतदाने विष्णुर्देवतमिति वक्तुंयुक्तं । तज्ज्ञेयं विष्णुदेवत्यं सर्वं वा विष्णुदेवतमिति ।
विष्णुधर्मोत्तरात् । ततो विलक्षणां शय्यां दद्यात् तत्रस्वर्गः फलं । नानाभरणैर्द्विजदम्पती भूषयित्वा फलवस्त्रसमन्वितकांचनपुरुषं शय्यायामारोप्य तां गंध पुष्पाभ्यां
संपूज्य ताभ्यां दद्यात् । ततस्ताभ्यां तामुपवेशयेत् । ततो दक्षिणां दद्यात् । एवं संक्रान्त्यादौ स्वर्गादि फलकदाने तु ददानीत्यत्र संप्रदद इत्यभिलापे विशेषः । एवं चरुके कं मि
लितं नाना द्रव्यं कांचनादि धनं वा आयुष्कामेन स्वर्गकामेन वादेयमिति ॥ ०॥ ततो वृषोत्सर्गः । स्वगृह्योक्तविधिना कार्य्यः । तत्र प्रेतलोकपरित्याग पूर्वक स्वर्गलोकगमनं

61

फलं। ततः पूर्वोक्तविधिना कपिलां दद्यात्। तत्र रुद्रो देवता स्वर्गः फलं। ततएकोद्दिष्टं स्वगृह्योक्तविधिना कुर्यात्॥ अथ वृषोत्सर्गविचारः॥ तत्रौपादानिकस्वत्वनिरासाय का
मधेनुरत्नाकरकल्पतरुधृतब्रह्मपुराणं॥ अथ वृत्ते वृषोत्सर्गे दाता वक्ष्यतिभिः पदैः। ब्राह्मणानाह्वयेत् किंचिन्मयोत्सृष्टस्तु निर्जने। ततकश्चिदन्यो न नयेत् विनाज्यं च य
थाक्रमं। तत्रैव नवाक्येन च तत्क्षीरं पातव्यं केन चित् क्वचित्। कृत्यप्रदीपोप्येवं। वक्ष्योभिः काकुक्तिभिः स्वत्वाजनकत्वेमंगकवेदमेयत्यागरूपत्वादस्य यज्ञत्वे तत्तु भाक्तं
देवतोद्देश्यकत्वाभावात् तथा च यज्ञं व्याख्यास्यामो देवता द्रव्य त्यागस्तदंगमितर दिति स्मृतेः देवतोद्देशेन द्रव्यत्यागो यज्ञपदार्थः सर्वमन्यत्तदंगमिति हरिशर्म्मव्याख्याने। तथा च
हारीतः मंत्रद्रव्याग्निसंयोगं यज्ञमाहुर्मनीषिणः। मंत्रस्यापि देवताविग्रहरूपत्वात्पूर्ववचने नास्या विरोधः। तथा च देवीपुराणीय वास्तुयागे प्रजेशं मंत्रविग्रहमित्युक्तं अतए ६१ श्री
वमिताक्षरायां विवाहोत्सवयज्ञेष्वित्यत्र यज्ञे वृषोत्सर्गादावित्युक्तं। दैतनिर्णयेपि अभ्युदयिकं च वृषोत्सर्गश्चित्वेनावश्यकं एकादशाहे तद्विधेर्निरवकाशत्वा गत्याभ्यु
दयिकाभावेपि वृषोत्सर्गासिद्धेरित्युक्तं उशनसोपि। नार्वाक्संवत्सराद्वृद्धिर्वृषोत्सर्गे विधीयते। सपिंडीकरणादूर्द्ध्वं वृद्धिश्राद्धं विधीयते इत्युक्तं पारस्करेण। शूलगवमभि
धायएतेनैव गोयज्ञो व्याख्यात इत्यादिना गोयज्ञमभिधायान्ते च तस्य तुल्यवयागौर्दक्षिणा इत्युक्तं अथ वृषोत्सर्गो गोयज्ञेन व्याख्यात इत्युक्तं ते न वृषोत्सर्गस्य शूलगवतुल्यगोयज्ञा
तिदेशाद्यागत्वमिति यद्यपि गोयज्ञे उपदिष्टपायसेन शूलगवातिदिष्टपशु निवृत्तौ तस्य तुल्यवयागौरित्यनुपपन्नं तथाप्यत्र तत्छेदेन प्रक्रांत शूलगवप्रकृतस्य मानवृषोत्सर्गपशुः परामृश्य
ते अतस्तयोर्दक्षिणेयं गोयज्ञप्रकरणे पाठात्। तत्रापि यथासंभववयस्को गौर्दक्षिणा हरिशर्म्मणाप्येवं। एवं च वृषोत्सर्गेपि वृषतुल्यो गौर्दक्षिणेति छंदोगपरिशिष्टेपि अथ वृषवत्सतरीणामेलं कां स्वासं

वाचार्य्याय प्रयच्छेत् गां चेति। अत्र वृषवत् शातय्यलंकार वस्त्रयुगस्य परिधाप्याहतेश् क्षौमवाससी हैमपट्टकमिति छन्दोगपरिशिष्ट वचनान्तरोक्तभूतोपयोगस्य प्रतिपत्तिमाचार्य्या
य पूर्वमभिधाय गां चेति पृथगुपादानं तस्मै दक्षिणार्थमिति। व्यक्तमाह भविष्ये। वृषवत्स्योवयो वर्णी वृषः स्याद्दक्षिणा द्विजाः। वृषोत्सर्गे तथा पुंसां स्त्रीणां स्त्री गौर्विशिष्यते। एतेन द
क्षिणाशून्यमिदमिति मैथिलोक्तं हेयं। ब्रह्मपुराणेऽपि। स्वधापितृभ्य इत्यभिधाय दद्यादेतेन मंत्रेण तिलाक्षतयुतं जलं। पितृभ्यश्च समासेन ब्राह्मणेभ्यश्च दक्षिणामित्यत्र ब्राह्म
णेभ्यो ब्रह्महोत्राचार्य्येभ्य इति प्रतीयते। अत्र वृषोत्सर्गमात्रे एतन्मंत्रकरणक तिलयवदानयुक्त जलदान श्रुतेः। प्रेतवृषोत्सर्गेऽपि तत्करणं तदंगत्वात् न च शूलगवादि वृष्ट गोप
स्तातिदेशात् वृषोत्सर्गेऽपि आवश्यथाग्निमाचे लाभान्निरग्नेर्नाधिकार इति वाच्यं मध्येगवांस्तु सन्निद्धं अग्निं कृत्वा आज्यं संस्कृत्य इह रतिरिति षडजुहोतीति पारस्करीय सूत्रे अग्निं
कृत्वेत्यनेन लौकिकाग्ने लाभावात् अन्यथा तदभिधानं व्यर्थं स्यात् अत एव वह्न्यभावे नाप्यन्त्यजन्मन इति संगच्छते। वाचस्पतिमिश्रास्तु आज्यं संस्कृत्य इह रतिरित्यानन्तर्य्य विधा
नात् आज्यसंस्कारात् पदमेव इह रत्यादि षडाहुतयः अथ आघाराज्यभागौ ततः पायसाहुतयो नव ततः पुष्णाः अन्वेतु इति मंत्रेण पौष्णहोम इत्याहुः तत्र गोयज्ञातिदेशेन
पायसद्रव्यप्राप्तौ तदपोद्य आज्यप्राप्तये आज्यं संस्कृत्येह रतिरित्यभिधानस्य फलवत्वात्। आघाराज्यभागानन्तरं प्रकृत होमस्यान्तरे आग्नेयं दक्षिणे सौम्यं मध्ये अन्या
हुतयः इति सांख्यायनोक्ताज्यभागहोमदेशान्तराल देशस्यान्यहोमीयस्य च वाधापत्तेः। आज्यसंस्कारानन्तरं प्राप्तोपनयन कुशदान समिधादान पर्य्युक्षणानां षडाहुतेः
पूर्वं वाधापत्तेश्च। तानि च तेनापि पूर्वमुक्तानि। यत्तु पौष्णस्य अपराणानुपदेशात् असिद्धस्यैवासादनमित्याहुस्तदपि न युक्तं पौष्णस्य जुहोतीति पृथगुपादानस्यापि स्पष्टवचो-

६४ ध्यत्वात् अन्यथा छंदोगानामिव तंडुलचरुः स्यात्। यद्यप्यदन्तकः पूषा पिष्टभागिति सदा चरुं। अग्नीन्द्रे स्वरसामान्यात् तंडुलो च विधीयते। इति छंदोगपरिशिष्टात् पिष्टचरुनियमः। चरु
शब्दस्य संस्कारविशेषसंस्कृतान्नवाचित्वेन चरुपरिमाणप्राप्त्यबाधस्योक्तत्वात्। अत एव श्रपणमप्याह विष्णुः। अग्निं परिस्तीर्य पौष्णं श्रपयित्वा पुरुषाणामिति न चैतत् कठशाखिपरं।
अन्योक्तस्यापि अन्यत्राकांक्षितत्वेनान्वयात्। तथा छंदोगपरिशिष्टं। यन्नाम्नातं स्वशाखायां परोक्तमविरोधि च। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्म्मवत्। एवमेव हरिशर्म्मप्र
भृतयः चरुविधौ विद्याकर वाजपेयी शास्त्रावधारणा वेलायां यच्च प्रयोजनाभावादिनिश्चयस्तत्रैव तदुपादानादिलोपः शास्त्रार्थः। यथा कृष्णले अवघातादिलोपः। यच्च त्वनुष्ठानवेला
यामेव पुरुषदोषेण प्रयोजनाभावो ज्ञेयते तदा प्राकृततन्निश्चयात् शास्त्रप्रतिपादितपदार्थो नियमात् पूर्वमन्त्रार्थमनुष्ठेय एव प्रकृते वालस्यादिना व्रीह्यादिस्थाने तंडुलादिषु गृ
हीतेषु अवघातादिसमाचारनियामिकाः। घातेन्मूने तथा छिन्ने सान्नाय्ये मांत्रिके तथा। यज्ञे मंत्राः प्रयोक्तव्या मंत्रार्थसिद्धिदाः। मांत्रिके मंत्रसाध्ये अवघातादौ न्यूने। तत्काले ६२ श्री
मंत्रपाठमात्रेपि यत्काले मंत्राः प्रयोक्तव्याः। अस्मिंस्तु कल्पे मंत्रार्थज्ञानस्य नात्युपयोगः इत्थमेवेदानीं प्रयोगानुष्ठानमाह। यत्तु परमग्नेः प्रागग्रैर्दर्भैरीशानात् सौम्यान्तं या
वदुर्वदिक परिस्तरणमाह स्तत्र सर्वाश्चाहतो दक्षिणातः प्रदक्षिणयउदकसंस्थामवनीति सांख्यायनविरोधात् ततश्चाग्नेयादीशानान्तं ब्रह्मणोग्निपर्यन्तं नैर्ऋतादावायव्यान्ते अग्नेः प्र
णीतान्तं परिस्तरणं वामदत्ताद्युक्तं युक्तं। आचार्यलक्षणं च छांदोगपरिशिष्टे उदाहरति वेदार्थान यत्तविद्याः स्मृतिरपि। श्रुतिस्मृतिसमापन्नमाचार्यानं विदुर्बुधाः। श्रुतिस्मृतिसमा
पन्नं श्रुतिस्मृत्युक्तकर्म्मयुक्तं। आहतं वक्ष्यमाह वशिष्ठः। ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं। आहतं तद्विजानीयात् सर्वकर्म्मसु पावनं। ईषत्सूक्ष्मतंतुकं। नच ब्रह्मैवैकस्य

त्विकपाकयज्ञेस्वयंहोतेति । गोभिलसूत्रात् ब्राह्मणो दक्षिणा देया यत्रयापरिकीर्त्तिता । कर्म्मान्तेनुच्यमानायां पूर्णपात्रादिकाभवेत् । इतिछन्दोगपरिशिष्टात् । ब्राह्मणो हवोत्सर्ग
दक्षिणादेयाइति वाच्यं । होमदक्षिणाया एवं ब्राह्मसंप्रदान कत्वात् अतएवदर्शादि यागमात्रमभिधायगोभिलेनापि पूर्णपात्रो दक्षिणा तं ब्राह्मणो दद्यादित्युक्तं पात्रस्यचान्तत्वे
पि पुंस्त्वे छान्दसं एतदनुसारात् कर्म्मान्त इति ब्राह्मसाध्यहोमान्तपरं नतुपरिशिष्टप्रकाशोक्तनामकरणादिप्रधानकर्म्मान्तपरं अतस्तद्दक्षिणा पात्रान्तरेपिदेया । इतिन च
पाकयज्ञेस्वयं होतेतिश्रवणात् हवोत्सर्गेनान्यो होतेतिवाच्यं निःक्षिप्याग्निंस्वदारेषु परिकल्प्यार्त्विजं तथा । प्रवेशोत्कार्य्य वानविप्रो हवथैवनचिरं क्वचित् इतिछान्दोगपरिशि
ष्टेन गोभिलेनजुहुयाद्धास्ये वापि इत्यनेनारभ्यतस्यविधानेन चान्यकर्तृत्वलाभात् । किन्तुस्वयंहोमे फलं यत्तदन्येननजायते इतिदक्षोक्तफलातिशयार्थं नतुस्वयंहो
तृत्व नियमार्थमिति । अन्यथाह्रस्मेनाप्यन्तजन्मन इतिमत्स्यपुराणीयेन प्रतिपन्नशूद्रकर्तृकहवोत्सर्गो न स्यात् एवं च शूद्रकर्तृक हवोत्सर्गेपि मंत्रपाठवर्ज्जात्तन्निष्पाद्यत्वा
द्युपपद्यते । यत्तु विष्णुपुराणे । दानं चशूद्रोपि पाकयज्ञैर्यजेत च । पित्रादिकं चवैसर्वं शूद्रः कुर्वीत तेनवै । अत्रयजेतेत्यनेन यत्शूद्रकर्तृक पाकाभिधानं तत्कलीतर प
रं । ब्राह्मणादिषु शूद्रस्य पक्वतादि क्रियापि च । प्रागुक्तादित्यपुराणे न निषेधात् । आमंशूद्रस्य पक्वान्नं पक्वमुच्छिष्टमुच्यते इति स्वयंकरण एव वैश्वदेविक होमादौ
बोद्धव्यं । यत्तु विष्णुवर्णोत्तमुकर्त्तव्यं पाकभोजनमेव च । शुश्रूषामभिपन्नानां शूद्राणां च वरानने । इति गंगावाक्यावल्यां देवैनवयायवराहपुराणं । सच्छूद्रपाकविधायकं
तदपि कलीतरपरं । शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणां । भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः । इति प्रागुक्तादिपुराणेन शुश्रूषाकत्वेन प्रतिप्रसूतस्य गोपालादेः

63 कलौ निषेधात्। यत्तु भविष्ये। उपक्षपणधर्म्मेण शूद्रान्नं यः पठेद्द्विजः। अभोज्यं तद्भवेदन्नं स च विप्रः पतत्यधः। उपक्षेपणधर्म्मः शूद्रस्वामिकान्नस्य पाकार्थं ब्राह्मण
गृहे समर्पणमिति कल्पतरुव्याख्यानं तत् द्विजशुश्रूषकेतरशूद्रान्नपरं। तद्दितरपाके तु कन्दुपक्वानि तैलेन पायसं दधिशक्तवः। द्विजैरेतानि भोज्यानि शूद्रगृहकृतान्यपि
इति कूर्म्मपुराणे प्रतिप्रसवात् एवं वृषं वत्सतरीयुक्तं ऐशान्यां चालयेद्दिशि। होतुर्वस्त्रयुगं दद्यात् सुवर्णं कांस्यमेव च। अयशश्शक्त्याराय दातव्यं वेतनं मनसेप्सितं इति विष्णुव
चनादपि होत्रन्तरप्रतीतिः। एतेन वृषोत्सर्गे विष्णूक्ता दक्षिणा स्वयंकर्तृकहोमपक्षे ब्राह्मणे देया। अन्यकर्तृकहोमे तु विदध्याद्धोत्रे च मन्यच्च दक्षिणाद्विहरौ भवेत्। स्वयं चेद्द
भयं कुर्य्यादन्यस्मै प्रतिपादयेत्। इति छन्दोगपरिशिष्टात्। अर्द्धं ब्रह्मणोऽर्द्धं होत्रे देयमिति परिशिष्टप्रकाशोक्तं निरस्तं। वृषोत्सर्गदक्षिणा त्वाचार्य्याय देया इति पादितं। वि ६२ श्रु
ष्णूक्तहोतृदक्षिणा या सा कथं ब्राह्मणे देयेति। तस्मात् ब्रह्मदक्षिणा पूर्णपात्रादिका होतृदक्षिणा विष्णूक्ता वृषोत्सर्गदक्षिणा गोरूप्या इति सिद्धं स्वयंकर्तृकहोमे तु वस्त्रयु
गादिका होमदक्षिणा ब्राह्मणे देया ब्राह्मणे दक्षिणा देयेति प्रागुक्तत्वात्। यत्तु हार्त दक्षिणा वस्त्रयुगसुवर्णकांस्यरूपा होत्रे देया। होतुर्वस्त्रयुगमिति विष्णूक्तेः। सा च कातीय
कल्पेप्यन्वेति। सर्वशाखाप्रत्ययमेकं कर्मेति न्यायात्। अत एव यजमान एव होतेति पाश्चात्यमतमपास्तं सत्यवद्दक्षिणा बाधापत्तेरिति। पित्रभक्तितरंगिण्यामु
क्तं तच्चिन्त्यं सत्रे यस्य यजमानास्त एव ऋत्विज इति श्रुतेः। ऋत्विक्कार्य्ये यजमानविधानादानतिलक्षणस्य दृष्टार्थस्याभावात् अतिदेशागतदृष्टार्थदक्षिणायोः सा च वा
धोनदृष्टार्थायाः हतमश्रोत्रियं श्राद्धं हतो यज्ञस्त्वदक्षिणः। तस्मात् पलं काकिणीं वा फलपुष्पमथापि वा। प्रदद्याद्दक्षिणां यज्ञे तया सफलो भवेत्। इति बृहस्पतिना अ

वश्यकत्वेन पुत्रादेरप्युक्तेः स्वयं होतृपक्षेऽपि विदध्यादित्यादिना दक्षिणापाठकत्वात् स्वश्राद्धविवेकोऽप्येवं न च वृषोत्सर्गीय होमे होतृदक्षिणोपदेशात् न स्वयं होतेति वाच्यं तद्वचनस्य
भक्तविषयत्वात्। अन्यथा अन्यैः शतकृताद्धोमादेकः पुत्रकृतो वरः। पुत्रैः शतकृताद्धोमादेकः आत्मकृतो वरः इति श्रुतेः स्वयं होतेति प्रागुक्तस्य निर्बीजसंकोचापत्तेः। यद्यपि तन्त्रस्वारवा
तोऽवगतो दक्षिणाभेदस्तथाप्याक्षिप्तत्वात्। सर्वशाखाप्रत्ययकर्मैकं कर्मेति न्यायात् सर्वत्राप्यन्वेति। तर्हि विदध्याद्धोत्रमन्यश्चेदित्यस्य का गतिरिति चेत् यत्र होमे विशेष्य नाभिहि
ता दक्षिणा तत्र ब्रह्महोतृभ्यां होमदक्षिणा विभज्य ग्राह्या इति। अयस्कारायत्रिशूलचक्रस्यष्ठी केचिद्गोपालकाय तथा छन्दोगपरिशिष्टं। ततोऽरुणो नगंधेनमानस्तो कश्तीरयन वृषस्य
दक्षिणे पार्श्वे त्रिशूलांकं सम्यग्लिखेत्। वृषो ह्यसीति सव्यस्य चक्रांकमपि वर्जयेत्। तप्तेन पश्चादयसा स्यष्ठौ ताविव कारयेत्। अंकनं च स्फिकद्वये स्फिचोरंकनमभिव्यक्तं च
पक्षतो लिखनात्। यत्तु वाचस्पतिमिश्रेण वृषोऽयं हरिहरमूर्त्तिश्चक्रशूलधारित्वात् तत्र दक्षिणाभागो हरस्य युक्तस्तथा सिद्धत्वात् तथा च दक्षिणहस्ते चक्रं वामहस्ते शूल
मिति सिध्यति नहि पादनास्त्रधारणमित्युक्तं तन्न वाचनिकेऽर्थे युक्तेरनवकाशत्वात्। अत्र गोयज्ञे सूर्य्यनामेति विवाहे योजकः स्मृतः। इतिकापिलेन गोयज्ञे अग्नेः सूर्य्यनामाभि
धानात् तद्धर्म्मग्राहित्वात् वृषोत्सर्गेपि तथेति चन्नउपदेशो नातिदेशबाधात्। वृषोत्सर्गहोमस्य पाकसाध्यत्वात् तत्राग्नेः साहसनामत्वं प्रायश्चित्ते विधुश्चैव पाकयज्ञे च साहसः इ
ति गोभिलपुत्रकृतगृह्यसंग्रहवचनात्। प्रायश्चित्ते प्रायश्चित्तात्मके होमे विधुनामाग्निः। ततः प्रकृतहोमानन्तरं तद्वैगुण्यजन्यपापक्षपकामस्तत्तद्वदोक्तं प्रायश्चित्तं संकल्पये
त्। तथा चाहतुः शंखलिखितौ। प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् प्रायश्चित्तमुपासीनो वाग्यतस्त्रिसवनं स्पृशेत्। प्रत्येकं नियतं काल इति तत्तद्व्रतकालसंख्या आ

64

त्मनो व्रतमिति आत्मसंबन्धित्वेन आत्मकत्वत्वेन इति यावत्। तथा दिग्भेत उल्लिखितम वदेवभट्टेनापि लिखितं। यदप्युक्तं अथेत्याद्यमक कामोरु द्वैदेवतं वृषमेनं युवानमित्या
दि लौकिकपदं वैदिकमंत्राभ्यामुत्सर्गवाक्यमिति तन्न वचनं विना परस्परान्वयबोधाय लौकिकपदविशिष्टमंत्रोच्चारणे मानाभावात्। तथा चानुषंगाधिकरणे पार्थसारथिमिश्राः
वेदेन लौकिकः शेषो नम्रग्योनिष्प्रमाणक इति माधवाचार्यश्च वेदाकांक्षापूरणीया वेदेनैवानुषंजनं। अन्यशेषोपि बुद्धिस्थो लौकिकस्तु न तादृशः। तस्मादाकांक्षितत्वेनापि
वैदिकमेवानुषज्यते न तु लौकिकमध्याह्रियते इति वदन्नापि वैदिकमंत्रस्य वचनाभावे लौकिकवाक्येनान्वयः। अन्यथा भूःस्वाहा इत्यादौ तथात्वापत्तेः। अष्टाभिर्धेनुभिर्युक्ता
श्च तस्मिन् रथक्रमात् त्रिहायणीभिर्धेन्याभिः सुरूपाभिश्च शोभितः। सर्वोपकरणोपेतः सर्वसस्य चरो महान्। उत अष्टव्योविधानेन श्रुतिस्मृतिनिदर्शनात्। इति ब्रह्मपुराणो ६४ श्रु
क्तधेनुयुक्तत्वसर्वोपकरणोपेतत्वाद्युल्लेखाच्च। अत्र धेनुपदं वक्ष्यमाणगुर्विणपइति विशेषणं च सारव्यन्तरीय कात्यायनसूत्रे वत्सतरीति श्रुतेः। यथा पयस्विन्याः पुत्रायु
धेयो रूपवान्स्यात् तमलंकृत्य यूथेमुख्याश्च तस्मा वत्सतर्यस्ताश्चालंकृत्य एनं युवानं पतिं वो दद्मानि तेन क्रीडन्तीश्च रथप्रियेणमानः। साह्य जनुसास्तुभगा रायस्पोषेण सम्मि
षमोदमस्व्येतं येव ऋचाउत्सृजेरन्निति नचैतदनुसारेण वत्सतरीचतुष्टययुक्तमिति वृषविशेषणमिति वाच्यं तथात्वे तादृशं वृषमिति विशिष्टे। वो पुष्पाकं वत्सतरीणां प
तिमित्यनन्वयापत्तेः प्रागुक्तदोषाच्च। न च कात्यायनीये एवकारश्रुतेः। केवलमंत्रेणोत्सर्गो न तु लौकिकवाक्येनेति वाच्यं एतयैवेत्येवकारेण सजातीयत्वेन सर्वेशाखा
प्रत्यायकमेकं कर्मेति न्यायप्राप्तस्य कामधेनुनयैतत्कालिककल्पतरुधृत विष्णुसूक्तस्य ऋगन्तरस्य व्यावृत्तिर्न तु वाक्यस्य अतएव पितृदयितापरिशिष्टप्रकाशभूतलपा-

शिष्टकृतपरिशिष्टदीपिकाप्रभृतिषु मंत्राभिधानपूर्वकं वाक्येन वृषोत्सर्ग इत्युक्तं एवं चैतन्मंत्रस्याकरणत्वमुपपन्नं अन्यथा त्वदानीत्यनेन मंत्राभ्यन्तरेणोत्सर्गान्तत्वात् मंत्रा
न्ते कर्म्मादि सन्निपात इति न्यायस्याप्यबाधः। मंत्रान्ते संप्रदानमिति सरणाद्दत काठकश्रुतेरप्यबाधः व्यक्तमाहापस्तंबः मंत्रान्ते कर्म्मादीनि सन्निपातयेदिति समग्रं मंत्रं
पठित्वा कर्म्म कारयेदिति कर्म्मविपाकः। एवं चामुकामुक इति सोपकरणां वत्सतरीचतुष्टययुक्तं वृषमिति चाभिलप्योत्सर्गः संगच्छते। ततश्च ब्राह्मणेन पाठीतमंत्रे शूद्रस्या
पि वाक्येनोत्सर्ग इति। एवं प्रधाने स्वामी फलयोगात् गुणे प्रतिनिधिः परार्थत्वादिति परिभाषापि संगच्छते। एवं च वर्षासु रथकार आदधीत इति प्रत्यक्षश्रुत्या रथकारस्य मंत्रपाठ
पूर्वकाग्निस्थापनरूपाधाने बोधिते तत्र विद्याप्रयुक्तिरस्तु इह तु स्मार्त्तकर्म्मणि प्रत्यक्षश्रुत्यभावान्न तथा। किन्तु ह्रस्वेनाप्यन्त्यजन्मन इति स्मृत्या शूद्रस्य प्रधाने दृष्टत्यागेऽधि
काराय श्रुतिरबाधितविषये व कल्प्यते न तु मंत्रपाठायापि। यथापि तृभ्यो दद्यादित्यत्र वहुवचनेन साहित्यप्रतीतावपि न चतुर्थ्यासहितानां देवतात्वं कल्प्यते किन्त्वत्र पित
ॄणां देवता इत्यापस्तम्बवचनेन देवता इति वहुत्वस्य पृथङ् निवेशितत्वेन प्रत्येकदेवतात्वस्य प्रतीतस्याबाधेन पितॄणां प्रत्येकं देवतात्वं कल्प्यते पितृभ्य इति साहित्यन्तु अ
भिधानक्रियापेक्षयेत्युक्तं तद्वदत्रापि। अमंत्रस्य शूद्रस्य विप्रो मंत्रेण गृह्यत इति अस्याबाधेन प्रधानाधिकारमात्रं कल्प्यते। मनुरपि। शूद्रस्य मंत्रवर्ज्यं कर्म्मानुष्ठा
नमाह धर्म्मैश्चरन्ति धर्म्मज्ञाः सतां वृत्तिमनुष्ठिताः। मंत्रवर्जं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च। ये पुनः शूद्राः स्वधर्म्मवेदिनो धर्म्मप्राप्तिकामास्त्रैवर्णिकाचारमनिषिद्ध
माश्रिताः। तेन नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत्। इति याज्ञवल्क्यवचनात्। नमस्कारेण मंत्रेण मंत्रान्तररहितेन पंचयज्ञादि कुर्वाणा न प्रत्यवायमाप्नुवन्ति ख्यातिं लोके

65 प्राप्नुवन्ति इति कृह्यु कमहः। वत्सतरीयुक्तवृषोत्सर्गस्य प्राधान्याद्दादित्यपुराणेऽपि मंत्रं विना तावन्मात्र उक्तो यथा। मंचन्ति वृषभं ये तु नीलं चैव सुशोभनं। लांगूलाकर्षितं विंगो
वृंगयुक्तं च शोभनं। कार्त्तिक्यां मुंचते यस्तु दत्वा पूपान्न संशयः। त्रिवर्षे। त्वेथ गुर्विण्यै दद्यान्नवोढ वृषस्य च। एवं च ब्राह्मणादारा मंत्रपाठोपपत्तेः शिवपुराणे॥ स्त्रियः शूद्रा
श्च म्लेच्छाश्च ये चान्ये पापयोनयः। नमस्कारेण मंत्रेण तदेवफलमाप्नुयुरित्यादिना छंदोगपरिशिष्टादौ कर्त्तृविशेषानभिधानेन च सर्वाधिकारप्रतीतेः। न स्त्रीणामधिकारो
स्ति श्राद्धेषु पावित्रादिषु। कन्यादाने वृषोत्सर्गेऽप्यधिकारो भवेत् ध्रुवमिति वचनाच्च। ब्राह्मणादिस्त्रीणामधिकारः एवमेवस्तुगतिसोपानप्रभृतयः क्रमेणाप्यन्तजन्मन इति
तु वर्णप्रशंसापरं। वृषोत्सर्गेऽप्यनुपनीतस्याधिकारः। न ह्यस्य विद्यते कर्म्म किंचिदामौंजिबंधनात्। अन्यत्रोदककर्म्मस्वधापितृसंयुक्तेभ्य इति कल्पतरुधृतवशिष्ठवच
ने प्रतिप्रसवात्। अत्रार्थस्तु हे वत्सतर्यो वो युष्माकं एनं युवानं पतिं ददामि तेन जानित्य हं प्रार्थयामि तेन वृषेण सह क्रीडन्तीः खेलन्त्यश्चरथ ब्रमथ हे वत्सतर्यो यूयमपि ६५ ग
मानः नास्मत्तत्त्वविवयाभविष्यथ किन्तु मया त्यक्ता आवयं वृषभस्य वत्सतरीणां च त्यागेन वायस्पोषेण धनसमृद्ध्या सप्य जनुषा स्वजन्मना पकेनइषा अन्नेन सम्मा
देन ह्यस्याम भवेम स्तु भगा लोकस्य प्रियाः इति संमदेम इति वर्त्तमानसामीप्ये वर्त्तमानवद्वेति पाणिनिस्मरणात् भविष्यदर्थे वर्त्तमाना। नीलवृषलक्षणमाह शंखः। लो
हितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते। वत्सतरीविशेषयति स्मृतिः। अग्रतो लोहिता पत्नी पार्श्वाभ्यां नीलपांडुरे। पृष्ठतस्तु भ
वेत्कृष्णा वृषभस्य च मोक्षणे। यूपमाह। चतुर्हस्तो भवेद्यूपो यज्ञवृक्षसमुद्भवः। वर्त्तुलः शोभनस्थूलः कर्त्तव्यो वृषमौलिकः। भविष्ये। बिल्वस्य वकुलस्यैव वकलौ

यूपः प्रशस्यते। शुक्लवासाः शुचिर्भूत्वा ब्राह्मणानस्वस्तिवाच्य चा कीर्त्तयेद्भारतं चैव यथा स्यादक्षयं हविः। इति दानधर्म्मे वृषोत्सर्ग प्रकरणीय वचनादक्षय हविष्कामेन स्व
स्तिवाचनानन्तरं भारत नामोच्चार्यं। यदह्ना कुरुते पापं ब्राह्मणास्त्विन्द्रियैश्चरन्। महाभारतमाख्याय पूर्वां सन्ध्यां विमुंचति। इत्यादि पुराणोक्त प्रातर्महाभारत स्मरणावत्
वाढदेशीय प्रभृतयस्तु विराट पर्व पाठयन्ति। यथाकल्पतरौ भविष्य पुराणं। श्रुत्वा विराट पाठं य उत्सृजेद्वृषमुत्तमं। पितृणामनृणो भूत्वा प्राप्नोति परमां गतिं। तथा विराट पाठ
यित्वा य उत्सृजेद्वृष मुत्तमं स गच्छेत्परमं देवं नारायणमनामयं। तथा विराटपाठं यस्यार्थे कारयेद्वान्धवः क्वचित्। तस्य स्वर्गे स्थितिस्तावद्यावदिन्द्राश्चतुर्द्दश। तच्च ब्रह्मा
दिपुराणोऽमुक कर्म्मकर्त्तुं त्वामहं वृणे इति नयुक्तं। एककर्त्तृकएव तन्मो विधानात्। एवं कृत्वा कृता वेसणा ब्रह्मकर्म्मकर्त्तुं ब्रह्मत्वेनेति मैथिलानां का क्य रचना सर्वथा
दुष्टा। उपवेशन विशेषस्य ब्रह्मकर्म्मणोऽनुक्तत्वात् ब्रह्मत्वेनेत्यस्यैव पर्य्यात भिन्न कर्त्तृकत्वेन तमोऽसंभवाच्च तस्माद्ब्रह्मकर्म्मकरणाय इत्येव वरणे निर्द्देश्यं अत्र सर्वशाखा
धिकरणन्यायेन गुणोपसंहारन्यायेन चाविरुद्ध सफलांगोपसंहारकर्त्तव्य इति॥ ०॥ अथ प्रेतक्रियाधिकारिणः॥ ०॥ धर्म्मप्रदीपसंवत्सर प्रदीपयोर्व्याघ्रः कृतचूडस्तु
कुर्वीत उदकं पिंडमेव च। एतच्च पुत्रेतर परं॥ असंस्कृतः सुतः श्रेष्ठो नापरो वेदपारगः इति दायभागधृतात्। अन्यथा सुतत्वेन विशेषोपादानं व्यर्थं स्यात् श्राद्धे त्वनुपनीतस्या
पि मंत्रपाठाधिकारमाह मनुः। नाभिव्याहारयेद्ब्रह्म स्वधानिनयाद्दते। शूद्रेणानु समस्तावद्यावद्वेदेनजायते। अभिव्याहारयेत् इत्यर्थः॥ स्वार्थेनिच तत्र प्रथमतो ज्येष्ठः।
पुत्रो मरीचिः। मृते पितरि पुत्रेण क्रिया कार्या विधानतः। बहवः स्युर्यदा पुत्राः पितरेकत्रवासिनः। सर्वेषान्तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण चाविभक्तेन सर्वैरेव

६६ हुतं भवेत्। तदभावे यथाक्रमं कनिष्ठपुत्रपौत्रप्रपौत्राः। तथा च विष्णुपुराणे। पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसन्ततिः। सपिंडसन्ततिर्वापि क्रियार्हो नृप जायते। एतच्च षोडशपर्य
न्तं। यथाह छंदोगपरिशिष्टं। पितामहः पितुः पश्चात्प्रेतत्वं यदि गच्छति। पुत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशं। नैतत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामहः। सपिंडीकरणाप
र्यन्तमपृथक्करणमाह लघुहारीतः। सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश। पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित्। एषामभावे पत्नी तथा च शंखः। पितुः
पुत्रेण कर्त्तव्याः पिण्डदानोदकक्रियाः। तदभावे च पत्नी स्यात्तदभावे सहोदरः। भार्या पिण्डं पतिर्दद्यात् भर्त्रे भार्या तथैव च। अपुत्रधनं पत्न्यभिगामि तदभावे दुहितृगामि
इत्यादि विष्ण्वादिवचने धनाधिकारिश्रुतेः तदभावे इति प्रपौत्रपर्यन्ताभावपरं। पार्वणपिण्डदातृत्वेन धनापहारित्वेन च तेषां वसत्वात्। अपुत्राश्चीय यथा पुत्रः पुत्रवत्प ६६ शु
पिभर्तरि। पिंडं दद्याज्जलं चैव जलमात्रं तु पुत्रिणीति निर्मूलं समूलत्वेपि बालदेशान्तरितपुत्रसञ्ज्ञावविषयमिति श्राद्धविवेकप्रभृतयः। पत्न्यभावे कन्या अपुत्रस्य च या पु
त्री सापि पिंडप्रदा भवेत्। तस्य पिण्डान् दशैतान् वा एकाहे नैव निर्वपेत्। इति ऋष्यशृंगवचनात्। गोत्र ऋक्थानुगः पिंड इति मनुवचनेन दत्ताद्यपेक्षया तस्या बलवत्त्वात्
कन्याभावे यथाक्रमं वाग्दत्तादत्तादौहित्राः दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता। चतुर्थहनि तास्तेषां कुर्वीरन् सुसमाहिताः। इति ब्रह्मपुराणवचनात्। ननु दुहिता पुत्रव
त्कुर्यान्मातापित्रोस्तु संस्कृता। आशौचमुदकं पिंडमेकोद्दिष्टं सदा तयोरिति। शंखवचनात्। पुत्रान्तरमेव दुहितृधिकारः स्यादिति चेन्न। पत्न्याः प्रथमं धनाधिकारात्। तथा च
याज्ञवल्क्यः। पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा। तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः। एषामभावे पूर्वस्य धनभागुत्तरोत्तरः इति। तथा मातामहानां दौहित्राः कुर्वन्त्यह

निष्वापरे इति वृद्धपुराणवचनात्। पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः। तयोर्हि मातापितरौ संभूतौ तस्य देहतः॥ इति मनुवचनेन पौत्रदौहित्रसंयुक्ता येन तथा चिरजीवि
नः। श्रियं करा अश्वदेवानां ते नराः स्वर्गगामिनः इति विष्णुपुराणेन च। पौत्रवत्स्वत्वाभिधानाच्च तेन यथा पुत्राभावे पौत्रस्तथा दुहित्रभावे दौहित्रः। नच दत्तकन्यादौहित्राभ्यां प्राक् सगो
त्रत्वात् सोदराधिकार इति वाच्यं गोत्रवत्तापेक्षया पिण्डदानादेर्धनसाध्यत्वात् न्यक्कथ ग्राहि सोदर्दौहित्रदौहित्रयोर्बलवत्वात् अतएव दुहितुर्धनाधिकार तद्धनेन मृतो मृतोपकारक रणा हे
तुरित्याहापस्तम्बः। अन्ते वासी वा अर्थांस्तदर्थेषु धर्मकृत्येषु प्रयोजयेत् दुहिता दुहिता वेति। तदर्थेषु मासिकादिनात् द्योगार्थं धर्मकृत्येष्वित्यदृष्टार्थमिति। गोत्रस्पक्थानुगः पिण्ड इति
मनूक्तेः। अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः। इति मनूक्तानां पितृद्विष्टपतितः षंडो यश्चस्यादौपपातिकः। औरसा अपि नैते अंशं लभेरन् क्षेत्रजाः
कुत इति नारदोक्तानां च भागानधिकारिणां पिण्डदानानधिकारः। जात्यन्धबधिरौ जन्मप्रभृत्यन्धबधिरौ निरिन्द्रियाः पंकादयः। स्मार्त्तश्रौतक्रियानाधिकारिणाग्रहणन्ते इति रत्नाकरादयः॥
तथा च वृद्धशातातपः। चाण्डालं पतितं व्यंगं उन्मत्तं शवहारकं। सूतिकां सूयिकां नारीं रजसा च परिप्लुतां। श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः। सचेलं सशिरः स्नात्वा तदानी
मेव शुद्ध्यति। व्यंगः पाण्यादिरहितः व्यंगोन्मत्तयोः सदाचारहीनत्वात् अस्पृश्यतेति प्रायश्चित्तविवेकः। श्रौतस्मार्त्तक्रियानधिकारित्वं सदाचारहीनत्वं च मूत्रपुरीषाद्यशौचापन
यनासामर्थ्येनेति बोध्यं। सूयिकां प्रसवकारयित्रीं पितृद्विट् पितृपोषणौद्धदैहिकविमुखः। औपपातिकः उपपातकैः युक्तं याज्ञवल्क्यने संसृष्टः उपपातकीति प्रकाशकारपाठेपि-
समएवार्थः। अपपात्रित इति पाठे तु राजवधादिदोषैर्बान्धवैर्यस्य घटापवर्जनं कृतं भिन्नोदरीकृत इति कल्पतरुः। व्यक्तं याज्ञवल्क्येन। ब्रह्मचारिणः कुर्युरुदकं पतिता न च। पाषंडमाश्रि-

६७ ताश्चैनान्व्रात्यान्विकर्म्मिणः। गर्भभर्तृद्रुहश्चैव सुरापश्चैव योषितः। पाषंडं त्रयीवाह्यधर्म्माः स्तेनाः सततचौरस्तेयः व्रात्याः षोडशवर्षपर्य्यन्तमप्राप्तोपनयनाः। विकर्म्मिणः आल
स्येनाश्रद्धया वाधर्म्माननुष्ठायिनः। पंगुत्वादिना स्वधर्म्मानुष्ठानासमर्था अवोध्याः। तदभावे सहोदरः। कश्चित्क्षिपति सत्पुत्रो दौहित्रो वा सहोदरः। गृहीत्वास्थीनि तन्नग्न्यं नीत्वातो
येविनिःक्षिपेत्। इत्यादिपुराणे। क्रमदर्शनात्। तच्चापि दौहित्राभावे सहोदरः पूर्वोक्तशंखवचनेप्येवं क्रमोवोध्यः। अत्र कनिष्ठज्येष्ठयोश्चाविशेषात् नानुजस्य तथाग्रजः इति छन्दो
गपरिशिष्टं कनिष्ठभ्रातृसद्भावविषयं। तयोरभावे तथाविधावैमात्रेयो। भ्रातुर्भ्राता स्वयं चक्रे तत्प्राप्याचेन्न विद्यते। तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः इति ब्रह्मपुराणात्। वै
मात्रेयस्याप्येकजनकत्वेन भ्रातृत्वात्। देशान्तरस्थ क्लीवैकवृषणानसहोदरानीत्यादि छंदोगपरिशिष्टेन परिवेदने वैमात्रेयस्य भ्रातृत्वप्रशक्तौ असहोदरानिति प्रतिप्रसवाच्च ६७ श्रु
पितृव्यपुत्रादौ भ्रातृव्यवहारो गौणः। गुणाश्च वीजिपुरुषापेक्षया समानसंख्यजनकजन्यत्वं धनिपित्रादिपिंडद्वयदातुः सहोदरपुत्रात् धनिपित्रादित्रयपिंडदातृत्वाद्वैमात्रेयस्य
धनाधिकारित्वेन वलवत्वाच्च। ततश्च सहोदर इति पूर्वोक्तानुरोधात्। वैमात्रेयपरमपि। अन्यथा सोदराभावे वैमात्रेयसत्वे वैमात्रेयभ्रातृपुत्राधिकारापत्तेः। तेन वैमात्रेयाभावे
सोदरवैमात्रेयभ्रातृक्रमवत् सहोदरपुत्रः तस्मात्भोग्यपिंडदातृतया धनाधिकारित्वे नवलवत्वात् तस्यातिदिष्टपुत्रत्वाच्च। तदभावे वैमात्रेयपुत्रः तदभावे पिता। पुत्रोभ्रा
तापिता वापि मातुलो गुरुरेव च। एते पिंडप्रदाज्ञेयाः सगोत्राश्चैव वांधवाः। इति प्रचेतोवचनात्। नपुत्रस्य पिता दद्यादित्यादि छंदोगपरिशिष्टं भ्रातृपुत्रपर्य्यन्तसद्भावविषयं।
तदभावे माता। पुत्रोभावे पिता वापीत्यत्रापि शब्देन मातुः समुच्चयात्। पितरौ भ्रातरस्तथेत्यादौ धनाधिकारे तथादर्शनाच्च। अत एव श्राद्धविवेकेपि पितुरनन्यायतया मातापित्रु

त्युक्तं तदभावे पुत्रवधूः तथाच शंखः। भार्य्या पिण्डं पतिर्दद्यात् भर्त्रे भार्य्या तथैव च। श्वश्र्वा देश्च स्नुषा चैव तदभावे द्विजोत्तमः। अत्रादिपदात् श्वशुरपरिग्रहः। न चादिपदात् श्व
श्रू श्वश्र्वा परिग्रह तत्र स्नुषात्वाभावात्। द्विजोत्तम इत्यत्र सपिण्डक इति मैथिलानां पाठः। श्वश्रूपादापत्तेः सपिण्ड विशेषाभावे अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं भवेदिति धनाधि
कारे तथा दर्शनादन्यत्रापि सन्निधितारतम्येन भ्रातृपुत्रवधू पौत्री पौत्रवधू प्रपौत्री प्रपौत्रवधू पितामह पितामही पितृव्यादयः सपिण्डा अधिकारिणः। पुत्राभावे सपिण्डा इति वक्ष्य
माणात्। शंखवचनस्थ मैथिलपाठाच्च। तदभावे समानोदकाः। सपिण्डसन्ततिर्वापि क्रिया हीन्दपजायते इति विष्णुपुराणवचनात् अत्र सपिण्ड सन्ततिः समानोदका इत्यर्थः। तदभावे स
गोत्राः सगोत्राश्चेति प्रचेतावचनात्। गोत्र स्त्रक्यानुगः पिण्ड इत्युक्तत्वात्। एषामभावे सर्वेषां समानोदक सन्ततिरिति वक्ष्यमाणवचनाच्च। तदभावे मातामहः मातामहानां
दौहित्राः कुर्वन्त्यहनि चापरे ते पितेषां प्रकुर्वन्ति द्वितीयेऽहनि सर्वदा। इति ब्रह्मपुराणात् तदभावे मातुलः तदभावे भागिनेयः मातुलो भागिनेयस्य स्वस्त्रीया मातुलस्य च ।
इति शातातपीय पाठक्रमात् तदभावे सन्निधिक्रमेण मातामहसपिण्डाः तदभावे मातामहसमानोदकाः। तथाच विष्णुपुराणं। सपिण्ड सन्ततिर्वापि क्रिया हीन्दपजायते ।
एषामभावे सर्वेषां समानोदकसन्ततिः। मातृपक्षस्य पिण्डेन सम्बन्धा ये जलेन वा इति वचनात्। तदभावे सवर्णा भार्य्या तदभावे अपरिणीता स्त्री सर्वाभावे स्त्रियः कुर्युस्त्व भत्त
णाममंत्रकमिति वक्ष्यमाणात्। तदभावे श्वशुरः तदभावे जामाता। जामातुः श्वशुरश्च कुर्वन्त्येषां तेपि च संयता इति ब्रह्मपुराणोपाठक्रमात्। तदभावे पितामही भ्राता भागिनेय
सुतानां तु सर्वेषामन्त्वपरेऽहनि। श्राद्धं कार्य्यं च प्रथमे स्नात्वा कृत्वा जलक्रियामिति ब्रह्मपुराणमिति वचनात् अपरे हनीत्यशौचान्तदिनस्येति शेषः। तदभावे यथाक्रमं शिष्यर्त्ति

६६ गाचार्य्याः गौतमेन तदभावे सपिण्डाः मातृसपिण्डा वा शिष्यश्च तदभावे ऋत्विगाचार्य्यौ इत्युक्तत्वात् । तदभावेस्तु नृपः पितृस्तद्वदे । मित्राणां तदपत्यानामिति ब्रह्मपुराणात् । त
दभावे स्वकुलवासी सांधातान्तर्गतैर्वापि कार्य्याः प्रेतस्य तत्क्रिया इति विष्णुपुराणात् । तदभावे तद्धनं गृहीत्वा यः कश्चित्सवर्णः । उच्छन्नबन्धुरिक्थाद्वा कारयेदवनीपतिरिति ब्रह्म
पुराणात् । और्द्धदेहिकमधिकृत्य ब्रह्मपुराणे । ब्राह्मणस्त्वन्यवर्णानां न करोति कदाचन । कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितामियात् । स्त्रियास्तु यथाक्रमं पुत्रपौत्रप्रपौ
त्राः । विष्णुपुराणे । पुत्रः पौत्रः प्रपौत्रो वा इति विशेषश्रुतेः । तदभावे कन्या अपुत्रस्य च या पुत्रीत्यस्य उद्देश्यगतलिंगाविवक्षया स्त्रीपुंसाधारणत्वात् धनाधिकाराच्च । तदभा
वे दत्ता दुहिता पुत्रवत्कार्य्या माताऽपि चोऽस्य संस्कृतेति मनुवचनात् । तदभावे दौहित्रः । प्रागुक्तब्रह्मपुराणे तथा दर्शनात् । पौत्रदौहित्रयोर्लोके न विशेषोऽस्ति धर्मतः । तयोर्हि मा ६८ श्री
तापितरौ संभूतौ तस्य देहतः । इत्यनेन यथा पुत्राभावे पौत्रस्तथा दुहित्रभावे दौहित्र इति प्रागेवोक्तत्वात् । मातुलो भागिनेयस्य स्वस्त्रीयो मातुलस्य च । श्वशुरस्य गुरोश्चैव सख्यु
र्मातामहस्य च । एतेषां चैव भार्य्याभ्यः श्वश्रूमातुः पितुस्तथा । पिण्डदानन्तु कर्त्तव्यमिति वेदविदां स्थितिरिति । शातातपवचने मातामह्याः साक्षाद्दौहित्रेण पिण्डदानश्रुतेर्धना
धिकाराच्च । तदभावे सपत्नीपुत्रः तस्यापि पुत्रत्वस्मरणात् मनुः । सर्वासामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः । एकपत्नीनामिति एकः पति
र्यासां तासामित्यर्थः । अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्वेपि पत्नीनां सपिण्डनं मैथिलैरुक्तं तत्र । पुत्रेणैव तु कर्त्तव्यं सपिंडीकरणं स्त्रियाः । पुरुषस्य पुनस्त्वन्ये भ्रातृ
पुत्रादयोऽपि ये । इति लघुहारीतवचने एवकारेणानिर्दिष्टपुत्रनिषेधात् । अतएवोत्तरार्द्धे भ्रातृपुत्रोपादानं संगच्छते अन्यथा पुंसां तत्र पुत्रत्वातिदेशे पुत्रत्वेनैव प्राप्तेः । भ्रातृपुत्रे

पदोपादानं व्यर्थं स्यात्। तथा हि मनुः। भ्रातॄणामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्। एकजातानामेकपितृमातृजातानां तथा च बृहस्पतिः
यद्येकजाता बहवो भ्रातरः स्युः सहोदराः। एकस्यापि सुते जाते सर्वे ते पुत्रिणो मताः। एतन्न्यायमूलं तदिति चेन्न। आदिपदग्राह्येषु भ्रातरो भ्रातृपुत्रो वा सपिंडः शिष्य एव वा। सहपि
ण्ड क्रियां कृत्वा कुर्यादभ्युदयं ततः। इति लघुहारीतोक्तेषु तन्न्यायानुपपत्तेः। भ्राता वेति वाशब्दात् तत्पूर्वबांदौहित्रान्तानां तदपेक्षया प्रधानाधिकारिणां समुच्चयः। अत एव स
पिंडत्वेनैव भ्रातृतत्पुत्रयोरधिकारे सिद्धे पृथगुपादानं प्राधान्यज्ञापनार्थं पुत्रत्वातिदेशफलं तु पुन्नामनरकनिस्तारः। अतस्तत्सत्त्वे क्षेत्रजाद्यकरणं च। तथा हि। पुन्नाम्नो नरका
द्यस्मात् पितरं त्रायते सुतः। मुखसंदर्शनेनापि तदुत्पत्तौ यतेत सः। इति मनुवचने पुन्नामनरकत्राणाय पुत्रोत्पादनं विहितं। तच्च फलं यद्यतिदिष्टपुत्राभ्यां भ्रातृजसपत्नीपुत्राभ्यां
निष्पन्नं तदा सिद्धे इच्छाविरहस्तदुपायान्तरपुत्रप्रतिनिधीभूतक्षेत्रजादेर्नोत्पादनं पुत्रोत्पादनं तु तदापि कार्यं पुत्रसत्त्वे पुत्रान्तरेच्छाविधानेन तत्कर्त्तव्यताप्रतीतेः यथा
मत्स्यपुराणं॥ एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् एवमेवास्य हायोदयकरकल्पतरुपारिजातशूलपाणिरत्नाकरवाच
स्पतिमिश्रादयः। स्त्रीणामपि पुन्नामनरकनिस्तारणमाहतू रत्नाकरे शंखलिखितौ। आत्मा पुत्र इति प्रोक्तः पितुर्मातुरनुग्रहात्। पुन्नाम्नस्त्रायते पुत्रस्तेनापि पुत्रसंज्ञकः।
लघुहारीतवचने पुत्रेणेति तत्सत्त्वमात्रं विवक्षितं। सपिंडीकरणं तासां पुत्राभावे न विद्यते इति मार्कण्डेयपुराणोक्तवाक्यत्वात्। यानि पंचदशाद्यानि अपुत्रस्येतराणि च।
एकस्यैव हि दातव्यमपुत्रायाश्च योषितः इति छंदोगपरिशिष्टेऽपुत्राया एव आद्यं पंचदशश्राद्धैः प्रेतत्वपरिहारस्योक्तत्वाच्च। एतत्पत्युरभावे द्रष्टव्यं अपुत्रायां मृतायां तु प

69 तिः कुर्य्यात्तत्पिण्डं श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेदिति पैठीनसीवचनात्। ततश्च शिशौ पुत्रे ऽन्येनापि सपिंड्यते एवं पतिसत्वेपि अतएवावीरायाः सपिंडनं नास्तीति
मैथिलैरुक्तं तदभावे पतिः भार्य्यापिण्डं पतिर्दद्यादिति शंखवचनात्। नजायायाः पतिः कुर्य्यादपुत्राया अपि क्वचित् इति छन्दोगपरिशिष्टं सपत्नीपुत्रपर्य्यन्तासद्भावविषयं। पत्युर
भावे स्नुषा चैवेति शंखवचनात्। तदभावे सान्निध्यक्रमेण संपिण्डाः शंखवचने तदभावे सपिंडक इति मैथिलपाठात् तदभावे सपिण्डा इति पूर्वोक्तगौतमवचने सामान्यश्रुतेश्च
तदभावे समानोदकाः सपिंडसन्ततिर्वेत्यस्य विशेषश्रुतेः तदभावे सगोत्राः समानोदकसन्ततिरिति वक्ष्यमाणात् श्राद्धविवेकोप्येवं एषामभावे पिता दत्तानां चाप्यदत्ता
नां कन्यानां कुरुते पिता इत्युक्तत्वात् तदभावे भ्राता पुत्रो भ्राता पिता वापि इत्यत्र विशेषश्रुतेः। तदभावे यथाक्रमं दायतत्त्वोक्तउपकारतारतम्येन मातुलो भागिनेयस्य स्व ६८ शु
स्रीयो मातुलस्य च। श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च। एतेषां चैव भार्य्याभ्यः श्वश्रूमातुः पितुस्तथा। पिण्डदानं च कर्त्तव्यमिति वेदविदां स्थितिरिति। शातातपीयात्
भागिनीपुत्रभर्तृभागिनेयभ्रातृपुत्रजामातृभर्तृमातुलभर्तृशिष्याः पत्यपेक्षया पौत्रादिवत् पिंडदानतारतम्येन क्रमेणाधिकारिणः तथाहि। तत्स्त्रीपिंडं तत्पुत्रादयस्तत्पित्रा
दिपिण्डत्रयदातृत्वात् भगिनीपुत्रः तदभावे भर्तृभागिनेयः पुत्रात् भर्तुर्दुर्बलत्वेन तत्स्थानपातिनोरपि भर्तृभागिनेयभगिनीपुत्रयोस्तथैव बलाबलस्य न्याय्यत्वेन तद्भर्तृदेयपुरु
षत्रयपिण्डतत्पिण्डतद्भर्तृपिंडदातृत्वात् तदभावे भ्रातृपुत्रः तत्पिण्डतत्पुत्रादयतत्पित्रादिपिण्डद्वयदातृत्वात्। तदभावे जामाता मातृष्वसा मातुलानी पितृव्यस्त्री पितृश्व-
सा श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्त्तिताः इति बृहस्पतिवचने तु मातृश्वश्र्वादीनां मातृतुल्यत्वाभिधानात् स्वस्त्रीयाद्येः सहजामातुः पुत्रतुल्यत्वप्रतीतेः। अतएव एषां धनमा

गित्यमाह बृहस्पतिः। यदासामौरसो न स्यात् सुतो दौहित्र एव वा। तत्सुतो वा धनं तासां स्वस्रीयाद्याः समाप्नुयुः। धनग्राहित्वेनापि पितृदातृत्वमाह मनुः। गोत्ररिक्थानुगः पिण्डइ
ति तदभावे भर्तृमातुलभर्तृशिष्यो क्रमेणाधिकारिणो। शातातपीयपाठक्रमानुरोधात् प्रातिस्विकानामभावे पितृवंश्य मातृवंश्यौ पितृमातृसपिण्डैश्च समानशालिलैर्न्दप इति विष्णुपु
राणोक्तविशेषतः श्रुतेः। तयोरभावे सम्बन्धी द्विजोत्तमः पूर्वोक्तशंखवचने द्विजोत्तम इति गौडीयपाठात् संघातान्तर्गतैर्वापि इत्यविशेषतः श्रुतेश्च त्रिधा क्रियाकर्तृणाह विष्णुपुरा
णे। पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसन्ततिः। सपिण्डसन्ततिर्वापि क्रियार्हा नृप जायते। एषामभावे सर्वेषां समानोदकसन्ततिः। मातृपक्षस्य पिण्डेन सम्बन्धा ये जलेन वा। कुल
द्वयेपि चोच्छिन्ने स्त्रीभिः कार्याः क्रिया नृप। संघातान्तर्गतैर्वापि कार्याः प्रेतस्य सत्क्रिया। उच्छन्नबन्धुरिक्थाद्वा कारयेदवनीपतिः। पूर्वाः क्रिया मध्यमाश्च तथैव चोत्तराः क्रियाः त्रिः
प्रकाराः क्रियास्त्वेतास्तासां भेदान् शृणुष्व मे। आदाहवार्ष्यायुधादि स्पर्शाद्यन्ताश्च याः क्रियाः। ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञिताः। प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु
क्रियन्ते याः क्रियाः पित्र्याः प्रोच्यन्ते ता नृपोत्तराः। पितृमातृसपिण्डैश्च समानशालिलैस्तथा। संघातान्तर्गतैर्वापि राज्ञा वा धनहारिणा। पूर्वाः क्रियास्तु कर्त्तव्याः पुत्राद्यैरेव चोत्तराः। दौ
हित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा। मृताहनि च कर्त्तव्याः स्त्रीणामप्युत्तराः क्रियाः। प्रतिसंवत्सरं राजन्नेकोद्दिष्टविधानतः। आदाहेति दाहो वध्यशौचान्य विहितवार्ष्यायुधा
दि स्पर्शाद्यन्ता यास्ताः पूर्वाः। मध्यमा मासि मासीत्येकादशाहादि सपिण्डान्त प्रेतक्रियोपलक्षणं तत्पिण्डनोत्तराः। पार्वणादिक्रिया उत्तराः। अत्र पितृसपिण्डादयः पूर्वाः क्रिया
अवश्यं कुर्युः मध्यमक्रियायां अनियमः उत्तरायां पुत्रादयो भ्रातृसन्ततिपर्यन्ता नियताः। श्राद्धविवेकेप्येवं दौहित्रैर्वेति वा शब्दः समुच्चयार्थः तेन दौहित्रोपि उत्तरक्रियायां नि

70 यतोऽधिकारीतन्न नयेदौहित्रपुत्रैः पुत्रिकापुत्रविषयमितिकल्पतरुः । कर्तृप्रकरणात् स्त्रीणामिति वा कर्त्तरिकृत्य इति षष्ठी । उत्तरक्रियायां प्रतिसंवत्सरमेकोद्दिष्टविधाननिय
मात् न पार्वणश्राद्धादौ स्त्रीणामधिकारः । मार्कण्डेयपुराणे । सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममन्त्रकं । तदभावे च नृपतिकारयेत् स्वकुटुंववत् स्त्रीणामप्येवमेवैतत् एकोद्दिष्ट
मुदाहृतं मृताहनियथान्यायं नृणां यद्वदिहोदितं । स्त्रियो वा सवर्णोढा अपरिणीता वा इति श्राद्धविवेकः सवर्णोढायाश्च प्रपौत्रपर्यन्तभावस्य विधानात् स्त्रीणामिति तु संप्र
दानपरं एवमेव अमंत्रकमित्यर्थः श्राद्धविवेकः । अत्र स्त्रियः इत्यस्या सवर्णापरिणीता परत्वव्याख्यानात् स्त्रीणां मंत्रनिषेधोऽपि तत्संप्रदानकश्राद्धस्यैवावगम्यते । न तु स्त्री
संप्रदानकमात्रस्य तत्र विप्रेतरपरं तस्य हीनवर्णे श्राद्धनिषेधात् कल्पतरौ तु स्त्रीणामप्येवमेवमिति याज्ञवल्क्येन सम्बन्धेन पित्र्यमत्वादिना पुरूषाणामेकादशाहादि श्राद्धं तादृ ७.
शेनैव संबन्धेन स्त्रीणामेतत् कर्त्तव्यमिति एतत् व्याख्याने स्त्रीसंप्रदानके श्राद्धे स्तुतरां मंत्राः पाठ्याः । याज्ञवल्क्येन पि समंत्रकमेकोद्दिष्टं सपिंडनं चोक्तम् एततसपिंडीकरणा
मेकोद्दिष्टं स्त्रिया अपीत्यनेन स्त्रिया अपि तथैवोक्तं मातुः सपिंडीकरणं पितामह्यास होदितं । यथोक्तेनैव कल्पेन पुत्रिकाया न चेत् सुतः । इति छन्दोगपरिशिष्टेनापि यथोक्ते
नैव कल्पेन इत्यनेन मंत्रादिकमतिदिष्टं व्यवहारोपि तथैति । तदयं संक्षेपः ॥०॥ ज्येष्ठपुत्र कनिष्ठपुत्र ॥१॥ पौत्र ॥२॥ प्रपौत्र ॥३॥ अपुत्रपत्नी सपुत्रपत्नीः ॥४॥ कन्या वाग्द
त्तकन्या । दत्तकन्या ॥५॥ दौहित्र ॥६॥ कनिष्ठसहोदर ज्येष्ठसहोदर ॥ कनिष्ठवैमात्रेय ज्येष्ठवैमात्रेय ॥७॥ कनिष्ठसहोदरपुत्र ज्येष्ठसहोदरपुत्र कनिष्ठवैमात्रेयपुत्र ज्येष्ठ
वैमात्रेयपुत्र ॥८॥ पितृ ॥९॥ मातृ ॥१०॥ पुत्रवधू ॥११॥ पौत्री वाग्दत्ता पौत्री ॥१२॥ पौत्रवधू ॥१३॥ प्रपौत्री वाग्दत्ता प्रपौत्री ॥१४॥ प्रपौत्रवधू ॥१५॥ पितामह ॥१६॥ । पितामही ॥१७ ॥

पितृव्यादिसपिंड ॥१८॥ समानोदक ॥१९॥ सगोत्र ॥२०॥ मातामह ।२१॥ मातुल ॥२२॥ भागिनेय ॥२३॥ मातृपक्षसपिंड ॥२४॥ तत्समानोदक ॥२५॥ असवर्णाभार्य्या ॥२६॥
अपरिणीतास्त्री ।२७॥ श्वशुर ॥२८॥ जामाता ॥२९॥ पितामहीभ्रातृ ॥३०॥ शिष्य ॥३१॥ ऋत्विक ॥३२॥ आचार्य्य ॥३३॥ मित्र ॥३४॥ पितृसुहृत् ॥३५॥ एकग्रामवासी
॥३६॥ वेतनगृहीतसजातीयाः ॥३७॥ सप्तत्रिंशत्प्रकाराः क्रमेणाधिकारिणः ॥ स्त्रियास्तुज्येष्ठपुत्र कनिष्ठपुत्र ॥१॥ पौत्र ॥२॥ प्रपौत्र ॥३॥ कन्या वाग्दत्तकन्या दत्तकन्या
॥४॥ दौहित्र ॥५॥ सपत्नीपुत्र ॥६॥ पति ॥७॥ स्नुषा ॥८॥ देवर ॥९॥ देवरपुत्र ॥१०॥ सपिंड ॥११॥ समानोदक ॥ १२॥ सगोत्र ॥ १३॥ पितृ ॥१४॥ मातृ ॥१५॥ भ्रातृ ॥
॥१६॥ भगिनीपुत्र ॥१७॥ भर्तृभागिनेय ॥१८॥ भ्रातृपुत्र ॥ १९ ॥ जामाता ॥२०॥ भर्तृमातुल ॥२१॥ भर्तृशिष्य ॥२२॥ पितृवंश्य ॥२३॥ मातृवंश्य ॥ २४॥ द्विजोत्तमा
॥२५॥ पंचविंशतिप्रकारा इति ॥ यत्रतु कतिचित् श्राद्धानि कृत्वा यदि कश्चिन्मृतस्तत्रावशिष्टानि प्रेतश्राद्धानि तदनन्तराधिकरणा कार्य्याणि नतु सर्वाणि । सपिण्डीक
रणान्तानि यानि श्राद्धानि षोडश । पृथङ्नैव सुताः कुर्य्युः पृथक्द्रव्या अपि क्वचित् । इति वचनात् । यत्तु श्राद्धचिन्तामणौ । एकोद्दिष्टन्तु कर्त्तव्यं पाकेनैव सदा स्वयं ।
अभावे पाकपात्राणां तदह्नः समुपोषणमिति लघुहारीत वचनात् पाकपात्राभावः पाकसामग्र्यभावोपलक्षकः । तदपि नामश्राद्धं किन्तूपोषणमेव श्राद्धस्थानीयमि
त्यर्थः स्वयमित्यभिधानात् अपाटवादिनाप्यन्यद्वारा न कारयितव्यं अतएवोपवासेनैव श्राद्धस्थानीयेन तदकरणप्रायश्चित्तेनवा कृतकृत्यतया श्राद्धविधेरिति वच
नादपि नैकादश्यामनुष्ठानमिति तन्न षोडशश्राद्धाधिकारिणां कदाचित् तथात्वे तस्यैतानि न दीयन्ते प्रेतश्राद्धानि षोडश । पिशाचत्वं ध्रुवं तस्य दत्तैः श्राद्धशतैरपि ।

71

इतियमवचनेनषोडशश्राद्धाभावेप्रेतत्वपरीहारोनस्यात् तस्मादुपवासोनश्राद्धार्थः। किन्तुतदानीन्तनकरणाजन्यपापप्रायश्चित्तार्थः। यथास्वकालाकृतसंस्कारेप्राय
श्चित्तंकृत्वाकालान्तरे ततकरणं तथात्रापितद्दिने उपवासंकृत्वाएकादश्यांकर्त्तव्यमिति। एकोद्दिष्टंनान्यद्वाराकार्य्यमित्यत्रापिगोत्रजतरत्वेन विशेषणीयं न कदाचित्
सगोत्रायश्राद्धंकार्य्यमगोत्रजेरिति प्रेतश्राद्धे ब्रह्मपुराणात् अत्रहिनागोत्रस्यसाक्षात्कर्तृत्वंनिषिध्यतेसगोत्रायेत्यसंबंधापत्तेः तस्मात्गोत्रजैर्द्वारभूतैः सगोत्रायश्रा
द्धं नकार्य्यमित्यर्थः। तथाचपर्य्युदासपक्षे सगोत्रजद्वाराकर्त्तव्यमितिसुव्यक्तमेव प्रसज्यप्रतिषेधपक्षेतुअगोत्रजाविशेषणास्वरसात्सगोत्रजलाभः। प्रेतश्राद्धधर्म्मा
ग्राहित्वात् साम्वत्सरिकमपितथेति श्राद्धविवेकः। कल्पतरुरत्नाकरयोस्तुस्वगोत्रायेतिपठितं स्वमात्मीयंगोत्रं यस्यसस्वगोत्रः विद्यमानगोत्रइत्यर्थः। यस्मैश्राद्धंकर्त्त
व्यंतस्यगोत्रेविद्यमानेअन्यगोत्रजेनसंघातान्तर्गतेनराज्ञावाश्राद्धंनकर्त्तव्यमितिव्याख्यातंच। एतन्मते पूढदुहित्रादीनांसपिण्डत्वेपिननिषेधः। वस्तुतस्तुतत्पा
ठेपिकर्म्मधारयापेक्षयाबहुव्रीहेर्जघन्यत्वात् स्वमात्मीयं चततगोत्रं चेति तस्मैअन्यगोत्रजद्वाराश्राद्धंनकार्य्यमित्यर्थः। अत्रगोत्रंकुलं संततिर्गोत्रजननकुलान्यभिज्ञ
नान्वयौ इत्यमरकोषात्। अतोलघुहारीतवचनेस्वयंपदं सगोत्रपरं अन्यथाब्रह्मपुराणे। सगोत्रजपदवैयर्थ्यापत्तेः। नचपाकस्यांगत्वेनप्रधानतिथिः कर्त्तव्यतानियम
इतिवाच्यं। व्रतोपवासनियमेघटिकैकायदाभवेत्। सातिथिः सकलाज्ञेयापित्र्यर्थेचापराह्णिकी इतिदेवलवचनेन मुहूर्त्तलाभेपिकर्त्तव्यतोपदेशात् तदानींपाकेन
दस्मभवात्एवमुदीच्यांगशेषभोजनेपिनतन्नियमइति पाकेसपिंडाधिकारमाह देवलः। तथैवामंत्रितोदाताप्रातःस्नातःसहाम्बरः। आरभेतनरैःपात्रैरन्नारम्भांसबांधवः ७१ ३३

अथ सपिंडादिविचारः॥ मत्स्यपुराणे। लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिंडदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषं। नन्वेवं भ्रात्रादिभिः सह पिण्डतल्लेपभोक्तृ
त्वासंभवात्कथं सपिंडत्वमिति चेत्। उच्यते। तेषामपि पिंडलेपयोः सम्बन्धोऽस्ति तथा च बौधायनः। प्रपितामहः पितामहः पिता स्वयं सोदर्य्या भ्रातरः सवर्णायाः पुत्रः पौत्रः प्र
पौत्रः एतानविभक्तदायादान् सपिंडान् प्रचक्षते। विभक्तदायादान् सकुल्यान् प्रचक्षते। सत्स्वंगजेषु तद्गामी ह्यर्थो भवतीति। अस्यार्थः पित्रादिपिंडत्रयेषु सपिंडनेन भोक्तृ
त्वात् पुत्रादिभिस्त्रिभिस्तत्पिंडदानात्। यश्च जीवन्नपस्य पिंडदाता सम्पन्नः सन् सपिंडनेन तस्य पिंडभोक्ता एवं सति मध्यस्थितः पुरुषः पूर्वेषां जीवन् पिण्डदाता मृतस्तत्पिण्डभो
क्ता। अपरेषां जीवतां पिंडसंप्रदानभूत आसीत्। एतैश्चैतैः सह दौहित्रादिदेयपिण्डभोक्ता अतो येषामयं पिण्डदाता ये चास्य पिण्डदातारस्तेऽविभक्ताः पिंडरूपं दायं भजन्ती
ति अविभक्तदायादाः सपिंडा इदं च सपिंडत्वं सकुल्यत्वं च दायग्रहणार्थं अशौचाद्यर्थस्तु पिंडलेपभुजामपि लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिन इति प्रागुक्तमत्स्यपु
राणात्। वक्ष्यमाणकौर्म्मशंखलिखितवचनाच्च। यथा पिंडे परस्परं भोक्तृत्वं तथा लेपेऽपि तुल्यन्यायात् हारलतायां कौर्म्मे। सपिंडता तु पुरुषे सप्तमे विनिवर्त्तते। समानो
दकभावस्तु जन्मनाम्नोरवेदने। पिता पितामहश्चैव तथैव प्रपितामहः। लेपभाजश्चतुर्थाद्याः सापिण्ड्यं साप्तपौरुषं। लेपभागिभ्यस्तूर्द्ध्वं यावदमुकनाम्नोऽस्मत्पूर्वं पु
रुषादयं जात इति विशेषतोऽयमस्मत्कुलजात इति सामान्यतो वा स्मर्य्यते तावत् समानोदकत्वमिति हारलता। अत्र परवचनेनैव सापिंडस्थितौ पूर्वजननपूर्वार्द्धजीवत्
पितृकत्वादिना अधिकपुरुषेषु पिंडलेपसंबंधेऽपि सपिंडतानिवृत्तिज्ञापनाय सर्वदेशीयाचारोऽपि तथा। यथा श्राद्धविवेकोऽपि पार्वणश्राद्धानन्तरं नित्यश्राद्धे विकल्प उक्तः।

४ मार्कंडेयपुराणे । नित्यक्रियां पितॄणान्तु केचिदिच्छन्ति सत्तमाः । न पितॄणां तथा वान्ये शेषं पूर्ववदाचरेत् । अत्र पूर्वोक्तानां पितॄणां प्राचीनपितॄणामित्यत्र पुनः पितॄणां ग्रहणं
सनकादीनां मन्त्रात्सर्गाद्यनुज्ञापनार्थमिति फलान्तरमुक्तं हरिशर्म्मणापि । अन्यार्थं पुनर्वचनमिति लिखितं । अथ यः खलु पिंडानदत्त्वैव मृतः परतश्चाप्राप्तपितृभावः स क
थं सपिंडः एकपिण्डदातृत्वभोक्तृत्वलक्षणासंबंधाभावादिति चेत् तद्योग्यतयेति ब्रूमः । योग्यता प्रयोजकं च सामान्यशास्त्रविषयत्वं ततश्च अत्यतिवृद्धप्रपितामहावधि
कानामधस्तनानां षण्णां पुरुषाणां प्रत्येकापेक्षया सप्तानामेकैकोच्चारणां स्वावधिपरतनानां सप्तानां च साविंड्यं लेपपिण्डयोर्दातृत्वभोक्तृत्वसम्बन्धादिति स्त्रीणान्तु भर्त्त
सापिंड्येन सापिण्ड्यं प्रत्तानां भर्तृसापिण्ड्यमिति वचनात् । नन्वेवं कथं कन्यायाः सापिंड्यमिति चेत् आदिपुराणवचनात् त्रैपुरुषं सापिंड्यं यथा सपिंडता तु कन्यानां सवर्णा ७८ रु
नां त्रिपौरुषी । कन्यानामनूढानां अप्रमत्तानां त्रिपौरुषमितिवशिष्ठवचनाच्च । तेनात्र पंचमेऽहश्च प्रपितामहे सापिण्ड्यं निवर्त्तते इति प्रतिपादितं अतएव कन्यायाः प्रपि
तामहभ्रातृतत्सन्ततिभिः सापिण्डाभावात् मरणजननयोस्तेषां सपिण्डाशौचं नास्ति । किन्तु समानोदकमेवाशौचं । एवं तेषामपि मरणजननयोः कन्यानामिति शूलपाणिः ।
यत्तु कूर्मपुराणे । अप्रत्तानां तथा स्त्रीणां सापिंड्यं साप्तपौरुषं । प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः प्रजापतिः इति रत्नाकरधृतं तद्विवाहे पितृपक्षविषयमिति यथा विष्णुपुराणे ॥ सप्त
मीं पितृपक्षाच्च मातृपक्षाच्च पंचमीं । उद्वहेत द्विजो भार्यां न्यायेन विधिना नृप सप्तमीं परिहृत्येति शेषः एवं पंचमीमित्यत्रापि भर्तृसापिंड्यमित्यत्र साप्तपौरुषमित्यनुषज्य
ते तेन भर्तृसमानसापिंड्यमित्यर्थः । शंखलिखितौ । सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी । पिंडश्चोदकदानं च शौचं चैव तदानुगं । गोत्रतः गोत्रैक्ये तेन मातामहकुले ।

कदाचित् षट्पुरुषपर्यन्तं पिंडसंबन्धेपि न सपिण्डता तान् सप्तमपुरुषान् आसमन्तात् कारणपिण्डादिक मनुगच्छतीति तदानुगं। एतेन सपिंडता एकशरीरावयवान्वयेन भ
वति। तथाहि पितुः शरीरावयवान्वयेन पितामह एवं पितामहादिभिरपि पितृद्वारेणात्र शरीरावयवान्वयात् एवं मातृशरीरावयवान्वयेन मात्रादिभिरपि एवं पत्न्या सह पत्न्या एक
शरीरारम्भकतया सापिण्ड्यं तथा च गर्भोपनिषदि एतत् षट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणि मातृत इति तत्तच्चावयवा
न्वय प्रतिपादनात् निर्वाप्यपिण्डान्वयेन तु सापिण्ड्ये भ्रातृपितृव्यादिभिः सापिण्ड्यं न स्यादिति अतिप्रसंगास्तु सप्तान्यतमत्वेन प्रयोग परिध्यानानिरसनीयः यद्येवं मातामहा
दीनामपि मरणे सपिण्डत्वेन दशाहाशौचं प्राप्नोतिस्यादेतद्यदि मातामहानां मरणे त्रिरात्रं स्यादशौचं चकमित्यादि विशेषवचनं न स्यादिति यत्तु विशेषवचनं नास्ति तत्र दशा
हमिति मिताक्षरारत्नाकरादिमतमपास्तं। लेपभाज इत्यादि वचनिकेर्थे सापिण्ड्य एकशरीरावयवान्वयरूपस्वकपोलरचितार्थानवकाशात् निर्वाप्यपिंडसम्बन्धे तमाद्यादीनां
सापिण्डस्य मत्स्यपुराणादेर्बोधापन्नवचनाभ्यां पूर्वमुक्तत्वात् कामधेनुहारलताकल्पतरुपारिजातकारादिभिस्तथैव व्याख्यातात्वाच्च। रेतःशोणितःपरिणामरूपत्वादपत्यशरी
रस्य भवतु वा तथा पत्न्या सह पत्न्या एकशरीरारंभकता याः। प्रत्यक्षबाधितत्वात् कथं सापिण्ड्यं प्रमातामहादीनां विशेषवचनाभावात्। सपिंडत्वेन दशाहाद्यशौच प्रसंगा
च्च मातामहादेः सापिण्ड्यस्य लोकवेदविरुद्धत्वाच्च भवतु वा शरीरद्वारा सापिण्ड्यं तथापि वचना यथा सप्तान्तर्गतत्वं तत्त्वं तथा गोत्रतः साप्तपौरुषीति वचनात् गोत्रैक्यमपि प्रा
गुक्तवचनात् कन्यायां द्विपौरुषं कुडायामन्तर्सापिंड्ये न सापिण्ड्यमिति चेदे तन्मतेपि व्यवस्थायां न क्षितिरिति। अत एव सुमन्तुना लिखितं यद्दशमपुरुषपर्यन्त मशौचं तत्र सप्त

मा पुरुषा भ्यन्तराशौचान्यूनं त्रिरात्रं यथा ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्मी विच्छित्तिर्भवति आतृतीयात्स्वधाविच्छित्तिर्भवति अन्यथा पिण्डाशौचक्रिया घुच्छेदात्
79 ब्रह्महत्यातुल्यो भवतीति अस्यार्थः। एकाः समानाः पिण्डस्वधा येषां ते तथा। यथा एको द्दिष्टस्य पिण्डेतु अनुशब्देन युज्यते इत्यत्राप शब्दे नानुयुक्तो मंत्रो लक्ष्यते। अनुयुक्त मंत्रस्य येचा
च त्वामनु यांश्च त्वमनु तस्मै ते स्वधा इति। तथा पिण्डस्वधाशब्देन पिण्डसंबंधि स्वधायुक्त मंत्रकरणक देयजलं लक्षितं। तथा च। ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं
स्वधास्थ तर्पयत मे पितॄन् इत्यनेन पिण्डान् सिंचेत् इत्युक्तं। ततश्च एकपिंडस्वधानां समानोदकानामित्यर्थः। अत एव मनुः। जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते॥ विष्णुपु
राणं च। मातृपक्षस्य पिण्डेन संबंधो योजनेन वा मातृपक्षस्य मातामहपक्षस्य पिण्डेन संबंधाः सपिण्डाः जलेन सम्बन्धाः समानोदका इति श्राद्धविवेकेन व्याख्यातं। असम्ब
न्धाभवद्यातु पिण्डेनैवोदकेन वेति विवाहेऽप्युक्तं अत्र पुत्रिकायाः पार्वणे पिण्डोदकयोः सम्बन्धात् कन्यामात्रे पितृयोग्यतासत्वात् कन्यापिण्डोदकसम्बन्धाच्यते। एतदनुसारा द ७८ श्र
पितृस्याः सपिण्डता वोढव्या। तस्मादेकपिण्डस्वधानामित्यनेन समानोदकभावः समाख्यातः न तु दशपुरुषपर्यन्तं पित्रादिजीवनादिना पिण्डसंबंधे न सापिण्ड्यं विहितं प्राग
त्तपुत्रेरन्यथा स्वधेत्यस्य तदनुपयुक्तत्वेन नैवयर्थ्यापत्तेः। अपुत्रधनाधिकारस्तु सन्निहिततराभावे सप्तमपुरुषपर्यन्तं मृतपितृकस्य स्वधोपलक्षित श्राद्धाधिकारः पुरुषत्रय
पर्यन्तमिति तत्र स्वधाशब्दो मंत्रपरः पितृभक्ष्यपरो पितथा च गुणविष्णुधृता श्रुतेः। स्वधा वै पितॄणामन्नमिति दशमपुरुषानन्तरं समानोदकत्वेऽपि न त्रिरात्रं किन्तु पक्षि-
णयादि तथा हि उदकक्रियामधिकृत्य पारस्करः। सर्वे ज्ञातयो भावयन्ति आसप्तमाद्दशमाद्वा समानग्रामवासिनं यावत्सम्बन्धमनुस्मरेयुर्वेति भावयन्ति निषादयन्ति उदकमितिशे

षः । अत्र यावत्सम्बन्धमनुस्मरेयुरेककुलजाता वयमिति यावत्स्मरणं भवतीति अनेनैव सर्वेषामुदकदानप्राप्तेः यदा सप्तमाद्दशमाद्वा इत्युक्तं तत्सन्निकर्षतारतम्येनाशौचभेदेप्यु
दककर्मणि समानार्थमिति । अशौचभेदस्तु सप्तपुरुषपर्यन्तं सपिण्डत्वाद्दशाहः ततश्च दशमपुरुषपर्यन्तं त्र्यहः तथा च बृहस्पतिः । दशाहेन सपिण्डास्तु शुध्यन्ति मृतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः ॥ एवं च सकुल्यपदं समानकुलभवत्वसमाख्यया त्रिरात्राशौचभागित्वेन दशमपुरुषावधि प्रतीयते ततश्चतुर्दशपुरुषपर्यन्तं प
क्षिणी । ततश्च जन्मनाम्नस्मृतिपर्यन्तमेकाहः । तथा च मिताक्षराविवादचिन्तामण्योर्बृहन्मनुः । सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस्तु निवर्तेताचतुर्दशा
त् । जन्मनाम्नस्मृतेरेके तत्परं गोत्रमुच्यते । अत्र समानोदकत्वे वैविध्यपूर्वं च गौतमः पक्षिणीमसपिण्डे इति । परं च हारीतः । प्रातामहे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके इ
ति अत्रैव गोत्रजानामहः स्मृतमिति जाबालवचनं तत्परं सर्वथा समानोदकतानिवृत्तेः । स्नानमिति स्नात्वा शुध्यन्ति गोत्रजा इति बृहस्पत्युक्तत्वात् ॥ अथाशौचसंक्षेपः ॥
जननाशौचमध्ये जननाशौचान्तरपाते पूर्वाशौचकालेन शुद्धिः पूर्णाशौचान्तदिने पूर्णाशौचान्तरपाते अन्तिमदिनोत्तरदिनद्वयेन शुद्धिः । अन्तिमदिवसीयोत्तरप्रभाते सू
र्योदयात्पूर्वं तत्पाते सूर्योदयावधि दिनत्रयेण शुद्धिः । एवं मरणाशौचेपि वर्जितदिनद्वयत्र्याभ्यन्तरे अशौचान्तरपाते पूर्वेण शुद्धिः अशौचत्रितयान्तदिनत्वन्त्यमे
कदेव द्वितीयदिनत्वं तत्परदिने अत्र च दशमदिनं तत्र मातयोः पितृमातृभर्तृमरणे तु न दिनद्वयत्रयवृद्धिः । किन्तु स्वावध्येव सम्पूर्णाशौचमिति । तानि जननाशौचम
ध्ये तु स्वपुत्रजनने पूर्वार्द्धे पूर्वेण परार्द्धे परेण शुद्धिः । एवं ज्ञातिमरणमध्ये पितृमातृभर्तृमरणे पूर्वार्द्धे पूर्वेण परार्द्धे पराशौचकालेन शुद्धिः । स्वपुत्रजननाशौचान्तिमदिने तत्

80 74 प्रभातयोर्जातिमरणेऽपि दिनद्वयत्रयवृद्धिः किन्तु पूर्वेणैव शुद्धिः। सूतिकायास्तु स्वावधिसंपूर्णाशौचं स्वपुत्रयोस्तु परस्परं। तथा मरणे च दिनद्वयत्रयवृद्धिः जननाशौचयो
स्तु सन्निपाते पूर्वजातो यदाशौचाभ्यन्तरे मृतस्तदा सपिण्डानां सद्यः शौचेन पूर्वाशौचस्य नाशस्तन्नाशादेव परजात मातृपितृव्यतिरिक्तानां तेषां परजननाशौचस्य निवृत्तिः प
रजातमरणे तु न तथा। तस्य पूर्वजननाशौचावधिस्थायित्वादिति गुरुचरणाः। एवं द्वितीयजातपित्रोस्तु पूर्वार्द्धजात— मरणे पूर्वार्द्धजातमरणे पूर्वाशौचकालावधि अङ्गास्पृ
श्यत्वयुक्तमशौचं। पूर्वार्द्धजातमरणे तु स्वावधिजननाशौचमङ्गास्पृश्यत्वमिति औत्सर्गिकसमसंख्यकदिवसीयजननमरणाशौचयोः सन्निपाते मरणाशौचकालेन
शुद्धिः। तदन्यकालयोस्तु दीर्घशौचकालेन शुद्धिः। ततश्च पुत्रवत्या विंशतिरात्रान्तिमदिने पत्युर्मरणे बहुकालिनाशौचेन शुद्धिः। तथा सपिण्डद्वयजननजातद्वादशा
हान्तदिने पितृमातृभर्तृमरणे बहुकालिनाशौचकालेन शुद्धिः। एकाहे मरणद्वये यावदशौचं सर्वगोत्रास्पृश्यत्वं। एवं समानोदकमरणे अङ्गास्पृश्यत्वमेकरात्रं विद्युदादिमर २० ३
णेऽपि तथा तेनैतत्त्रिरात्रं गुरु विदेशस्थमरणे त्रिरात्रन्तु लघु स्नानेनैवाङ्गास्पृश्यत्वनिवृत्तिः। एतदुभयोः सन्निपाते गुरुणैव शुद्धिः एवं विदेशमृतज्ञातित्रिरात्रात् विदेशमृ
तपितृमातृभर्तृत्रिरात्रं गुरु संपूर्णाशौचे तु असंज्ञानामपि यावदशौचमक्षारलवणानाशित्वदर्शनात्। अत्रापि तावत्कालं अक्षारलवणानाशित्वं अत्रापि गुरुणैव शुद्धिः
तुल्यत्रिरात्रयोस्तु सन्निपाते पूर्वेणैव शुद्धिः तथा कन्यापुत्रयमजोत्पत्तौ मासेन शुद्धिः। तयोरशौचमध्ये मातुः कन्यामरणात् सद्यः शुद्धिः। न पुत्रमरणात् अन्येषान्तु प्र
थमजातमरणात् शुद्धिः। न परजातमरणात् एवमूह्यं सुधीभिः॥ ०॥ इत्यशौचशङ्करः॥ ०॥ विदेशस्थाशौचे तु अशौचकालाभ्यन्तरश्रवणे शेषाहैः शुद्धिः। अशौच

कालोत्तरश्रवणे तु ज्ञातिजनने अशौचं। नास्त्येव पुत्रजनने तु सचेलस्नानाच्छुद्धिः। मरणाशौचे तु वर्षाभ्यन्तरश्रवणे त्रिरात्रेणाशुद्धिः सचेलस्नानादेवास्पृश्यत्वनिवृत्तिः।
वर्षोत्तरश्रवणे स्नानेन शुद्धिः। सपिण्डानां पुत्रादीनां पितृमातृभर्तृमरणोत्तरमेकाहेन शुद्धिः। पूर्णाशौचातिक्रमे त्र्यहाशौचं नवान्यशौचातिक्रमे खण्डाशौचं महागुरुमर
णे त्वेकरात्रं। यत्र मरणमात्रं श्रुतं दिनमासादिकविशिष्य न श्रुतं तत्र श्रवणावधि स्वस्वजात्युक्ताशौचं॥०॥ इति विदेशस्थाशौचं॥०॥ गर्भस्रावे तु स्त्रीणामेव षण्मासाभ्यन्तरेऽ
शौचं तत्र लौकिककर्मणि माससमसंख्यदिनव्यापकं। द्वितीयमासावधिमाससमसंख्यदिनाधिकादिकदिनात्परं ब्राह्मण्या वैदिककर्माधिकारः। शूद्रा तु षष्ठदिनादि
ति हारलताप्रभृतयः। सप्तमाष्टममासीयगर्भपतने स्त्रीणां संपूर्णाशौचं निर्गुणसपिण्डानामहोरात्रं यथेष्टाचरणसपिण्डानां त्रिरात्रं। तत्र जातस्य तद्दिनमरणे एवं ज्ञेयं।
द्वितीयदिनादौ तु मरणे नवमादिमासजातबालकमरणवज्ज्ञेयं॥०॥ इति गर्भस्रावाशौचं॥०॥ कन्याया जन्मप्रभृति द्विवर्षाभ्यन्तरमरणे सद्यःशौचं तदुपरि वाग्दानप
र्य्यन्तमेकाहः वाग्दानोत्तरविवाहपर्य्यन्तं भर्तृकुले पितृकुले च त्रिरात्रं विवाहानन्तरं तु भर्तृकुल एव संपूर्णाशौचं सोदरभ्रातृणां भगिन्या आदन्तजन्ममरणे सद्यःशौचं।
आचूडादेकरात्रकं आप्रदानात् त्रिरात्रकमिति विशेषः। दत्तकन्यायाः पितृगृहे प्रसवमरणयोर्मातापित्रोः शयनादिसंसर्गशून्ययोस्त्रिरात्रं। तथाविधबन्धुवर्गाणामेक
रात्रं। तथाविधसंसर्गिणां तु सर्वेषां संपूर्णाशौचं॥ इति स्त्र्याशौचं॥ नवमादिमासजातबालस्याशौचकालाभ्यन्तरमरणे मातापित्रोरस्पृश्यत्वमुक्तं तदेव जननाशौचं ना
तीतान्त्यशौचं नास्ति। नवमादिमासमृतजातयोः कन्यापुत्रयोः पित्रादिसपिण्डानां संपूर्णजननाशौचं तत्र ब्राह्मणानां दशाहं शूद्राणां मासं पुत्रजन्मनि मुखदर्शनात्पूर्वं सचे-

३। तत्स्नानं कृत्वा पुत्रजन्ममुखदर्शननिमित्तक वृद्धिश्राद्धं कृत्वा अशक्तौ तदकृत्वा ब्राह्मणेभ्यो यथाशक्ति हिरण्यादि दत्वा बालकाय सफलं हिरण्य दत्वा मुखं पश्येत्। ततः पुनः
सचेलस्नानं अन्याशौचमध्ये जातकर्म्म षष्ठीपूजे कर्त्तव्ये पुत्रजन्मनिमित्तकं वृद्धिश्राद्धं नाडीछेदात् पूर्वं अशौचान्ते वा कर्त्तव्यं स्नानादि प्रमाणान्तु अशौच वशं करे द्रष्टव्यं
पुत्रकन्याजनने स्त्रीणां दशाहोत्तरं लौकिककर्म्माधिकारः पुत्रजनने वैदिककर्म्माधिकारो विंशतिरात्रोत्तरं स्नानात् कन्याजनने तु मासोत्तरं स्नानात् ब्राह्मण्याः शूद्राया
स्तूभयत्रैव मासोत्तरं स्नानाच्छुद्धिः। जननाशौचकालोत्तरं षण्मासाभ्यन्तर मजातदन्तमरणेपि त्रिरात्रेकाहः एवं निर्गुणासादरस्य सपिंडानां तु सद्यः। षण्मासोभ्यन्तरेपि जातद
न्तमरणे पित्रोस्त्र्यहः। सपिण्डानामेकाहः षण्मासोपरि द्विवर्षपर्य्यन्तं पित्रोस्त्र्यहः सपिण्डानामकृतचूडे एकाहः कृतचूडे त्र्यहः द्विवर्षोपरि सर्वेषामनुपनीतस्य मरणे मास
त्रयाधिकषड्वर्षं यावत् त्र्यहः। पंचवर्षोपनीतस्य तदानीमपि दशाहः मासत्रयाधिकषड्वर्षोपरि दशाहः। शूद्रस्य षण्मासाभ्यन्तरेऽनुत्पन्नदन्तस्य मरणे त्र्यहः उत्पन्न ८१ ३३
दन्तस्य मरणे पंचाहः। षण्मासोपरि द्विवर्षपर्य्यन्तं पंचाहः। अत्रापि कृतचूडमरणे द्वादशाहः। द्विवर्षोपरि षड्वर्षाभ्यन्तरे द्वादशाहः। अत्रापि दैवात् कृतोद्वाहेपि मासो
व्यवह्रियेत षड्वर्षोपरि मासः। अत्र मासवर्षगणना सावनेन सूतकादि परिच्छेदो दिनमाशाब्दपात्तथा। मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता इति सूर्य्यसिद्धान्तात्॥ ०॥
इति बालाघशौचं॥ जनने मरणे च सप्तमपुरुषपर्य्यन्तं विप्रस्य दशाहः शूद्रस्य मासः दशमपुरुषपर्य्यन्तं सर्वस्य त्र्यहः। चतुर्द्दश पुरुषपर्य्यन्तं पक्षिणी जन्मनामस्मृतिप
र्य्यन्तं एकाहः। अतः परं स्नानमात्रं अशौचं प्रति कन्यायास्त्रिपुरुषं सापिंड्यं मातामहमरणे त्रिरात्रं मातृश्वश्रीय पितृश्वश्रीय भागिनेय मरणे पक्षिणी पितामहभगिनी

पुत्रपितामही भगिनीपुत्रपितामही भ्रातृपुत्ररूपपितृबान्धवत्रयमरणेपि पक्षिणी। मातामहभगिनीपुत्रमातामहीभ्रातृपुत्ररूपमातृबान्धवत्रयमरणे ऽप्यहोरात्रं एकग्रामवा
सिगोत्रजमरणे चाहोरात्रं औरसव्यतिरिक्तपुत्रजननमरणयोः परपूर्वभार्याप्रसवमरणयोश्च त्रिरात्रं । आचार्यमरणे त्रिरात्रं । सजातीयपुरुषान्तरसंगृहीताया भार्यायाम
रणे त्रिरात्रं मातृष्वसृपितृष्वसृश्वश्रूश्वशुराणां मातुलं भगिनीपुत्रादीनां गृहस्थितानां मरणे भगिनीपुत्रादीनां त्रिरात्रं। श्वश्रूश्वशुरयोरेकग्रामस्थयोर्मरणे पक्षिणी
श्वश्रूश्वशुरयोः सन्निधाने त्रिरात्रं तयोर्भिन्नमरणे एकरात्रं चूडोत्तरभगिनीमातुलानीमातुलपितृमातृस्वसृगुर्वंगनामातामहीमरणे पक्षिणी। आचार्यपत्नीपुत्रयोरुपा
ध्यायस्य मातुलस्य वैमात्रेयस्य श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणेऽहोरात्रं मातृष्वसृपुत्रमातुलपुत्रमरणे पक्षिणी। प्रथममन्येनोढा तेनैव जनितपुत्रा पुत्रसहि
तैवान्यमाश्रिता पश्चात्तेनापि जनितपुत्रा तयोर्यथासंभवं प्रसवमरणयोर्द्वितीयपितुस्त्रिरात्रं तद्द्वितीयपितुर्मरणे तथाविधपुत्रयोस्त्रिरात्रं सपिण्डानामेकरात्रं तथाविध
पुत्रयोः परस्परं प्रसवमरणयोर्मातृजात्युक्ताशौचं पूर्वपितुः स्त्रीमरणेऽत्कृष्टजात्याश्रयणे त्रिरात्रं हीनजात्याश्रयणे नाशौचं द्वितीयपितुरपि स्त्रीमरणे त्रिरात्रं दौहित्रमर
णे पक्षिणी पितृमातृमरणे ऊढानां कन्यानां त्रिरात्रं यदि मातृस्वसृप्रभृतीनां दहनं वहनं च करोति तदा त्रिरात्रं मातामहादीनां त्रिरात्राभ्यन्तरे मरणश्रवणे तदवशेषेणाशु
द्धिः तत्कालोत्तरं श्रवणे तु नाशौचं । किन्त्वाचारात्स्नानं ॥ ० ॥ इति सपिण्डाद्यशौचं ॥ शास्त्राननुमतबुद्धिपूर्विकात्मघातिनो मरणे नाशौचादि । शास्त्रानुमत्याऽनशनमृत
स्य प्रमादादनशनाग्नि वह्निजलोच्चदेशप्रपतनसंग्रामदंष्ट्रिनखिव्यालविषचाण्डालचौरहतस्य च त्रिरात्रं। शृंगादिभिः स्त्रिया च क्रीडां कुर्वतः प्रमादमृतस्यापि नाशौचादि

८२ नागविप्रियकारित्वेन तद्धतस्य मरणोद्देशप्रवृत्तविद्युद्धतस्य चौर्य्यादोषेण राज्ञा हतस्य कलहं कृत्वा चाण्डालाद्यैरसमानैर्हतस्य व्याधिजनकौषधस्य विषस्य वह्नेश्च दातु
र्मरणोपायरण्डाश्रितस्य नित्यं परापकारिणः क्रोधात् स्वयं प्रायविषवह्न्यादि शस्त्रोद्बन्धन जलगिरिवृक्षप्रपातैर्मृतस्य च चर्म्मस्थ्यादि मयपात्रस्य निर्म्मातृविप्रादेश्च मनुष्य
वधस्यानधिकारिणः कंठदेशोत्पन्नमगरोगस्य च पुंकर्म्माशक्त नपुंसकस्य ब्राह्मणाविषयापराध कारिणान्निहतस्य बुद्धिपूर्वक ब्राह्मणहतस्य च कुष्ठिनो महापातकि
नश्च एवंविधपतितानां नदाहादिकार्य्यं ततद्धत्वात प्रछन्नं कुर्य्यात। ग्रहतस्करादिभिर्युद्धे सामर्थ्ये हतस्य विप्रादिर्दाहादिकमस्त्येव अकृतप्रायश्चित्तगलत् कु
ष्ठिनो नदाहादिकं कार्य्यं। शस्त्रेणाभिमुखेहतस्य सद्यःशौचं दाहादिव। गवार्थे ब्राह्मणार्थे वा दंडेन युद्धे मृतस्याहोरात्रमशौचं नृपतिराहितयुद्धेन लगुडादि हतस्य च
त्रिरात्रं गोविप्रस्य च पालने ऽभिमुखत्व पराङ्मुखत्वाभ्यां हतस्य च सद्यस्त्रिरात्रे। शस्त्रघातेन तरक्षते सति मरणे सप्ताहाद्दूर्ध्वं संपूर्णाशौचं। शस्त्रघाते च्यहाद्दूर्ध्वं मरणे ८२ शु
प्राकृताशौचं। इति मृत्युविशेषाशौचं ॥०॥ ब्राह्मणशवस्यानुगमने ब्राह्मणस्य सचेलस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः। क्षत्रियशवस्यैकाहेन वैश्यशवस्य
द्व्यहेन शूद्रशवस्य प्राणायामशतेन दिनत्रयेण शुद्धिः। प्रमादाच्छूद्रशवानुगमने जलावगाहनाग्निस्पर्शघृतप्राशनैः शुद्धिः। अनाथब्राह्मणस्य धर्म्मबुद्ध्या
दहनवहनयोः स्नानघृतप्राशनाभ्यां सद्यःशौचं लोभेन पुनः सजातीयदाहे स्वजात्युक्ताशौचं असजातीयशवस्य दहनवहनस्पर्शनैः शवजात्युक्ताशौचं। स्नेहाद
संबंधिदाहकविप्रस्य तद्गृहवासे त्रिरात्रं तत्कुलान्नभोजने दशरात्रं तद्गृहवासे तदन्नभोजने चाहोरात्रं विशेषव च नाभावे सम्बन्धिनो मातुलादेव स्नेहेनापि दाहे

त्रिरात्रं चिताधूमसेवने सर्ववर्णानां स्नानं। मृते शूद्रे अस्थिसंचयनकालाभ्यन्तरे तद्गृहं गत्वा अश्रुपातने विप्रस्य त्रिरात्रमशौचं अस्थ्यानान्तरे अहोरात्रं तद्गृहे तदूर्द्ध्वं मासाभ्यन्तरे ऽ
होरात्रं सचेलस्नानं च। सजातेर्दिवसेनैव क्षत्रियवैश्ययोर्द्व्यहेन ब्राह्मणाः शुध्यन्ति शूद्रस्तु सर्वेषां स्पर्शेन विना नक्तेनैव मृतस्य शूद्रस्य बांधवैः सह रोदनरहितं विला
प मात्रे ऽहोरात्रं अस्थिसंचयनकालः ब्राह्मणस्य चतुर्थाहः शूद्रस्य दशाहः न्यूनाशौचे द्वितीयाहः मरणाशौचे विप्रस्य चतुर्थाह स्पृश्यता शूद्रस्य दशमदिने सर्वेषां स्पर्शं
शौचकालत्रिभागेन अतिक्रान्ताशौचे सचेलस्नानेन जनने तु सपिंडानां स्पृश्यत्वं पुत्रोत्पत्तौ स्नानात् पितुः स्पृश्यत्वं एवं सूतिकास्पर्शे पितुर्विमातॄणां च सूतिका तु स्नात्वा स्पृ-
श्यत्वं अन्येषां स्नानमात्रं कन्यापुत्रयोर्जनने मातुर्दशाह अस्पृश्यत्वं शूद्रायास्त्वयो दशरात्रं ॥ ० ॥ इति शवानुगमनाद्यशौचं ॥ ० ॥ अथान्त्येष्टिपद्धतिः ॥ गतप्राणं ज्ञात्वा पु
त्रादिः स्नात्वा अन्नं कृत्वा स्थापयेत्। ततो गतप्राणं स्नापयित्वा वाससा सर्वं शरीरमाच्छाद्य आस्तीर्णकुशायां भूमौ दक्षिणाशिरस्कं स्थापयेत् ततो घृतेनाभ्यज्य ॐ गयादीनि च ती
र्थानि ये च पुण्याः शिलोच्चयाः। कुरुक्षेत्रं च गंगां च यमुनां च सरिद्वरां। कौशिकीं चन्द्रभागां च सर्वपापप्रणाशिनीं। भद्रावकाशां गण्डकीं सरयूं पनसां तथा। वैणवं च वराहं
च तीर्थं पिण्डारकं तथा। पृथिव्यां यानि तीर्थानि सरितः सागरांस्तथा इति चिन्तयित्वा पुनः स्नापयेत वस्त्रान्तरं परिधाप्य उपवीत उत्तरीयं च दत्वा चन्दनादिनोपलिप्य कर्णनासि
कानेत्रद्वय मुखात्मकेषु सप्तच्छिद्रेषु सप्त सुवर्णखंडिकाः प्रक्षिपेत्। तदभावे कांस्यखंडिकाः। ततो वस्त्रान्तरेणाच्छाद्य वहेयुः वहनकाले आमपात्रस्थं तदन्नार्द्धं वर्त्मार्द्धे
त्यजेत्। अर्द्धं पिण्डार्थमवशेषयेत ततोग्निदाता पुत्रादिश्चितां भूमौ गत्वा तदन्नार्द्धं सतिलं पिण्डदानेतिकर्तव्यतया त्यजेत्। सा पथ्यागोमयेनोपलिप्तायां पातितवामजानुः प्रा

८३ चीनावीति कुशमूलेन। ॐ अपहता असुरा रक्षांसि वेदिषद इत्यनेन दक्षिणाग्रां रेखां कुर्यात्। तदुपरि कुशानास्तीर्य ॐ एहि प्रेत सोम्य गंभीरेभिः पथिभिः पूर्व्विणेभि-
र्दत्वास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्व्ववीरं नियच्छ इत्यावाह्य सतिलपात्रं वामहस्ताद्दक्षिणहस्तेन गृहीत्वा ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नवनेनिक्ष्व इत्यवनेजयेत्
वामहस्तगृहीतामपात्राद्दर्भांश्च सतिलं दक्षिणहस्तेन गृहीत्वा ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्म्मन्नेतत्तेऽन्नमुपतिष्ठतां इति कुशोपरि दद्यात्। पिण्डपात्रक्षालनज
लेन तदुपरि पुनरवनेजनं दत्वा तूष्णीं गन्धादिदानं सामगेतरेषां तु। नावाहनमिति विशेषः। ततः पुत्रादिः स्नानं कृत्वा पंचधा भूसंस्कारं कृत्वा चितां रचयित्वा तत्र दारुचयं कुर्यात्
तदुपरि वस्त्रद्वयं सहितं दक्षिणाशिरसं सामगमधोमुखं पुमांसं न्यसेत् नार्य्यास्तूत्तानदेहत्वं सामगेतरेषामुत्तराशिरस्त्वं ततो दवाग्न्याग्नि मुखाः सर्वे इति हुताशनं गृ ८३
हीत्वा एनं दहन्तु इति मनसा ध्यात्वा ॐ कृत्वा तु दुष्करं कर्म्म जानता वाप्यजानता। मृत्युकालवशं प्राप्य नरं पंचत्वमागतं। धर्म्माधर्म्मसमायुक्तं लोभमोहसमावृतं।
दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु। इति पठित्वा प्रदक्षिणं कृत्वा दक्षिणामुखः शिरःस्थाने दद्यात्। स्त्रीदाहे विनरमित्येव पाठः। न नारी मृत्यूहः। ततो दाहे वृ
त्ते प्रादेशप्रमाणाः सप्तकाष्ठिका गृहीत्वा चिताग्निं सप्तवारान् प्रदक्षिणीकृत्य सप्तकाष्ठिकाश्चिताग्नौ एकैकक्रमेण क्षिपेत्। ततः कुठारेण ॐ क्रव्यादाय नमस्तुभ्यमिति
मंत्रं सकृत् पठित्वा चितास्थ जलघटोपरि सप्त प्रहारान् दद्यात्। ततस्तमग्निमपश्यन्निर्वामावर्त्तेन स्नातुं नदीं गत्वा नग्नं शवं न दहेत्। शवसम्बन्धि वस्त्रादि श्मशानवासि चांडा
लादिभ्यो दद्यात्। सूतिकां रजस्वलां च सतिलजलपंचगव्यपूर्णकुंभं आपोहिष्ठा वामदेव्यादिभिरभिमंत्र्य स्नापयित्वा दहेदिति विशेषः। गर्भवत्यास्तु गर्भं निःसार्य तस्या दाहः कर्त्तव्यः

ततोजलसमीपंगत्वापुत्रादयः प्रत्युत्तरदानाभिरस्तं । शाल्यादिकंप्रार्थयेयुः उदकंकरिष्यामः तेनचकुरुध्वं माचैवं पुनरश्रात वर्षे प्रेतेकुरुध्वमेवेतरस्मिन इतिउत्तरेदत्ते दृष्ट्वापुरः
स्तरमेव समवतरणं जले ततः परिहितं वस्त्रंउत्तरदेशं प्रक्षाल्य तदेवपरिधाय प्राचीनावीतिनो दक्षिणामुखाः । ॐ अपनः शोशुचदघमित्यनेनमन्त्रेण वामहस्तानामिकयाऽप
आलोड्य एकवस्त्राः सकृन्निमज्जाचम्यदक्षिणामुखस्तर्पयेयुः । ऋग्वेदिनामयंविशेषः उत्तरवचनदानानन्तरं ॐइमेजीवाइत्यस्यशंखश्रुक ऋषिर्मृत्युर्देवतात्रिष्टुप छन्दः उदकप्र
मने विनियोगः । ॐइमेजीवावि मृतेववाजिन्वन्भूतपादयः फलेह स्त्योघ प्रांचोगमेहताय प्रसविंघाघीय आपुः प्रतरं प्रदानाजपन्तं स्थिरमुदकमन्तात्यैः सहसमागत्य । ॐ अपनः शो
शुचदघमग्नेशुशुग्ध्यावा अपनः शोशुचदघं ॥१॥ ॐ याक्षत्रियावुगानसावमुयश्न यजामहे अपनः शोशुचदघं ॐप्रयद्दिष्ट एषांपुरायाकाः शुचयः अपनः शोशुचदघं ॥३॥ ॐ
प्रयान्तु दग्नेसूरयायेमानि प्रहेवयं अपनः शोशुचदघं ॥४॥ अप्रयदग्धि सहप्रतोभान्ति भावनः अपनः शोशुचदघं ॥५॥ इति विश्वतोमुखाविश्वतः परिभूरसि अपनः शोशुचद
घं ॥६॥ ॐ यूषोनविश्वतोमुखात्ति लवैवघायवः अपनः शोशुचदघं ॥७॥ ॐ शवः सिन्धुद्विवनावयाति परिवास्वस्तये अपनः शोशुचदघं ॥८॥ इत्येकमुदीर्य्यवामहस्तानामि
कया अपआलोड्यनिमज्जयेयुः । ततोऽमुकगोत्रं प्रेतं अमुकदेवशर्म्माणं तर्पयामिइतिसामगानां प्रयोगः । यजुर्वेदीनान्तु अमुकगोत्रप्रेत अमुकदेवशर्म्मन्नेतत्ते तिलोदकं
तृप्यस्वेति एकांजलिदानमावश्यकं अंजलित्रयदानं फलातिशयार्थं । ततः पुनः स्नात्वाजलादुत्थानं बालपुरःसरंकार्य्यं । ततोधौतेवाससीपरिधाय तद्वस्त्रमापीड्य उत्तरदेशं वि
सृज्याचामेत् ततः शाद्वलउपविश्य मानुष्येकदलीस्तम्भे निःसारेसारमार्गणं । यः करोतिससम्मूढो जलबुद्बुदसन्निभे । पंचधासंभृतः कायोयदिपंचत्वमागतः । कर्म्मभिः स्व

८५ शरीरोत्थैस्तत्रकापरिवेदना। गोत्रीवत्समतीनाश सुहृदधिदैवतानि च। केषां प्रश्नः कथं नाशं मर्त्यलोकं नयिष्यति। श्लेष्माश्रुबान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः। अतो न रोदितव्यं हि
क्रियाकार्या विधानतः। इति चिन्तयित्वा गृहद्वारं समागत्य निम्बपत्राणि दन्तैः खण्डयित्वा आचम्य ओं शमी पापं शमयत्विति शमीं स्पृष्ट्वा ओं अश्मेव स्थिरो भूयासम् इत्यनेनना
स्मानं पदा स्पृष्ट्वा ओं अग्निर्नः शर्म यच्छत्विति अग्निं स्पृष्ट्वा वृषभच्छागयोर्मध्ये स्थित्वा। ओं स्वागितिर्मं त्रेणा द्वावपि स्पृष्ट्वा उदकं गोमयं गौरसर्षपांश्च स्पृष्ट्वा बालपुरःसरा गृहं
प्रविशेयुः। दिवा यदि दाहस्तदा रात्रौ ग्रामप्रवेशः रात्रौ चेत्तदा दिवसे अशक्तौ त्वा त्वराणात् मतिं गृहीत्वा कालप्रतीक्षणं विना प्रवेष्टव्यं॥ ०॥ अथपिण्डदानं॥ ०॥ तत्र कुश
तण्डुलप्रस्थतिद्वयं त्रिः प्रक्षाल्य ऐशान्यां दिशि स्वस्विन्नं पचेत्॥ ततः पवित्रपाणिः प्राचीनावीती पतितवामजानुः दक्षिणामुखो हस्तप्रमाणं चतुरङ्गुलोच्छ्रं दक्षिणाप्लवं पिंड ८४
कं कृत्वा तदुपरि रेखां कृत्वा दर्भानास्तीर्य तिलान् प्रक्षिप्य ओं अद्यामुकगोत्र प्रेतामुकदेवशर्मन् अवनेनिक्ष्व इत्यास्तीर्णकुशोपरि सतिलजलेनावनेजयेत् ततस्तिलमधुघृ
तादिमिश्रं तस्य पिंडं गृहीत्वा ओं अद्यामुकगोत्र प्रेतामुकदेवशर्मन्नेतत्प्रथमं पिण्डं पूरकमिति अवनेजनस्थाने दद्यात् ततः पिण्डपात्रप्रक्षालनजलेन पुनरवनेजयेत्।
ओं अद्यामुकगोत्र प्रेतामुकदेवशर्मन्नेतदूर्णातन्तुमयं वासः इति दद्यात्। ततः आमन्त्रामयपात्रे जलांजलिं पिंडसमीपे स्थापयेत्। गन्धमाल्ये यथाशक्तिं दद्यात्। वाप्यपर्यन्तं
पिण्डं पश्यन्तिष्ठेत् ततः पिण्डादिकं जले क्षिपेत्। कालेऽप्यकृतचूडोपनयनानां अनूढस्त्रीणां च कुशास्तरणं विनेति विशेषः। एवं कृतचूडानामुपनयनकालात् प्राक् द
र्भोपरि पिण्डदानं एवमुपनयनकाले कृतोपनयनानां विवाहकाले त्वागतेऽनूढस्त्रीणां दर्भोपरि पिंडदानं एवमष्टवर्षविवाहकाले त्वागतेऽनूढस्त्रीणामेव दर्भोपरि पिंडदानं।

ततो राजा वाचम्य दक्षिणामुखः प्राचीनावीती त्रिकाष्ठिको परिभ्रम्य पात्रे उदकं तथा पात्रान्तरे क्षीरं निधाय प्रेताः स्नाहि पिब चेदं क्षीरमिति ब्रूयात् ॐ श्मशानानलदग्धोऽसि प
रित्यक्तोऽसि बान्धवैः। इदं नीरमिदं क्षीरमत्र स्नाहि इदं पिब। ॐ आकाशस्थो निरालम्बो वायुभूत निराश्रयः। जलदुग्धं मया दत्तं स्नात्वा पीत्वा सुखी भव। एतदेकरात्रमावश्यकं दशरात्रं
कलातिशयार्थमिति द्वितीयपिण्डादिषु द्वितीयं पिण्डं पूरकमितीत्यादि विशेषः। द्वितीयपिण्डे मृण्मयपात्रद्वये जलाञ्जलिद्वयदानं तृतीयादिपिण्डे पात्रादिवृद्धिः। येन पंच पंचाशत्
पात्राणि जलयश्च भवन्ति। त्र्यहाशौचे प्रथमदिने पिण्डत्रयं द्वितीयदिने चतुष्टयं तृतीयदिने त्रयं प्रथमे एकं द्वितीये चतुष्टयं तृतीये पंच इति वा कल्पः। चतुरहाशौचे प्रथमचतु
र्थदिनयोर्द्वौ द्वौ तृतीये तृतीययोस्त्रयस्त्रयः पंचाहाशौचे प्रथमपंचमदिनयोरेकैकः पिण्डः। द्वितीयचतुर्थयोर्द्वौ द्वौ तृतीये चत्वारः। षडाहाशौचे तृतीयचतुर्थयोस्त्रयस्त्रयः पिण्डा
शेषेष्वेकैकः। सप्ताहाशौचे तृतीयचतुर्थपंचदिनेषु द्वौ द्वौ शेषेष्वेकैकः। अष्टाहाशौचे चतुर्थपंचमदिनयोर्द्वौ द्वौ शेषेष्वेकैकः। नवाहाशौचे पंचमदिने द्वौ शेषेष्वेकैकः। सप्ता
हाशौचे तृतीयचतुर्थपंचदिनेषु द्वौ द्वौ शेषेष्वेकैकः। पक्षिणीद्व्यहाशौचयोस्तु आद्यद्वितीयदिनयोः पंच पंच पिण्डाः। द्वादशाहाशौचे नवसु दिनेषु नव पिण्डाः शेषदिने दश
मः सद्यः शौचैकाहाशौचयोरेकाह्न्येव दश पिण्डाः अशौचान्तरमध्ये पिण्डा देयाः रात्रावपि पिण्डो देयः ॥ ० ॥ अथ गंगास्थिप्रक्षेपप्रयोगः ॥ ० ॥ तत्र स्नात्वाचम्य उदङ्मुखः कु
शत्रयतिलजलान्यादाय ॐ तत्सदित्युच्चार्य अद्यामुकगोत्रस्य एतदस्थिसमसंख्यवर्षसहस्रावच्छिन्नस्वर्गाधिकरणकसाहत्वकामोऽमुकदेवशर्मणा एतान्यस्थिख
ण्डानि गंगायां विनिक्षिपामीति संकल्प्यापसव्यं कृत्वा अस्थीनि पंचगव्येन सिक्त्वा हिरण्यमध्वाज्यतिलैः संयोज्य मृत्तिकापुटे स्थापयित्वा दक्षिणहस्तेन तत्पुटकमादाय दक्षिणां

८५

८५ दिशं पश्यन् । ॐ नमोऽस्तु धर्म्माय इति वदन् जलं प्रविश्य समे प्रीतो भवतु इत्युक्त्वा अस्थि प्रक्षिपेत् ततो मज्जनं कृत्वा उत्थाय सूर्य्यं दृष्ट्वा दक्षिणामुत्सृजेत् । पर्णनरदाहे तु शरप
त्रैः पुन लकं कृत्वा शिरसि चत्वारिंशत् पलाशपत्राणि ४० ग्रीवायां दश १० उरसि त्रिंशत् ३० उदरे विंशति २० बाह्वोः पंचाशत् पंचाशत् हस्तद्वयोरंगुलीषु पंच पंच १० अण्डद्वये
त्रीणि त्रीणि ६ शिश्ने चत्वारि ४ ऊरुद्वये पंचाशत् पंचाशत् १०० । दक्षिणजानुजंघयोः पंचदश १५ वामजानुजंघयोः पंचदश १५ । पादद्वयांगुलीषु पंच पंच १० ।
देयानि पुत्तलकं मेषलोमसूत्रेण संवेष्ट्य यवपिष्टेन प्रलिप्य पूर्ववत् दहेदिति ॥ ❀ ॥ इति वन्द्यघटीय श्रीहरिहरभट्टाचार्य्यात्मज श्रीरघुनन्दनभट्टाचार्य्य विरचितं स्मृति
तत्त्वे शुद्धितत्त्वं समाप्तं ॥ ❀ ॥ हरिः ॐ तत्सत् ॥ ॐ विश्वाधिपतये नमः ॥ ❀ ॥ ❀ ॥ ८५ श्री

शुद्धितत्त्वं